॥ अर्हम् ॥

बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया

# व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - २

[ सिद्धहेमशब्दानुशासनस्य अष्टमाध्यायस्य चतुर्थःपादः ]

सम्पादक

आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः

उपाध्याय-विमलकीर्तिविजयः




प्रकाशक

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति

संस्कार शिक्षणनिधि- अहमदाबाद

ई. २०१७ ● वि.सं. २०७३

॥ अर्हम् ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - २

[ अष्टमो विभागः ]

[ अष्टमाध्यायस्य चतुर्थपादपर्यन्तम् ]

सम्पादकः
आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः
**उपाध्याय-विमलकीर्तिविजयः**




प्रकाशकः
**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी**
**स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.**
ई. २०१७ • वि.सं. २०७३

**बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया**
**व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् - २**

सम्पादकः **आचार्य-विजयशीलचन्द्रसूरि-शिष्यः**
**उपाध्याय-विमलकीर्तिविजयः**

प्रकाशकः **कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि**
अहमदाबाद.

प्रथमावृत्तिः ई.स. २०१७ | वि.सं. २०७३ | वीर नि.सं. २५४३

प्रतयः- २५०

पृष्ठानि- ०४ + ३६० = ३६४

प्राप्तिस्थानः (१) **श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर,**
१२, भगतबाग, नवा शारदामंदिर रोड, शेठ आणंदजी कल्याणजीनी पेढी पासे,
पालडी, अहमदाबाद-३८०००७. फोन : २६६२२४६५

(२) **सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोल, अहमदाबाद-३८०००१.
फोन : २५३५६६९२

(३) **श्रीविजयनेमिसूरीश्वरजी ज्ञानशाला**
हठीसिंह केसरीसिंहनी वाडी, दिल्ही दरवाजा बहार, शाहीबाग रोड, अहमदाबाद.
फोन : ९८९८७०४७०७

मूल्यम्- ६००/-

मुद्रकः **किरीट ग्राफिक्स,**
३, मंगलम एपा., भगवाननगरनो टेकरो, विश्वकुंज, पालडी, अमदावाद-७
दूरभाषः ९८९८४९००९१

## श्रुतभक्ति

**आ ग्रंथना प्रकाशनमां**

**श्रीइन्द्रपुरी जैन संघे (आजवा रोड-वडोदरा)**

**ज्ञानद्रव्यमांथी लाभ लई श्रुतज्ञाननी भक्ति करी छे,**
**तेमनी श्रुतभक्तिनी भूरि भूरि अनुमोदना.**

## પ્રકાશકીય નિવેદન...

પરમ પૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મહારાજ સાહેબની શુભભાવના તેમજ પ્રેરણાથી વિ.સં. ૨૦૪૫ના વર્ષે સ્થપાયેલ, કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય ભગવંતના નામ સાથે જોડાયેલ આ ટ્રસ્ટે, પૂજ્ય આચાર્યશ્રીના શિષ્યરત્ન વિદ્વદ્વર્ય પરમ પૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મહારાજ સાહેબના માર્ગદર્શન પ્રમાણે અનેક સાહિત્યિક પ્રવૃત્તિઓ કરી છે. તેમાં મૂર્ધન્ય વિદ્વજ્જનોને 'શ્રીહેમચન્દ્રાચાર્ય ચન્દ્રક' અર્પણ કરી તેમનું બહુમાન કરવામાં આવે છે. વિદ્વજ્જનોને આમંત્રણ આપીને વિવિધ વિષયો પર પરિસંવાદ અને સંગોષ્ઠીનું પણ આયોજન કરવામાં આવે છે, અને પ્રાચીન સાહિત્યના ગ્રંથોનું સંશોધન-સંપાદન કરાવવાપૂર્વક પ્રકાશન પણ કરવામાં આવે છે. આજ પર્યંત આ ટ્રસ્ટના ઉપક્રમે આવા અનેક ગ્રંથોનું પ્રકાશન થએલ છે, જે જૈન સંઘમાં જ નહિ પણ દેશ-વિદેશના અસંખ્ય વિદ્વાનોમાં પણ પ્રશંસનીય તથા ઉપાદેય બનેલા છે, આ ટ્રસ્ટના ઉપક્રમે 'अनुसंधान' નામે એક શોધપત્રિકા પણ પ્રકાશિત કરવામાં આવે છે, જેના અદ્યાવધિમાં ૭૧ અંકો પ્રકાશિત થયા છે.

આજે આ ટ્રસ્ટના ઉપક્રમે શ્રીહેમચન્દ્રાચાર્યના सिद्धहेमव्याकरण ઉપર લખાયેલા सिद्धहेमप्राकृतव्याकरण-ढुण्ढिका નામના અપ્રગટ વિવરણનો પહેલો ભાગ પ્રકાશિત થઈ રહ્યો છે, તેનો અમને આનંદ છે. આ ગ્રંથનું હસ્તલિખિત પ્રતિઓ પરથી પ્રતિલિપિ-લેખન તેમજ સંપાદન પરમ પૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મહારાજ સાહેબના શિષ્ય ઉપાધ્યાય શ્રીવિમલકીર્તિવિજયજી મહારાજે કરેલ છે. આવું સરસ કાર્ય કરવા બદલ તેઓ અભિનંદનના અધિકારી છે. શ્રીહેમચન્દ્રાચાર્યના સિદ્ધહેમચન્દ્રશબ્દાનુશાસન વ્યાકરણ પરના અપ્રકાશિત અજ્ઞાતકર્તૃકઢુંઢિકાના સાત ભાગો પ્રકાશિત થઈ ગયા છે, તેના પ્રકાશનનો લાભ પણ અમારા ટ્રસ્ટને પ્રાપ્ત થયો હતો તે અમારું પરમ સદ્ભાગ્ય છે. ગ્રંથનું સુંદર અક્ષરાંકન-મુદ્રણ કરી આપવા બદલ કિરીટ ગ્રાફિક્સ (અમદાવાદ)ને ધન્યવાદ.

**હઠીસિંહ કેસરીસિંહની વાડી, અમદાવાદ.**
**મહાસુદ -૧૪, વિ.સં. ૨૦૭૩**

**કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય નવમ**
**જન્મ શતાબ્દી સ્મૃતિ સંસ્કાર-શિક્ષણનિધિ અમદાવાદ.**

# સમર્પણ

પ્રાકૃતભાષાના અધ્યયન માટે
'પ્રાકૃતવિજ્ઞાનપાઠમાલા'નું અદ્ભુત સર્જન કરીને
જેમણે પ્રાકૃતભાષાના અભ્યાસુઓ પર મહાન ઉપકાર કર્યો છે
તેવા પરમ પૂજ્ય ધર્મરાજા આચાર્ય
**ભગવંત શ્રીવિજયકસ્તૂરસૂરીશ્વરજી મહારાજ સાહેબ**ના
ચરણકમલમાં
સાદર સમર્પણ...

॥ अर्हम् ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

# बृहत्तपागच्छीय-श्रीउदयसौभाग्यगणिविरचितया व्युत्पत्तिदीपिकाभिधान-ढुण्ढिकया समर्थितं सिद्धहेमप्राकृतव्याकरणम् ॥

## [ द्वितीयो भागः ]

## ॥ अथ अष्टमाध्यायस्य चतुर्थः पादः ॥

### इदितो वा ॥ ८।४।१ ॥

सूत्रे ये इदितो धातवो वक्ष्यन्ते तेषां ये आदेशास्ते विकल्पेन भवन्तीति वेदितव्यम् । [1]तत्रैवोदाहियन्ते ॥

**[ इदितो वा ]** इदित् प्रथमा जस् । वा प्रथमा सि ।

### कथेर्वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प-सीस-साहाः ॥ ८।४।२ ॥

कथेर्धातोर्वज्जरादयो दशादेशा भवन्ति ॥

वज्जरइ । पज्जरइ । उप्पालइ । पिसुणइ । संघइ । बोल्लइ । चवइ । जम्पइ । सीसइ । साहइ । **उब्बुक्कइ** इति उत्पूर्वस्य 'बुक्क भाषणे' (५४) इत्यस्य । पक्षे-कहइ ॥

एते चान्यैर्देशीषु पठिता अपि अस्माभिर्धात्वादेशीकृता विविधेषु प्रत्ययेषु प्रतिष्ठन्तामिति । तथा च । वज्जरिओ कथितः । वज्जरिऊण कथयित्वा । वज्जरणं कथनम् । वज्जरन्तो कथयन् । वज्जरिअव्वं कथयितव्यमिति रूपसहस्राणि सिध्यन्ति । संस्कृतधातुवच्च प्रत्ययलोपागमादिविधिः ॥

**[ कथेर्वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प-सीस-साहाः ]** कथि षष्ठी ङस् । वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जम्प-सीस-साह प्रथमा जस् ।

पक्षे- **[ कहइ ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । वर्त्त० तिव् । 'प्रायो ण्यन्ताश्चुरादयः' इति न्यायात् साध्यत्वाद् वा णिजभावः । णिचि वा 'णेरदेदावावे' (३।१४९) णिस्थाने अत् । 'लोकात्' (१।१।३) कथति । 'अदेल्लुक्यादे०' (३।१५३) क० → का० । 'स्वराणां स्वराः' (४।२३८) का० → क० । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कहइ** ।

ननु देशे भवा देश्या इति कुतो न स्यात् ? उच्यते-देशीशब्दस्त्रीलिङ्गो नाममालावाचकः ।

**[ वज्जरिओ कथितः ]** वज्जर । क्तप्र० → त० । 'क्ते' (३।१५६) इ० **वज्जरिओ** ॥२॥

---

१. H. तत्रैव चोदाहरिष्यते ।

## दुःखे णिव्वरः ॥ ८।४।३ ॥

दुःखविषयस्य कथेर्णिव्वर इत्यादेशो वा भवति ॥ णिव्वरइ । दुःखं कथयतीत्यर्थः ॥

**[ दुःखे णिव्वरः ]** दुःख सप्तमी ङि । णिव्वर प्रथमा सि ।

**[ णिव्वरइ ]** णिव्वरइ इति कथनेन दुःखविषयं कथनं तु जातमेव, एतावति वार्थप्रतीतेः कहइ न प्रयोज्यम् ॥३॥

## जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः ॥ ८।४।४ ॥

जुगुप्सेरेते त्रय आदेशा वा भवन्ति ॥

झुणइ । दुगुच्छइ । दुगुञ्छइ । पक्षे-जुगुच्छइ । गलोपे-दुउच्छइ । दुउञ्छइ । जुउच्छइ ॥

**[ जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः ]** जुगुप्सि षष्ठी ङस् । झुण-दुगुच्छ-दुगुञ्छ प्रथमा जस् ।

**[ झुणइ-दुगुच्छइ-दुगुञ्छइ ]** 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । पक्षे -

पक्षे- **[ जुगुच्छइ ]** जुगुप्स । वर्त्त० ते । 'ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले' (२।२१) प्स० → छ० । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) जुगुच्छते। 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **जुगुच्छइ** ।

'क-ग-च-ज०' (१।१७७) इत्यादिना गलोपे तु **दुउच्छइ दुउञ्छइ जुउच्छइ** ॥४॥

## बुभुक्षि-वीज्योर्णीरव-वोज्जौ ॥ ८।४।५ ॥

बुभुक्षेराचारक्विबन्तस्य च वीजेर्यथासंख्यं णीरव-वोज्ज इत्यादेशौ वा भवतः ॥

णीरवइ । बुहुक्खइ । वोज्जइ । वीजइ ॥

**[ बुभुक्षि-वीज्योर्णीरव-वोज्जौ ]** बुभुक्षि-वीजि षष्ठी ओस् । णीरव-वोज्ज प्रथमा औ ।

**[ णीरवइ बुहुक्खइ ]** बुभुक्षि० । पक्षे-बुभुक्ष्० । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) बुभुक्षति। 'ख-घ-थ-ध-भाम्' (१।१८७) भु० → हु० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य ख० । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **बुहुक्खइ** ।

**[ वोज्जइ वीजइ ]** [1]वीजमिवाचरतीति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन वीजस्य वोज्ज इति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वोज्जइ** । पक्षे-**वीजइ** ॥५॥

## ध्या-गोर्झा-गौ ॥ ८।४।६ ॥

अनयोर्यथासंख्यं झा-गा इत्यादेशौ भवतः ॥

झाइ झाअइ । णिज्झाइ णिज़्झाअइ । निपूर्वो दर्शनार्थः ॥ गाइ गायइ ॥ झाणं । गाणं ॥

**[ ध्या-गोर्झा-गौ ]** ध्या च गा च = ध्या-गौ, तयोः ध्या-गोः । षष्ठी ओस् । झा-गा प्रथमा औ ।

ननु 'साध्वस०' (२।२६) इति झ कृते 'स्वराणां स्वराः' (४।२३८) इत्यात्वे सर्वं भविष्यति, किं सूत्रेण ? सत्यम् - 'स्वराणां स्वराः' (४।२३८) इत्यनेन आत्वं स्यात् किं वा इत्वं स्यादिति संदेहनिरासार्थं सूत्रकरणम् ॥

**[ झाइ झाअइ ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै (२) । अनेन ध्यै० → झा० इत्यादेशः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **झाइ** । द्वितीये 'स्वरादनतो वा' (४।२४०) अकारागमः **झाअइ** ।

---

१. धा० पा० - तृतीयं परिशिष्टम् - 'लौकिक-वाक्यकरणीय-आगमिका धातवः' तेषु 'वीजण् व्यजने' ।

**[ णिज्झाइ णिज्झाअइ ]** निपूर्व० ध्यै (२) । अनेन ध्यै० → झा० इत्यादेशः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'स्वरादनतो वा' (४।२४०) अकारागमः । 'तैलादौ' (२।९८) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । 'नो णः' (१।२२८) नि० → णि० **णिज्झाइ णिज्झाअइ** ।

[1]**[ काइ काअइ ]** 'कैं शब्दे' (३६) कै (२) । अनेन का० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । द्वितीये 'स्वरादनतो वा' (४।२४०) अकारागमः **काइ काअइ** ।

**[ गाइ गाअइ ]** 'गैं शब्दे' (३७) गै (२) । अनेन गा० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । द्वितीये 'स्वरादनतो वा' (४।२४०) अकारागमः **गाइ गाअइ** ।

[2]**[ राइ राअइ ]** 'रैं शब्दे' (३८) रै (२) । अनेन रा० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । द्वितीये 'स्वरादनतो वा' (४।२४०) अकारागमः **राइ राअइ** ।

**[ झाणं ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । ध्यायते इति ध्यानम् । अनट्प्र० → अन । अनेन ध्यै० → झा० । क्वचिदेकपदेऽपि सन्धिः । 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) न० → ण० **झाणं** ।

**[ गाणं ]** 'गैं शब्दे' (३७) गै । गीयते इति गानम् । अनट्प्र० → अन । अनेन गै० → गा० । **क्वचिदेकपदेऽपि** सन्धिः । 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) न० → ण० **गाणं** ॥६॥

## ज्ञो जाण-मुणौ ॥ ८।४।७ ॥

जानातेर्जाण-मुण इत्येतावादेशौ भवतः ॥

जाणइ । मुणइ । बहुलाधिकारात् क्वचिद्विकल्पः । जाणिअं । णायं । जाणिऊण । णाऊण । जाणणं । णाणं । मणइ इति तु मन्यतेः ॥

**[ ज्ञो जाण-मुणौ ]** ज्ञ्-ज्ञा षष्ठी ङस् । जाण-मुण प्रथमा औ ।

**[ जाणइ मुणइ ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० तिव् । अनेन ज्ञा० → जाण०-मुण० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जाणइ मुणइ** ।

**[ जाणिअं णायं ]** ज्ञा (२) । ज्ञायते इति । क्तप्र० । बहुलाधिकारात् क्वचिद्विकल्पेन जाण आदेशः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । प्रथमे 'क्ते' (३।१५६) इत्त्वम् । द्वितीये 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो०' (१।१८०) अ० → य० **जाणिअं णायं** ।

**[ जाणिऊण णाऊण ]** ज्ञा (२) । क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । **प्रथमे** जाण आदेशः । 'एच्च क्त्वा-तुम्०' (३।१५७) इत्त्वम् । द्वितीये 'म्न-ज्ञोर्णः' (२।४२) ज्ञा० → णा० । 'क-ग-च-ज०' (१।१७७) त्लुक् **जाणिऊण णाऊण** ।

**[ जाणणं णाणं ]** ज्ञा (२) । ज्ञायते इति ज्ञानम् । अनट्प्र० । वा जाण आदेशः । द्वितीये 'म्न-ज्ञोर्णः' (२।४२) ज्ञा० → णा० । एकपदेऽपि सन्धिः । 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) न० → ण० **जाणणं णाणं** ॥७॥

## उदो ध्मो धुमा ॥ ८।४।८ ॥

उदः परस्य ध्मो धातोर्धुमादेशो भवति ॥ उद्धुमाइ ॥

**[ उदो ध्मो धुमा ]** उद् पञ्चमी ङसि । ध्मा षष्ठी ङस् । धुमा प्रथमा सि ।

---

१. A. काइ काअइ उदाहरणम् । २. A. राइ राअइ उदाहरणम् ।

**[ उद्धुमाइ ]** उद्पूर्व० 'ध्मां शब्दा-ऽग्निसंयोगयोः' (४) ध्मा । वर्त्त० तिव् । अनेन धुमादेशः । 'त्यादीनाामाद्यत्रयस्या० (३।१३९) तिव्० → इ० **उद्धुमाइ** ॥८॥

## श्रदो धो दहः ॥ ८।४।९ ॥

श्रदः परस्य दधातेर्दह इत्यादेशो भवति ॥ सद्दहइ । [1]सद्दहमाणो जीवो ॥

**[ श्रदो धो दहः ]** श्रद् पञ्चमी ङसि । धा षष्ठी ङस् । दह प्रथमा सि ।

**[ सद्दहइ ]** श्रद्पूर्व० 'डुधांगृक् धारणे च' (११३९) धा । वर्त्त० तिव् । अनेन धा० → दह० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सद्दहइ** ॥९॥

## पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः ॥ ८।४।१० ॥

पिबतेरेते चत्वार आदेशा वा भवन्ति ॥ पिज्जइ । डल्लइ । पट्टइ । घोट्टइ । पिअइ ॥

**[ पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः ]** पिबि षष्ठी ङस् । पिज्ज-डल्ल-पट्ट-घोट्ट प्रथमा जस् ।

पक्षे- **[ पिअइ ]** 'पां पाने' (२) पा । वर्त्त० तिव् । 'स्वरादनतो वा' (४।२४०) अत् । 'स्वराणां स्वराः' (४।२३८) इत्वम् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पिअइ** ॥१०॥

## उद्वाकेरोरुम्मा-वसुआ ॥ ८।४।११ ॥

उत्पूर्वस्य वातेः ओरुम्मा-वसुआ इत्येतावादेशौ वा भवतः ॥ ओरुम्माइ । वसुआइ । उव्वाइ ॥

**[ उद्वाकेरोरुम्मा-वसुआ ]** उद्वाकि षष्ठी ङस् । ओरुम्मा-वसुआ प्रथमा औ ।

पक्षे- **[ उव्वाइ ]** उद्पूर्व० 'वांक् गति-गन्धनयोः' (१०६३) वा । वर्त्त० तिव् । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) वस्य द्वित्वम् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **उव्वाइ** ॥११॥

## निद्राकेरोहीरोङ्घौ ॥ ८।४।१२ ॥

निपूर्वस्य द्राते: ओहीर - उङ्घ इत्येतावादेशौ वा भवतः ॥ ओहीरइ । उङ्घइ । निद्दाइ ॥

**[ निद्राकेरोहीरोङ्घौ ]** निद्राकि षष्ठी ङस् । ओहीर-उङ्घ प्रथमा औ ।

पक्षे- **[ निद्दाइ ]** निपूर्व० 'द्रांक् कुत्सितगतौ' (१०६६) द्रा । वर्त्त० तिव् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक्। 'अनादौ०' (२।८९) दस्य द्वित्वम् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निद्दाइ** ॥१२॥

## आघ्रेराइग्घः ॥ ८।४।१३ ॥

आजिघ्रतेराइग्घ इत्यादेशो वा भवति ॥ आइग्घइ । अग्घाअइ ॥

**[ आघ्रेराइग्घः ]** आघ्रि षष्ठी ङस् । आइग्घ प्रथमा सि ।

पक्षे- **[ अग्घाअइ ]** 'घ्रां गन्धोपादाने' (३) घ्रा, आङ्पूर्व० । वर्त्त० तिव् । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-घ्घा०' । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वघस्य गः । 'स्वरादनतो वा' (४।२४०) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **अग्घाअइ** ॥१३॥

---

१. सम्मद्दिट्ठी जीवो, गच्छइ नियमा विमाणवासीसु । जइ न विगयसम्मत्तो, अहव न बद्धाउओ पुव्विं ॥२५॥
जं सक्कइ तं कीरइ, जं च न सक्कइ तयंमि सद्दहणा । **सद्दहमाणो जीवो,** वच्चइ अयरामरं ठाणं ॥२६॥
[सम्बोधप्रकरणे सम्यक्त्वाधिकारे]

## स्नाकेरब्भुत्तः ॥ ८।४।१४ ॥

स्नातेरब्भुत्त इत्यादेशो वा भवति ॥ अब्भुत्तइ । ण्हाइ ॥

**[ स्नाकेरब्भुत्तः ]** स्नाकि षष्ठी ङस् । अब्भुत्त प्रथमा सि ।

पक्षे- **[ ण्हाइ ]** 'ष्णांक् शौचे' (१०६४) ष्णा । 'आदेष्णोऽष्वक्कष्ट्याष्ठीवस्स्नम्' (शाकटायने ४।२।२६१) ष्णा० → स्ना० । ('षः सोऽष्ट्यै०' (२।३।९८) स्ना) । वर्त्त० तिव् । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) स्ना० → ण्हा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **ण्हाइ** ॥१४॥

## समः स्त्यः खाः ॥ ८।४।१५ ॥

सम्पूर्वस्य स्त्यायतेः खा इत्यादेशो भवति ॥ संखाइ संखायं ॥

**[ समः स्त्यः खाः ]** सम् षष्ठी ङस् । स्त्या षष्ठी ङस् । खा प्रथमा सि ।

**[ संखाइ ]** सम्पूर्व० 'स्त्यैं सङ्घाते च' (४०) स्त्यै । वर्त्त० तिव् । अनेन स्त्यै० → खा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **संखाइ** ।

**[ संखायं ]** सम्पूर्व० 'स्त्यैं सङ्घाते च' (४) स्त्यै । क्तप्र० → त० । अनेन स्त्यै० → खा० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **संखायं** ॥१५॥

## स्थष्ठा-थक्क-चिट्ठ-निरप्पाः ॥ ८।४।१६ ॥

तिष्ठतेरेते चत्वार आदेशा भवन्ति ॥

ठाइ । ठाअइ । ठाणं । पट्ठिओ । उट्ठिओ । पट्ठाविओ । उट्ठाविओ । थक्कइ । चिट्ठइ । **चिट्ठिऊण** । **निरप्पइ** ॥

बहुलाधिकारात् क्वचिन्न भवति - थिअं । थाणं । पत्थिओ । उत्थिओ । थाऊण ॥

**[ स्थष्ठा-थक्क-चिट्ठ-निरप्पाः ]** स्था षष्ठी ङस् । ठा-थक्क-चिट्ठ-निरप्प प्रथमा जस् ।

**[ ठाइ ठाअइ ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) **स्था** । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० वक्ष० (१) - सूत्र (२९) ) स्था । वर्त्त० तिव् । अनेन **स्था० → ठा०** । **द्वितीये** 'स्वरादनतो वा' (४।२४०) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **ठाइ ठाअइ** ।

**[ ठाणं ]** स्था । अनट्प्र० → अन० । अनेन स्था० → ठा० । 'समानानां०' (१।२।१) दीर्घः । 'नो णः' (१।२२८) न० → ण० **ठाणं** ।

**[ पट्ठिओ ]** प्रपूर्व०, स्था । क्तप्र० । अनेन स्था० → ठा० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) अ० → इ० । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) पट्ठित । 'क-ग-च-ज०' (१।१७७) त्लुक् । **प्रथमा सि** । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पट्ठिओ** ।

**[ उट्ठिओ ]** उत्पूर्व०, स्था । क्तप्र० । अनेन स्था० → ठा० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) अ० → इ० । 'लुक्' (१।१०) आलुक् । 'क-ग-ट०' (२।७७) त्लुक् । 'लोकात्' (१।१।३) उट्ठित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **उट्ठिओ** ।

**[ पट्ठाविओ उट्ठाविओ ]** प्रपूर्व० स्था - उत्पूर्व० स्था । प्रतिष्ठन्तं(मानं) प्रयुङ्क्ते । उत्तिष्ठन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लुगावी क्त-भाव-कर्मसु' (३।१५२) णिग्स्थाने आवि० । 'लुक्' (१।१०) आलुक् । क्तप्र० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पट्ठाविओ उट्ठाविओ** ।

**[ थक्कइ ]** स्था । वर्त्त० तिव् । अनेन स्था० → थक्क० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **थक्कइ** ।

**[ चिट्ठइ ]** स्था । वर्त्त० तिव् । अनेन स्था० → चिट्ठ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चिट्ठइ** ।

**[ चिट्ठिऊण ]** स्था । क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । 'एच्च क्त्वा-तुम्०' (३।१५७) इत्वम् । 'क-ग-च-ज०' (१।१७७) त्लुक् **चिट्ठिऊण** ।

**[ निरप्पइ ]** स्था । वर्त्त० तिव् । अनेन स्था० → निरप्प० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निरप्पइ** ।

**[ थिअं ]** स्थित । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'क-ग-च०' (१।१७७) त्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थिअं** ।

**[ थाणं ]** स्था । अनट्प्र० → अन । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'नो णः' (१।२२८) न० → ण० **थाणं** ।

**[ पत्थिओ उत्थिओ ]** प्रपूर्व० स्था - उत्पूर्व० स्था । क्तप्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) थस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य त० । 'स्वरादनतो वा' (४।२४०) अत् । 'लुक्' (१।१०) आलुक् । 'क्ते' (३।१५६) इ० । 'लोकात्' (१।१।३) पत्थित-उत्थित । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पत्थिओ उत्थिओ** ।

**[ थाऊण ]** स्था । क्त्वाप्र० । 'क-ग-ट-ड०' (२।७७) स्लुक् । क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । 'क-ग-च-ज०' (१।१७७) त्लुक् **थाऊण** ॥१६॥

## उदष्ठ-कुक्कुरौ ॥ ८।४।१७ ॥

उदः परस्य तिष्ठतेः ठ-कुक्कुर इत्यादेशौ भवतः ॥ उट्ठइ । उक्कुक्कुरइ ॥

**[ उदष्ठ-कुक्कुरौ ]** उद् पञ्चमी ङसि । ठ-कुक्कुर प्रथमा औ ।

**[ उट्ठइ उक्कुक्कुरइ ]** यत्र पञ्चमीपरो निर्देशो भवति तत्र धातोरेवादेशः स्यात् । यथा-**उट्ठइ उक्कुक्कुरइ** । उत्तिष्ठतीत्यर्थः ॥१७॥

## म्लेर्वा-पव्वायौ ॥ ८।४।१८ ॥

म्लायतेर्वा-पव्वाय इत्यादेशौ वा भवतः ॥ वाइ । पव्वायइ । मिलाइ ॥

**[ म्लेर्वा-पव्वायौ ]** म्लि षष्ठी ङस् । वा-पव्वाय प्रथमा औ ।

पक्षे- **[ मिलाइ ]** 'म्लैं गात्रविनामे' (३२) म्लै । वर्त्त० तिव् । 'स्वराणां०' (४।२३८) म्ला । 'लात्' (२।१०६) लात् प्राग् इ० । 'लोकात्' (१।१।३) मिलाति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मिलाइ** ॥१८॥

## निर्मो निम्माण-निम्मवौ ॥ ८।४।१९ ॥

निर्पूर्वस्य मिमीतेरेतावादेशौ भवतः ॥ निम्माणइ । निम्मवइ ॥

**[ निर्मो निम्माण-निम्मवौ ]** निर्-मा षष्ठी ङस् । निम्माण-निम्मव प्रथमा औ ।

**[ निम्माणइ निम्मवइ ]** निर् 'मांङ्क् मान-शब्दयोः' (११३७) मा । अनेन उपसर्गेण सहैवादेशौ - **निम्माणइ** । **निम्मवइ** ॥१९॥

## क्षेर्णिज्झरो वा ॥ ८।४।२० ॥

क्षयतेर्णिज्झर इत्यादेशो वा भवति ॥ णिज्झरइ । पक्षे-झिज्जइ ॥

**[ क्षेर्णिज्झरो वा ]** क्षि षष्ठी ङस् । णिज्झर प्रथमा सि । वा प्रथमा सि ।

पक्षे- **[ झिज्जइ ]** 'क्षि क्षये' (१०) क्षि । वर्त्त० तिव् । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षि० → झि० । 'मध्ये च स्वरान्ताद्वा' (३।१७८) ज्ज आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **झिज्जइ** । क्षयतीत्यर्थः ॥२०॥

## छदेर्णेर्णुम-नूम-सन्नुम-ढक्कौम्वाल-पव्वालाः ॥ ८।४।२१ ॥

छदेर्ण्यन्तस्य एते षडादेशा वा भवन्ति ॥

णुमइ । नूमइ । णत्वे-णूमइ । सन्नुमइ । ढक्कइ । ओम्वालइ । पव्वालइ । छायइ ॥

**[ छदेर्णेर्णुम-नूम-सन्नुम-ढक्कौम्वाल-पव्वालाः ]** छदि षष्ठी ङस् । णि षष्ठी ङस् । णुम-नूम-सन्नुम-ढक्कौम्वाल-पव्वाल प्रथमा जस् ।

पक्षे- **[ छायइ ]** 'छदण् संवरणे' (१६५५) छद् । वर्त्त० तिव् । छद(छादय)न्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) छदति । 'अदेल्लुक्यादेरत आः' (३।१५३) छ० → छा० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **छाअ( य )इ** । आच्छादयतीत्यर्थः ॥२१॥

## निवृ-पत्योर्णिहोडः ॥ ८।४।२२ ॥

निवृगः पतेश्च ण्यन्तस्य णिहोड इत्यादेशो वा भवति ॥ णिहोडइ । पक्षे-निवारेइ । पाडेइ ॥

**[ निवृ-पत्योर्णिहोडः ]** निवृ-पति षष्ठी ओस् । णिहोड प्रथमा सि ।

पक्षे- **[ निवारेइ ]** निपूर्व० 'वृग्ट् वरणे' (१२९४) वृ । निवृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ऋवर्ण०' (४।२३४) वर० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'अदेल्लुक्यादेरत आः' (३।१५३) व० → वा० । 'लोकात्' (१।१।३) निवारेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निवारेइ** ।

**[ पाडेइ ]** 'पत्लृ पतने' (९६२) पत् । पतन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'सद-पतोर्डः' (४।२१९) तस्य डः । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'अदेल्लुक्या०' (३।१५३) प० → पा० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पाडेइ** ॥२२॥

## दूङो दूमः ॥ ८।४।२३ ॥

दूङो ण्यन्तस्य दूम इत्यादेशो भवति ॥ [१]दूमेइ मज्झ हिअयं ॥

---

१. **दूमेइ अ मे हिअअं** पुणो पुणो वि रहसंगजुत्ताणुणअं ।
दोसपराहुत्तठिअं वलंतमण्णुणिव्वोलिआहरं तीए मुहं ॥ [शृ० प्र० - ३०।४५]

दुनोति च मे हृदयं पुनः पुनरपि रहस्सङ्गयुक्तानुनयम् ।
दोषपराङ्मुखस्थितं वलन्मन्युमलिनिताधरं तस्या मुखम् ॥

**[ दूङो दूमः ]** दूङ् षष्ठी ङस् । दूम प्रथमा सि ।

**[ दूमेइ मज्झ हिअयं ]** [1]'टुदुंट् उपतापे' (१२९७) दु । दुन्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन दूम आदेशः । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) दूमेति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दूमेइ** । परितापमाप्नोतीत्यर्थः ।

अस्मद् । षष्ठी आम् । 'णे-णो-मज्झ-अम्ह०' (३।११४) अस्मद आमा सह **मज्झ** आदेशः ।

हृदय । 'इत् कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् **हिअयं** ॥२३॥

## धवलेर्दुमः ॥ ८।४।२४ ॥

धवलयतेर्ण्यन्तस्य दुमादेशो वा भवति ॥

दुमइ । धवलइ । 'स्वराणां स्वराः' (४।२३८) - 'बहुलम्' (१।२) इति दीर्घत्वमपि - दूमिअं - धवलितमित्यर्थः ॥

**[ धवलेर्दुमः ]** धवलि षष्ठी ङस् । दुम प्रथमा सि ।

**[ दुमइ ]** धवल । धवलं करोतीति । णिच्प्र० । अनेन दुम० । 'णेरदेदावावे' (३।१४९) णिच्स्थाने अत् । 'लुक्' (१।१०) अलुक् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दुमइ** ।

पक्षे- **[ धवलइ ]** धवलइ । [2]'णेरदेदावावे' (३।१४९) अत् । 'अदेल्लुक्यादे०' (३।१५३) आत्वम् । 'स्वराणां स्वराः' (४।२३८) अत्वम् **धवलइ** ।

**[ दूमिअं ]** दूम । क्तप्र० । 'एच्च क्त्वा०' (३।१५७) ('क्ते' (३।१५६)) इ० **दूमिअं** ॥२४॥

## तुलेरोहामः ॥ ८।४।२५ ॥

तुलेर्ण्यन्तस्य ओहाम इत्यादेशो वा भवति ॥ ओहामइ । तुलइ ॥

**[ तुलेरोहामः ]** तुलि षष्ठी ङस् । ओहाम प्रथमा सि ।

**[ ओहामइ तुलइ ]** ओहामइ । 'तुलण् उन्माने' (१६९२) तुल् । तु(तो)लयतीत्यर्थः ॥२५॥

## विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः ॥ ८।४।२६ ॥

विरेचयतेर्ण्यन्तस्य ओलुण्डादयस्त्रय आदेशा वा भवन्ति ॥ ओलुण्डइ । उल्लुण्डइ । पल्हत्थइ । विरेअइ ॥

**[ विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः ]** विरिचि षष्ठी ङस् । ओलुण्ड-उल्लुण्ड-पल्हत्थ प्रथमा जस् ।

पक्षे- **[ विरेअइ ]** 'रिचण् वियोजने च' (१९५२) रिच्, विपूर्व० । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्स्थाने अत् । 'लोकात्' (१।१।३) विरिच । [3]'स्वराणां स्वराः' (४।२३८) रे० । 'क-ग-च-ज०' (१।१७७) च्लुक् **विरेअइ** ॥२६॥

## तडेराहोड-विहोडौ ॥ ८।४।२७ ॥

तडेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ आहोडइ । विहोडइ । पक्षे-ताडेइ ॥

---

१. सूत्रे दूङ इत्युक्तत्वात् 'दूङ्च् परितापे' (१२४३) धातोर्ग्रहणं सम्यक् प्रतिभाति । २. G. णेरत्वे बाहुलकात् 'अदेल्लुक्यादे०' (३।१५३) न । 'स्वराणां स्वराः' (४।२३८) पुनरत्वम् । ३. G. 'युवर्णस्य गुणः' (४।२३७) ए० ।

**[ तडेराहोड-विहोडौ ]** तडि षष्ठी ङस् । आहोड-विहोड प्रथमा औ ।

पक्षे- **[ ताडेइ ]** 'तडण् आघाते' (१६२६) तड् । णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → एत्० । 'लोकात्' (१।१।३) तडे० । 'अदेल्लुक्यादे०' (३।१५३) त० → ता० **ताडेइ** ॥२७॥

## मिश्रेर्वीसाल-मेलवौ ॥ ८।४।२८ ॥

मिश्रयतेर्ण्यन्तस्य वीसाल-मेलव इत्यादेशौ वा भवतः ॥ वीसालइ । मेलवइ । मिस्सइ ॥

**[ मिश्रेर्वीसाल-मेलवौ ]** मिश्रि षष्ठी ङस् । वीसाल-मेलव प्रथमा औ ।

पक्षे- **[ मिस्सइ ]** मिश्र इति नामधातुः । मिश्रं करोतीति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) मिश्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-श्श० । 'श-षोः सः' (१।२६०) स्स० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मिस्सइ** ॥२८॥

## उद्धूलेर्गुण्ठः ॥ ८।४।२९ ॥

उद्धूलेर्ण्यन्तस्य गुण्ठ इत्यादेशो वा भवति ॥ गुण्ठइ । पक्षे- उद्धूलेइ ॥

**[ उद्धूलेर्गुण्ठः ]** उद्धूलि षष्ठी ङस् । गुण्ठ प्रथमा सि ।

पक्षे- **[ उद्धूलेइ ]** उत्पूर्व० धूलिः । धूलिमुत्क्षिपतीति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → एत्० । 'लुक्' (१।१०) इलुक् **उद्धूलेइ** ॥२९॥

## भ्रमेस्तालिअण्ट-तमाडौ ॥ ८।४।३० ॥

भ्रमयतेर्ण्यन्तस्य तालिअण्ट-तमाड इत्यादेशौ वा भवतः ॥

तालिअण्टइ । तमाडइ । भामेइ । भमाडेइ । भमावेइ ॥

**[ भ्रमेस्तालिअण्ट-तमाडौ ]** भ्रमि षष्ठी ङस् । तालिअण्ट-तमाड प्रथमा औ ।

पक्षे- **[ भामेइ भमाडेइ भमावेइ ]** 'भ्रमू चलने' (९७०) भ्रम् । भ्रमन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'अदेल्लुक्यादेरत आः' (३।१५३) भ्र० → भ्रा० । 'सर्वत्र०' (२।७९) र्लुक् भामेइ । पक्षे -'भ्रमेराडो वा' (३।१५१) णिग्० → आड० । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) एत्त्वं - **भमाडेइ** । तृतीये 'णेरदेदावावे' (३।१४९) णिग्० → आवे० **भमावेइ** ॥३०॥

## नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः ॥ ८।४।३१ ॥

नशेर्ण्यन्तस्य एते पञ्चादेशा वा भवन्ति ॥

विउडइ । नासवइ । हारवइ । विप्पगालइ । पलावइ । पक्षे - नासइ ॥

**[ नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः ]** नशि षष्ठी ङस् । विउड-नासव-हारव-विप्पगाल-पलाव प्रथमा जस् ।

पक्षे- **[ नासइ ]** 'नशौच् अदर्शने' (१२०२) नश् । नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'अदेल्लुक्यादे०' (३।१५३) आ-न० → ना० **नासइ** ॥३१॥

## दृशेर्दाव-दंस-दक्खवाः ॥ ८।४।३२ ॥

दृशेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ दावइ । दंसइ । दक्खवइ । दरिसइ ॥

**[ दृशेर्दाव-दंस-दक्खवाः ]** दृशि षष्ठी ङस् । दाव-दंस-दक्खव प्रथमा जस् ।

पक्षे- **[ दरिसइ ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) दृश० । 'वृषादीनामरिः' (४।२३५) दृ० → दरि० । 'श-षोः सः' (१।२६०) श० → स० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दरिसइ** ॥३२॥

## उद्घटेरुग्गः ॥ ८।४।३३ ॥

उत्पूर्वस्य घटेर्ण्यन्तस्य उग्ग इत्यादेशो वा भवति ॥ उग्गइ । उग्घाडइ ॥

**[ उद्घटेरुग्गः ]** उद्घटि षष्ठी ङस् । उग्ग प्रथमा सि ।

पक्षे- **[ उग्घाडइ ]** उद्पूर्व० 'घटिष् चेष्टायाम्' (१०००) घट् । उद्घटमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) उद्घट० । 'अदेल्लुक्यादे०' (३।१५३) घ० → घा० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं - घ्घा० । 'द्वितीय-तुर्ययो०' (२।९०) घ्० → ग्० । 'टो डः' (१।१९५) ट० → ड० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **उग्घाडइ** ॥३३॥

## स्पृहः सिहः ॥ ८।४।३४ ॥

स्पृहो ण्यन्तस्य सिह इत्यादेशो भवति ॥ सिहइ ॥

**[ स्पृहः सिहः ]** स्पृह् षष्ठी ङस् । सिह प्रथमा सि ।

**[ सिहइ ]** 'स्पृहण् ईप्सायाम्' (१९२८) स्पृह । स्पृहयन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अनेन णिग्सहितस्य स्पृहः सिह आदेशः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सिहइ** । स्पृहयतीत्यर्थः ॥३४॥

## सम्भावेरासंघः ॥ ८।४।३५ ॥

सम्भावयतेरासंघ इत्यादेशो वा भवति ॥ आसंघइ । सम्भावइ ॥

**[ सम्भावेरासंघः ]** सम्भावि षष्ठी ङस् । आसंघ प्रथमा सि ।

पक्षे- **[ सम्भावइ ]** 'भू सत्तायाम्' (१) भू, सम्पूर्व० । सम्भवति कश्चित्, तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'उवर्ण०' (४।२३३) भव० । 'णेरदेदावावे' (३।१४९) अत् । 'अदेल्लु०' (३।१५३) भ० → भा० । 'लोकात्' (१।१।३) सम्भाव । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सम्भावइ** । सम्भावनां करोतीत्यर्थः ॥३५॥

## उन्नमेरुत्थंघोल्लाल-गुलुगुञ्छोप्पेलाः ॥ ८।४।३६ ॥

उत्पूर्वस्य नमेर्ण्यन्तस्य एते चत्वार आदेशा वा भवन्ति ॥

उत्थंघइ । उल्लालइ । गुलुगुञ्छइ । उप्पेलइ । उन्नावइ ॥

**[ उन्नमेरुत्थंघोल्लाल-गुलुगुञ्छोप्पेलाः ]** उन्नमि षष्ठी ङस् । उत्थंघ-उल्लाल-गुलुगुञ्छ-उप्पेल प्रथमा जस् ।

पक्षे- **[ उन्नावइ ]** उत्पूर्व० 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । उन्नमन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'रुद-नमोर्वः' (४।२२६) मस्य वः । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'लोकात्' (१।१।३) उन्नव० । 'अदेल्लुक्यादे०' (३।१५२) आत्वम्-न० → ना० **उन्नावइ** । ऊर्ध्वं भवतीत्यर्थः ॥३६॥

## प्रस्थापेः पट्ठव-पेण्डवौ ॥ ८।४।३७ ॥

प्रपूर्वस्य तिष्ठतेर्ण्यन्तस्य पट्ठव-पेण्डव इत्यादेशौ वा भवतः ॥ पट्ठवइ । पेण्डवइ । पट्ठावइ ॥

**[ प्रस्थापेः पट्ठव-पेण्डवौ ]** प्रस्थापि षष्ठी ङस् । पट्ठव-पेण्डव प्रथमा औ ।

पक्षे- **[ पट्ठावइ ]** प्रपूर्व० स्था । प्रतिष्ठमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोन्तः । 'स्थष्ठा-थक्क०' (४।१६) स्था० → ठा० । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वठस्य टः । 'स्वरादनतो वा' (४।२४०) अत् । 'लुक्' (१।१०) णिग्लोपः । अथवा 'णेरदेदावावे' (३।१४९) आव० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पट्ठावइ** । चालयतीत्यर्थः ॥३७॥

## विज्ञपेर्वोक्का-ऽवुक्कौ ॥ ८।४।३८ ॥

विपूर्वस्य जानातेर्ण्यन्तस्य वोक्क-अवुक्क इत्येतावादेशौ वा भवतः ॥ वोक्कइ । अवुक्कइ । विण्णवइ ॥

**[ विज्ञपेर्वोक्का-ऽवुक्कौ ]** विज्ञपि षष्ठी ङस् । वोक्क-अवुक्क प्रथमा औ ॥

पक्षे- **[ विण्णवइ ]** विपूर्व० 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । [1]विजानन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → आव० । 'स्वराणां स्वराः' (४।२३८) ज्ञा० → ज्ञ० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य ण० । 'अनादौ०' (२।८९) णस्य द्वित्वम् । वर्त्त० तिव् । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) विण्णवति 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **विण्णवइ** । विज्ञपयतीत्यर्थः ॥३८॥

## अर्पेरल्लिव-चच्चुप्प-पणामाः ॥ ८।४।३९ ॥

अपेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति ॥ अल्लिवइ । चच्चुप्पइ । पणामइ । पक्षे-अप्पेइ ॥

**[ अर्पेरल्लिव-चच्चुप्प-पणामाः ]** अर्पि षष्ठी ङस् । अल्लिव-चच्चुप्प-पणाम प्रथमा जस् ।

पक्षे- **[ अप्पेइ ]** 'ऋं प्रापणे च' (२६) ऋ । 'ऋंक् गतौ' (११३५) ऋ । ऋच्छति-इयर्ति वा कश्चित्, तं ऋच्छन्तं इयृन्तं वा अन्यः प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । 'पुस्-पौ' (४।३।३) अर् । अर्प इति जाते 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) अर्पे० । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - प्पे० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **अप्पेइ** । अर्प्पयतीत्यर्थः ॥३९॥

## यापेर्जवः ॥ ८।४।४० ॥

[2]यापेर्ण्यन्तस्य जव इत्यादेशो वा भवति ॥ जवइ । जावेइ ॥

**[ यापेर्जवः ]** यापि षष्ठी ङस् । जव प्रथमा सि ।

---

१. E. विजानानं । २. C. M. याते ।

पक्षे- **[ जावेइ ]** 'यांक् प्रापणे' (१०६२) या । यान्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'पो वः' (१।२३१) पे० → वे० । 'आदेर्यो जः' (१।२४५) या० → जा० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जावेइ** । यापयतीत्यर्थः ॥४०॥

## प्लावेरोम्वाल-पव्वालौ ॥ ८।४।४१ ॥

प्लवतेर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओम्वालइ । पव्वालइ । पावेइ ॥

**[ प्लावेरोम्वाल-पव्वालौ ]** प्लावि षष्ठी ङस् । ओम्वाल-पव्वाल प्रथमा औ ।

**पक्षे- [ पावेइ ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - प्रुंङ् (५९७) - 'प्लुंङ् गतौ' (५९८) प्लु । प्लवमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'उवर्णस्यावः' (४।२३३) प्लु० → प्लव० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) प्लवे० । 'अदेल्लुक्यादे०' (३।१५२) आ० - प्ल० → प्ला० । 'सर्वत्र०' (२।७९) ल्लुक् **पावेइ** । प्लावयतीत्यर्थः ॥४१॥

## विकोशेः पक्खोडः ॥ ८।४।४२ ॥

विकोशयतेर्नामधातोर्ण्यन्तस्य पक्खोड इत्यादेशो वा भवति ॥ पक्खोडइ । विकोसइ ॥

**[ विकोशेः पक्खोडः ]** विकोशि षष्ठी ङस् । पक्खोड प्रथमा सि ।

**पक्षे- [ विकोसइ ]** विकोश इति नामधातुः । विकोशं करोतीति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लुक्' (१।१०) अलुक् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'श-षोः सः' (१।२६०) श० → स० **विकोसइ** ॥४२॥

## रोमन्थेरोग्गाल-वग्गोलौ ॥ ८।४।४३ ॥

रोमन्थेर्नामधातोर्ण्यन्तस्य एतावादेशौ वा भवतः ॥ ओग्गालइ । वग्गोलइ । रोमन्थइ ॥

**[ रोमन्थेरोग्गाल-वग्गोलौ ]** रोमन्थि षष्ठी ङस् । ओग्गाल-वग्गोल प्रथमा औ ।

**पक्षे- [ रोमन्थइ ]** रोमन्थ इति नामधातुः । रोमन्थं करोतीति । णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लुक्' (१।१०) अलुक् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रोमन्थइ** ॥४३॥

## कमेर्णिहुवः ॥ ८।४।४४ ॥

कमेः स्वार्थण्यन्तस्य णिहुव इत्यादेशो वा भवति ॥ णिहुवइ । कामेइ ॥

**[ कमेर्णिहुवः ]** कमि षष्ठी ङस् । णिहुव प्रथमा सि ।

**पक्षे- [ कामेइ ]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः क० → का० । 'णेरदेदावावे' (३।१४९) णिङ्० → एत्० । 'लोकात्' (१।१।३) कामे । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **कामेइ** । वाञ्छां करोतीत्यर्थः ॥४४॥

## प्रकाशेर्णुव्वः ॥ ८।४।४५ ॥

प्रकाशेर्ण्यन्तस्य णुव्व इत्यादेशो वा भवति ॥ णुव्वइ । पयासेइ ॥

**[ प्रकाशेर्णुव्वः ]** प्रकाशि षष्ठी ङस् । णुव्व प्रथमा सि ।

**पक्षे- [ पयासेइ ]** प्रकाशं करोतीति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । **'णेरदेदावावे'** (३।१४९) णिच्० → एत्० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) प्रकाशे । वर्त्त० तिव् । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) क्लुक् । **'अवर्णो यश्रुतिः'** (१।१८०) आ० → या० । 'श-षोः सः' (१।२६०) शे० → से० **पयासेइ** ॥४५॥

## कम्पेर्विच्छोलः ॥ ८।४।४६ ॥

कम्पेर्ण्यन्तस्य विच्छोल इत्यादेशो वा भवति ॥ विच्छोलइ । कम्पेइ ॥

**[ कम्पेर्विच्छोलः ]** कम्पि षष्ठी ङस् । विच्छोल प्रथमा सि ।

**पक्षे- [ कम्पेइ ]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) **कम्प्** । **कम्पमानं प्रयुङ्क्ते** । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । **'लोकात्' (१।१।३) कम्पे** । वर्त्त० तिव् । 'त्यादीना०' (३।१३९) तिव्० → इ० **कम्पेइ** ॥४६॥

## आरोपेर्वलः ॥ ८।४।४७ ॥

[1]आरोपेर्ण्यन्तस्य वल इत्यादेशो वा भवति ॥ वलइ । आरोवेइ ॥

**[ आरोपेर्वलः ]** आरोपि षष्ठी ङस् । वल प्रथमा सि ।

**पक्षे- [ आरोवेइ ]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहति तरुस्तमन्यः प्रयुङ्क्ते । **'प्रयोक्तृ०'** (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) आरुहे । **'रुहः पः'** (४।२।१४) **पोऽन्तः** । 'युवर्णस्य गुणः' (४।२३७) रु० → रो० । 'पो वः' (१।२३१) पे० → **वे० आरोवेइ** । **आरोपयतीत्यर्थः** ॥४७॥

## दोले रङ्खोलः ॥ ८।४।४८ ॥

दुलेः स्वार्थे ण्यन्तस्य रङ्खोल इत्यादेशो वा भवति ॥ रङ्खोलइ । दोलेइ ॥

**[ दोले रङ्खोलः ]** दोलि षष्ठी ङस् । रङ्खोल प्रथमा सि ।

पक्षे- **[ दोलेइ ]** 'दुलण् उत्क्षेपे'(१६९३) दुल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । **'णेरदेदावावे'** (३।१४९) णिच्० → एत्० । 'युवर्णस्य गुणः' (४।२३७) दु० → दो० । 'लोकात्' (१।१।३) दोले० । **वर्त्त० तिव्** । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **दोलेइ** ॥४८॥

## रञ्जे रावः ॥ ८।४।४९ ॥

रञ्जेर्ण्यन्तस्य राव इत्यादेशो वा भवति ॥ रावेइ । रञ्जेइ ॥

**[ रञ्जे रावः ]** रञ्जि षष्ठी ङस् । राव प्रथमा सि ।

पक्षे- **[ रञ्जेइ ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजमानं प्रयुङ्क्ते । **'प्रयोक्तृव्यापारे णिग्'** (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) रञ्जे० । **वर्त्त० तिव्** । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **रञ्जेइ** ॥४९॥

## घटेः परिवाडः ॥ ८।४।५० ॥

घटेर्ण्यन्तस्य परिवाड इत्यादेशो वा भवति ॥ परिवाडेइ । घडेइ ॥

---

१. H. J. M. आरुहे० ।

**[ घटेः परिवाडः ]** घटि षष्ठी ङस् । परिवाड प्रथमा सि ।

**पक्षे- [ घडेइ ]** 'घटिष् चेष्टायाम्' (१०००) घट् । घटमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'टो डः' (१।१९५) ट० → ड० । 'लोकात्' (१।१।३) घडे० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **घडेइ** ।।५०।।

## वेष्टेः परिआलः ॥ ८।४।५१ ॥

वेष्टेर्ण्यन्तस्य परिआल इत्यादेशो वा भवति ॥ परिआलेइ । वेढेइ ॥

**[ वेष्टेः परिआलः ]** वेष्टि षष्ठी ङस् । परिआल प्रथमा सि ।

**पक्षे- [ वेढेइ ]** 'वेष्टि वेष्टने' (६७३) वेष्ट् । वेष्टते कश्चित् तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'णेरदेदावावे' (३।१४९) णिग्० → एत्० । 'लोकात्' (१।१।३) वेष्टे० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । ' ठो ढः' (१।१९९) ठे० → ढे० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वेढेइ** ।।५१।।

## क्रियः किणो वेस्तु क्के च ॥ ८।४।५२ ॥

णेरिति निवृत्तम् । क्रीणातेः किण इत्यादेशो भवति । वेः परस्य तु द्विरुक्तः केश्चकारात् किणश्च भवति ॥

किणइ विक्केइ विक्किणइ ॥

**[ क्रियः किणो वेस्तु क्के च ]** क्री-क्रिय् षष्ठी ङस् । किण प्रथमा सि । वि पञ्चमी ङसि । तु प्रथमा सि । क्के प्रथमा सि । च प्रथमा सि । विक्रीणातीत्यर्थः ।।५२।।

## भियो भा-बीहौ ॥ ८।४।५३ ॥

बिभेतेरेतावादेशौ भवतः ॥ भाइ । भाइअं । बीहइ । बीहिअं ॥ बहुलाधिकारात् भीओ ॥

**[ भियो भा-बीहौ ]** भी-भिय् षष्ठी ङस् । भा-बीह प्रथमा औ ।

**[ भाइअं ]** 'ञिभींक् भये' (११३२) भी । अनेन भी० → भा० । अत्र क्तप्रत्यये 'स्वरादनतो वा' (४।२४०) अत् । 'क्ते' (३।१५६) इत्वम् **भाइअं** ।

**[ बीहिअं ]** भी । अनेन बीह० । अत्र क्तप्रत्यये 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'क्ते' (३।१५६) इ० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) बीहित० । 'क-ग-च-ज०' (१।१७७) त्लुक् **बीहिअं** ।।५३।।

## आलीङोऽल्ली ॥ ८।४।५४ ॥

आलीयतेः अल्ली इत्यादेशो भवति ॥ [१]अल्लिअइ । अल्लीणो ॥

**[ आलीङोऽल्ली ]** आलीङ् षष्ठी ङस् । अल्ली प्रथमा सि ।

**[ अल्लिअइ ]** 'लींङ्च् श्लेषणे' (१२४८) ली, आङ्पूर्व० । 'स्वरादनतो वा' (४।२४०) अत् । अनेन अल्ली० । 'स्वराणां स्वराः' (४।२४०) आल्लि० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अल्लिअइ** । आश्लेषं करोतीत्यर्थः ।

**[ अल्लीणो ]** अत्र क्तप्रत्यये 'क्तेनाऽप्फुण्णादयः' (४।२५८) तस्य न० । 'नो णः' (१।२२८) न० → ण० **अल्लीणो** ।।५४।।

---

१. I. J. अल्लियइ ।

**निलीङेर्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्काः ॥ ८।४।५५ ॥**

निलीङ एते षडादेशा वा भवन्ति ॥

णिलीअइ । णिलुक्कइ । णिरिग्घइ । लुक्कइ । लिक्कइ । ल्हिक्कइ । निलिज्जइ ॥

[ **निलीङेर्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्काः** ] निलीङि षष्ठी ङस् । णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्क प्रथमा जस् ।

**पक्षे-** [ **निलिज्जइ** ] 'लीङ्च् श्लेषणे' (१२४८) ली, निपूर्व० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य। 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'स्वराणां स्वराः' (४।२३८) ली० → लि० **निलिज्जइ** ॥५६॥

**विलीङेर्विरा ॥ ८।४।५६ ॥**

विलीङेर्विरा इत्यादेशो वा भवति ॥ विराइ । विलिज्जइ ॥

[ **विलीङेर्विरा** ] विलीङि षष्ठी ङस् । विरा प्रथमा सि ।

पक्षे- [ **विलिज्जइ** ] 'लीङ्च् श्लेषणे' (१२४८) ली, विपूर्व० । वर्त्त० ते । **'मध्ये च स्वरान्ताद्वा'** (३।१७८) ज्ज आगमः । 'स्वराणां स्वराः' (४।२३८) ली० → लि० **विलिज्जइ** ॥५६॥

**रुके[1] रुञ्ज-रण्टौ ॥ ८।४।५७ ॥**

रौतेरेतावादेशौ वा भवतः ॥ रुञ्जइ । रण्टइ । रवइ ॥

[ **रुके रुञ्ज-रण्टौ** ] रुकि षष्ठी ङस् । रुञ्ज-रण्ट प्रथमा औ ।

**पक्षे-** [ **रवइ** ] टुक्षु-'रु शब्दे' (१०८५) रु । वर्त्त० तिव् । 'स्वरादनतो वा' (४।२४०) अत् । **'उवर्ण०'** (४।२३३) अव० **रवइ** ॥५७॥

**श्रुटेर्हणः ॥ ८।४।५८ ॥**

शृणोतेर्हण इत्यादेशो वा भवति ॥ हणइ । सुणइ ॥

[ **श्रुटेर्हणः** ] श्रुटि षष्ठी ङस् । हण प्रथमा सि ।

**पक्षे-** [ **सुणइ** ] 'श्रुंट् श्रवणे' (१२९६) श्रु । वर्त्त० तिव् । 'चि-जि-श्रु-हु-स्तु-लू-पू-धूगां **णो ह्रस्वश्च'** (४।२४१) ण आगमः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० **सुणइ** ॥५८॥

**धूगेर्धुवः ॥ ८।४।५९ ॥**

धुनातेर्धुव इत्यादेशो वा भवति ॥ धुवइ । धुणइ ॥

[ **धूगेर्धुवः** ] धूगि षष्ठी ङस् । धुव प्रथमा सि ।

**पक्षे-** [ **धुणइ** ] 'धूग्ट् कम्पने' (१२९१) धू । वर्त्त० तिव् । 'चि-जि-श्रु-हु०' (४।२४१) ण आगमः- पूर्वस्य च ह्रस्वः **धुणइ** ॥५९॥

---

१. ।. रौतेः ।

## भुवेर्हो-हुव-हवाः ॥ ८।४।६० ॥

[1]भुवेर्धातोर्हो-हुव-हव इत्येते आदेशा वा भवन्ति ॥

होइ । होन्ति । हुवइ । हुवन्ति । हवइ । हवन्ति । पक्षे - भवइ । परिहीण-विहवो । भविउं । पभवइ । परिभवइ । संभवइ । क्वचिदन्यदपि-उब्भुअइ भुत्तं[2] ।

**[ भुवेर्हो-हुव-हवाः ]** भुवि षष्ठी ङस् । हो-हुव-हव प्रथमा जस् ।

**पक्षे- [ भविउं ]** 'भू सत्तायाम्' (१) भू । तुम्प्र० । 'उवर्णस्याऽवः' (४।२३३) उ० → अव० - भव० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भवतुम् । 'एच्च क्त्वा-तुम्०' (३।१५७) इ०-व० → वि० । 'क-ग-च-ज०' (१।१७७) त्लुक् **भविउं** । क्वचिदन्यदेवादेशः स्यात्-

**[ उब्भुअइ भुत्तं ]** उत्पूर्व० भू । अत्र भुअ आदेशः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - भ्भुअ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **उब्भुअइ** इत्यादेशः ॥६०॥

## अविति हुः ॥ ८।४।६१ ॥

विद्वर्जे प्रत्यये भुवो हु इत्यादेशो वा भवति ॥ हुन्ति । भवन् → हुन्तो । अवितीति किम् ? होइ ॥

**[ अविति हुः ]** अवित् सप्तमी ङि । हु प्रथमा सि ।

**[ हुन्ति ]** 'भू सत्तायाम्' (१) भू । वर्त्त० अन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० । अनेन भू० → हु० **हुन्ति** ।

**[ हुन्तो ]** भू । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत्० । 'शत्रानशः' (३।१८१) अत्० → न्त० । अनेन भू० → हु० **हुन्तो** ।

पक्षे- **[ होइ ]** भू । वर्त्त० तिव् । 'भुवेर्हो०' (४।६०) भू० → हो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **होइ** ॥६१॥

## पृथक्-स्पष्टे णिव्वडः ॥ ८।४।६२ ॥

पृथग्भूते स्पष्टे च कर्तरि भुवो णिव्वड इत्यादेशो भवति ॥ णिव्वडइ । पृथक् स्पष्टो वा भवतीत्यर्थः ॥

**[ पृथक्-स्पष्टे णिव्वडः ]** पृथक्-स्पष्ट सप्तमी ङि । णिव्वड प्रथमा सि ।

**[ णिव्वडइ ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । अनेन भू० → णिव्वड इति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **णिव्वडइ** ॥६२॥

## प्रभौ हुप्पो वा ॥ ८।४।६३ ॥

प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो वा भवति ॥

प्रभुत्वं च प्रपूर्वस्यैवार्थः । अङ्गे च्चिअ न पहुप्पइ । पक्षे-पभवेइ ॥

---

१. H. M. भुवो० । २. H. I. J. भत्तं ।

**[ प्रभौ हुप्पो वा ]** प्रभु सप्तमी ङि । हुप्प प्रथमा सि । वा प्रथमा सि ।

प्रभुत्वस्य त्वर्थः प्रपूर्वेणैव ज्ञायते ।

**पक्षे- [ पभवेइ ]** प्रपूर्व० 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'उवर्णस्याऽवः' (४।२३३) भू० → भव० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रभवति । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) व० → वे० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पभवेइ** ॥६३॥

## क्ते हूः ॥ ८।४।६४ ॥

भुवः क्तप्रत्यये हूरादेशो भवति ॥ हूअं । अणुहूअं । पहूअं ॥

**[ क्ते हूः ]** क्त सप्तमी ङि । हू प्रथमा सि ॥६४॥

## कृगेः कुणः ॥ ८।४।६५ ॥

कृगः कुण इत्यादेशो वा भवति ॥ कुणइ । करेइ ॥

**[ कृगेः कुणः ]** कृगि षष्ठी ङस् । कुण प्रथमा सि ।

पक्षे- [1]**[ करइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'स्वरादनतो वा' (४।२४०) अत् । **'ऋवर्ण०'** (४।२३४) कृ० → कर० । 'लोकात्' (१।१।३) करति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करइ** ॥६५॥

## काणेक्षिते णिआरः ॥ ८।४।६६ ॥

काणेक्षितविषयस्य कृगो णिआर इत्यादेशो वा भवति ॥ णिआरइ । काणेक्षितं करोति ॥

**[ काणेक्षिते णिआरः ]** काण-नरस्य ईक्षितम्-अवलोकनं = काणेक्षितम्, तस्मिन् = काणेक्षिते । सप्तमी ङि । णिआर प्रथमा सि ॥६६॥

## निष्टम्भा-ऽवष्टम्भे णिट्ठुह-संदाणं ॥ ८।४।६७ ॥

निष्टम्भविषयस्याऽवष्टम्भविषयस्य च कृगो यथासंख्यं णिट्ठुह-संदाण इत्यादेशौ वा भवतः ॥

णिट्ठुहइ । निष्टम्भं करोति ॥ संदाणइ । अवष्टम्भं करोति ॥

**[ निष्टम्भा-ऽवष्टम्भे ]** निष्टम्भ-अवष्टम्भ सप्तमी ङि ।

**[ णिट्ठुहइ ]** निश्चितं स्तब्धं करोति ॥६७॥

## श्रमे वावम्फः ॥ ८।४।६८ ॥

श्रमविषयस्य कृगो वावम्फ इत्यादेशो वा भवति ॥ वावम्फइ । श्रमं करोति ॥

**[ श्रमे वावम्फः ]** श्रम सप्तमी ङि । वावम्फ प्रथमा सि ॥६८॥

## मन्युनौष्ठमालिन्ये णिव्वोलः ॥ ८।४।६९ ॥

मन्युना करणेन यदोष्ठमालिन्यं तद्विषयस्य कृगो णिव्वोल इत्यादेशो वा भवति ॥

णिव्वोलइ । मन्युना ओष्ठं मलिनं करोति ॥

---

१. A. B. करेइ ।

[ **मन्युनौष्ठमालिन्ये णिव्वोलः** ] मन्यु तृतीया टा । ओष्ठमालिन्य सप्तमी ङि । णिव्वोल प्रथमा सि ॥६९॥

**शैथिल्य-लम्बने पयल्लः ॥ ८।४।७० ॥**

शैथिल्यविषयस्य लम्बनविषयस्य च कृगः पयल्ल इत्यादेशो वा भवति ॥

पयल्लइ । शिथिलीभवति लम्बते वा ॥

[ **शैथिल्य-लम्बने पयल्लः** ] शैथिल्य-लम्बन सप्तमी ङि । पयल्ल प्रथमा सि ॥७०॥

**निष्पाता-ऽऽच्छोटे णीलुञ्छः ॥ ८।४।७१ ॥**

निष्पतनविषयस्य आच्छोटनविषयस्य च कृगो णीलुञ्छ इत्यादेशो वा भवति ॥

णीलुञ्छइ । निष्पतति आच्छोटयति वा ॥

[ **निष्पाता-ऽऽच्छोटे णीलुञ्छः** ] निष्पाता-ऽऽच्छोट सप्तमी ङि । णीलुञ्छ प्रथमा सि ॥७१॥

**क्षुरे कम्मः ॥ ८।४।७२ ॥**

क्षुरविषयस्य कृगः कम्म इत्यादेशो वा भवति ॥ कम्मइ । क्षुरं करोतीत्यर्थः ॥

[ **क्षुरे कम्मः** ] क्षुर सप्तमी ङि । कम्म प्रथमा सि ॥७२॥

**चाटौ गुललः ॥ ८।४।७३ ॥**

चाटुविषयस्य कृगो गुलल इत्यादेशो वा भवति ॥ गुललइ । चाटु करोतीत्यर्थः ॥

[ **चाटौ गुललः** ] चाटु सप्तमी ङि । गुलल प्रथमा सि ॥७३॥

**स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः ॥ ८।४।७४ ॥**

स्मरेरेते नवादेशा वा भवन्ति ॥

झरइ । झूरइ । भरइ । भलइ । लढइ । विम्हरइ । सुमरइ । पयरइ । पम्हुहइ । सरइ ॥

[ **स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः** ] स्मरि षष्ठी ङस् । झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुह प्रथमा जस् ।

**पक्षे- [ सरइ ]** 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० तिव् । 'अधो म-न-याम्' (२।७८) मलुक् । 'ऋवर्ण०' (४।२३४) सा(स)र० । 'स्वराणां स्वराः' (४।२३८) सर्० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) सरति । 'त्यादीना०' (३।१३९) तिव्० → इ० **सरइ** ॥७४॥

**विस्मुः पम्हुस-विम्हर-वीसराः ॥ ८।४।७५ ॥**

विस्मरतेः एते आदेशा भवन्ति ॥ पम्हुसइ । विम्हरइ । वीसरइ ॥

[ **विस्मुः पम्हुस-विम्हर-वीसराः** ] विस्मृ षष्ठी ङस् । पम्हुस-विम्हर-वीसर प्रथमा जस् ॥७५॥

**व्याहृगेः कोक्क-पोक्कौ ॥ ८।४।७६ ॥**

व्याहरतेरेतावादेशौ वा भवतः ॥ कोक्कइ । ह्रस्वत्वे तु-कुक्कइ । पोक्कइ । पक्षे - वाहरइ ॥

**[ व्याहृगेः कोक्क-पोक्कौ ]** व्याहृगि षष्ठी ङस् । कोक्क-पोक्क प्रथमा औ ।

**पक्षे- [ वाहरइ ]** वि-आङ्पूर्व० 'हृंग् हरणे' (८८५) हृ । वर्त्त० तिव् । **'ऋवर्ण०'** (४।२३४) हृ० → हर० । 'अधो म-न०' (२।७८) य्लुक् **वाहरइ** । जल्पतीत्यर्थः ॥७६॥

## प्रसरेः पयल्लोवेल्लौ ॥ ८।४।७७ ॥

प्रसरतेः पयल्ल-उवेल्ल इत्येतावादेशौ वा भवतः ॥ पयल्लइ । उवेल्लइ । पसरइ ॥

**[ प्रसरेः पयल्लोवेल्लौ ]** प्रसरि षष्ठी ङस् । पयल्ल-उवेल्ल प्रथमा औ ।

**[ पसरइ ]** प्रपूर्व० 'सृं गतौ' (२५) सृ० । वर्त्त० तिव् । 'स्वरादनतो वा' (४।२४०) अत् । **'ऋवर्ण०'** (४।२३४) सर० **पसरइ** ॥७७॥

## महमहो गन्धे ॥ ८।४।७८ ॥

प्रसरतेर्गन्धविषये महमह इत्यादेशो वा भवति ॥

महमहइ मालई । [1]मालइगन्धो पसरइ ॥ गन्ध इति किम् ? पसरइ ॥

**[ महमहो गन्धे ]** महमह प्रथमा सि । गन्ध सप्तमी ङि ।

**[ मालइगन्धो पसरइ ]** अत्र 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) ती० → ति० । **'क-ग-च-ज०'** (१।१७७) त्लुक् ॥७८॥

## [2]निस्सरेर्णीहर-नील-धाड-वरहाडाः ॥ ८।४।७९ ॥

निस्सरतेरेते चत्वार आदेशा वा भवन्ति ॥ णीहरइ । नीलइ । धाडइ । वरहाडइ । नीसरइ ॥

**[ निस्सरेः ]** निःसरि षष्ठी ङस् ।

**[ णीहर-नील-धाड-वरहाडाः ]** णीहर-नील-धाड-वरहाड प्रथमा जस् ।

**पक्षे- [ नीसरइ ]** निर्पूर्व० 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० तिव् । 'निर्दुरोर्वा' (१।१३) र्लुक् । **'लुंकि निरः'** (१।९३) नि० → नी० । 'ऋवर्ण०' (४।२३४) अर० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नीसरइ** ॥७९॥

## जाग्रेर्जग्गः ॥ ८।४।८० ॥

जागर्तेर्जग्ग इत्यादेशो वा भवति ॥ जग्गइ । पक्षे-जागरइ ॥

**[ जाग्रेर्जग्गः ]** जाग्रि षष्ठी ङस् । जग्ग प्रथमा सि ।

**पक्षे- [ जागरइ ]** 'जागृक् निद्राक्षये' (१०९३) जागृ । वर्त्त० तिव् । 'ऋवर्ण०' (४।२३४) अर० **जागरइ** ॥८०॥

## व्याप्रेराअड्डः ॥ ८।४।८१ ॥

व्याप्रियतेराअड्ड इत्यादेशो वा भवति ॥ आअड्डेइ । वावरेइ ॥

**[ व्याप्रेराअड्डः ]** व्याप्रि षष्ठी ङस् । आअड्ड प्रथमा सि ।

---

१. H. I. मालईगन्धो । २. G. निःसरे० ।

**[ आअड्डेइ ]** 'वर्तमाना-पञ्चमी०' (३।१५८) ड्ड० → ड्डे० आअड्डेइ ।

**पक्षे- [ वावरेइ ]** वि-आङ्पूर्व० 'पृंङ्त् व्यायामे' (१४६५) पृ । वर्त्त० ते । 'ऋवर्ण०' (४।२३४) व्यापृ० → व्यापर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) व्यापरते । 'पो वः' (१।२३१) प० → व० । 'अधो म-न०' (२।७८) य्लुक् । 'वर्तमाना-पञ्चमी०' (३।१५८) र० → रे० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वावरेइ** ॥८१॥

## संवृगेः साहर-साहट्टौ ॥ ८।४।८२ ॥

संवृणोतेः साहर-साहट्ट इत्यादेशौ वा भवतः ॥ साहरइ । साहट्टइ । संवरइ ॥

**[ संवृगेः साहर-साहट्टौ ]** संवृगि षष्ठी ङस् । साहर-साहट्ट प्रथमा औ ।

**पक्षे- [ संवरइ ]** 'वृग्ट् वरणे' (१२९४) वृ, सम्पूर्व० । वर्त्त० तिव् । 'ऋवर्ण०' (४।२३४) संवृ० → संवर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) संवरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **संवरइ** ॥८२॥

## आदृङेः सन्नामः ॥ ८।४।८३ ॥

आद्रियतेः सन्नाम इत्यादेशो वा भवति ॥ सन्नामेइ । आदरइ ॥

**[ आदृङेः सन्नामः ]** आदृङि षष्ठी ङस् । सन्नाम प्रथमा सि ।

**पक्षे- [ आदरइ ]** आङ्पूर्व० 'दृंङ्त् आदरे' (१४६६) दृ । वर्त्त० ते । 'ऋवर्ण०' (४।२३४) आदृ० → आदर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) आदरते । 'त्यादीनामा०' (३।१३९) ते० → इ० **आदरइ** ॥८३॥

## प्रहृगेः सारः ॥ ८।४।८४ ॥

प्रहरतेः सार इत्यादेशो वा भवति ॥ सारइ । पहरइ ॥

**[ प्रहृगेः सारः ]** प्रहृगि षष्ठी ङस् । सार प्रथमा सि ।

**पक्षे- [ पहरइ ]** प्रपूर्व० 'हृंग् हरणे' (८८५) हृ । वर्त्त० तिव् । 'ऋवर्ण०' (४।२३४) हृ० → हर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'लोकात्' (१।१।३) पहरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पहरइ** ॥८४॥

## अवतरेरोह-ओरसौ ॥ ८।४।८५ ॥

अवतरतेः ओह-ओरस इत्यादेशौ वा भवतः ॥ ओहइ । ओरसइ । ओअरइ ॥

**[ अवतरेरोह-ओरसौ ]** अवतरि षष्ठी ङस् । ओह-ओरस प्रथमा औ ।

**पक्षे- [ ओअरइ ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ, अवपूर्व० । वर्त्त० तिव् । 'ऋवर्ण०' (४।२३४) तॄ० → तर० । 'व्यञ्जना०' (४।२३९) अत् । 'अवापोते' (१।१७२) अवस्य ओ० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **ओअरइ** ॥८५॥

## शकेश्चय-तर-तीर-पाराः ॥ ८।४।८६ ॥

शक्नोतेरेते चत्वार आदेशा वा भवन्ति ॥

चयइ । तरइ । तीरइ । पारइ । सक्कइ ॥ त्यजतेरपि चयइ । हानिं करोति । तरतेरपि तरइ । तीरयतेरपि तीरइ । पारयतेरपि [1]पारइ । कर्म समाप्नोति ।

**[ शकेश्चय-तर-तीर-पाराः ]** शकि षष्ठी ङस् । चय-तर-तीर-पार प्रथमा जस् ।

**पक्षे- [ सक्कइ ]** 'शक्लृंट् शक्तौ' (१३००) शक् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) शकति । 'शकादीनां द्वित्वम्' (४।२३०) क्क० । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सक्कइ** ।

एतानि चतूरूपाणि आदेशान् विनापि भवन्ति । यथा-

**[ चयइ ]** 'त्यजं हानौ' (१७२) त्यज् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) त्यजति । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'त्योऽचैत्ये' (२।१३) त्य० → च० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चयइ** ॥

**[ तरइ ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । वर्त्त० तिव् । 'ऋवर्णे०' (४।२३४) तॄ० → तर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तरइ** ।

**[ पारइ ]** 'पार कर्मसमाप्तौ' (१९०१) पार । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पारति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पारइ** ॥८६॥

## फक्कस्थक्कः ॥ ८।४।८७ ॥

फक्कतेस्थक्क इत्यादेशो भवति ॥ थक्कइ ॥

**[ फक्कस्थक्कः ]** फक्क् षष्ठी ङस् । थक्क प्रथमा सि ।

**[ थक्कइ ]** 'फक्क नीचैर्गतौ' (५०) फक्क् । वर्त्त० तिव् । अनेन फक्क० → थक्क० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **थक्कइ** ॥८७॥

## श्लाघः सलहः ॥ ८।४।८८ ॥

श्लाघतेः सलह इत्यादेशो भवति ॥ सलहइ ॥

**[ श्लाघः सलहः ]** श्लाघ् षष्ठी ङस् । सलह प्रथमा सि ।

**[ सलहइ ]** 'श्लाघृङ् कत्थने' (६४५) श्लाघ् । वर्त्त० ते । अनेन श्लाघ० → सलह० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **सलहइ** । श्लाघते इत्यर्थः ॥८८॥

## खचेर्वेअडः ॥ ८।४।८९ ॥

खचतेर्वेअड इत्यादेशो वा भवति ॥ वेअडइ । खचइ ॥

**[ खचेर्वेअडः ]** खचि षष्ठी ङस् । वेअड प्रथमा सि ।

**पक्षे- [ खचइ ]** [2]'खचि प्रादुर्भावे' (      ) खच् । वर्त्त० तिव्(ते) । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१३) खचति(ते) । 'त्यादीनामाद्य०' (३।१३९) तिव्०(ते) → इ० **खचइ** ॥८९॥

---

१. H. J. पारेइ । २. G. खचि सौत्रधातुः सम्बन्धार्थः । धा० पा० - खवश् हेठशवत् (भूतप्रादुर्भावे) चान्तोऽयमित्येके । चान्तं धात्वन्तरमित्यन्ये ।

## पचेः सोल्ल-पउलौ ॥ ८।४।९० ॥

पचतेः सोल्ल-पउल इत्यादेशौ वा भवतः ॥ सोल्लइ । पउलइ । पय(च)इ ॥

**[ पचेः सोल्ल-पउलौ ]** पचि षष्ठी ङस् । सोल्ल-पउल प्रथमा औ ।

**पक्षे- [ पय( च )इ ]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पचति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ **पचइ** ॥९०॥

## मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धंसाडाः ॥ ८।४।९१ ॥

मुञ्चतेरेते सप्तादेशा वा भवन्ति ॥

छड्डइ । अवहेडइ । मेल्लइ । उस्सिक्कइ । रेअवइ । णिल्लुञ्छइ । धंसाडइ । पक्षे- मुअइ ॥

**[ मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धंसाडाः ]** मुचि षष्ठी ङस् । छड्ड-अवहेड-मेल्ल-उस्सिक्क-रेअव-णिल्लुञ्छ-धंसाड प्रथमा जस् ।

**पक्षे- [ मुअइ ]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मुचति । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मुअइ** ॥९१॥

## दुःखे णिव्वलः ॥ ८।४।९२ ॥

दुःखविषयस्य मुचेः णिव्वल इत्यादेशो वा भवति ॥ णिव्वलेइ । दुःखं मुञ्चतीत्यर्थः ॥

**[ दुःखे णिव्वलः ]** दुःख सप्तमी ङि । णिव्वल प्रथमा सि ॥९२॥

## वञ्चेर्वेहव-वेलव-जूरवोमच्छाः ॥ ८।४।९३ ॥

वञ्चतेरेते चत्वार आदेशा वा भवन्ति ॥ वेहवइ । वेलवइ । जूरवइ । उमच्छइ । वञ्चइ ॥

**[ वञ्चेर्वेहव-वेलव-जूरवोमच्छाः ]** वञ्चि षष्ठी ङस् । वेहव-वेलव-जूरव-उमच्छ प्रथमा जस् ।

पक्षे- **[ वञ्चइ ]** 'वञ्चिण् प्रलम्भने' (१८०५) वञ्च् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वञ्चते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वञ्चइ** ॥९३॥

## रचेरुग्गहाऽवह-विडविड्डाः ॥ ८।४।९४ ॥

रचेर्धातोरेते त्रय आदेशा वा भवन्ति ॥ उग्गहइ । अवहइ । विडविड्डइ । रयइ ॥

**[ रचेरुग्गहाऽवह-विडविड्डाः ]** रचि षष्ठी ङस् । उग्गह-अवह-विडविड्ड प्रथमा जस् ।

पक्षे- **[ रयइ ]** 'रचण प्रतियत्ने' (१८५३) रच् । वर्त्त० तिव् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) रचति । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रयइ** ॥९४॥

## समारचेरुवहत्थ-सारव-समार-केलायाः ॥ ८।३।९५ ॥

समारचेरेते चत्वार आदेशा वा भवन्ति ॥ उवहत्थइ । सारवइ । समारइ । केलायइ । समारयइ ॥

**[ समारचेरुवहत्थ-सारव-समार-केलायाः ]** समारचि षष्ठी ङस् । उवहत्थ-सारव-समार-केलाय प्रथमा जस् ।

**पक्षे- [ समारयइ ]** सम्-आङ्पूर्व० 'रचण् प्रतियत्ने' (१८५३) रच् । वर्त्त० तिव् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) समारचति । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **समारयइ** ॥९५॥

## सिचेः सिञ्च-सिम्पौ ॥ ८।४।९६ ॥

सिञ्चतेरेतावादेशौ वा भवतः ॥ सिञ्चइ । सिम्पइ । सेअइ ॥

**[ सिचेः सिञ्च-सिम्पौ ]** सिचि षष्ठी ङस् । सिञ्च-सिम्प प्रथमा औ ।

**पक्षे- [ सेअइ ]** 'षिचींत् क्षरणे' (१३२१) षिच् । वर्त्त० तिव् । 'षः सोऽष्ट्यै०' (२।३।९८) षि० → सि० । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) सिचति । 'युवर्णस्य गुणः' (४।२३७) सि० → से० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'त्यादीना०' (३।१३९) तिव्० → इ० **सेयइ**। सिञ्चतीत्यर्थः ॥९६॥

## प्रच्छः पुच्छः ॥ ८।४।९७ ॥

पृच्छतेः पुच्छादेशो भवति ॥ पुच्छइ ॥

**[ प्रच्छः पुच्छः ]** प्रच्छ् षष्ठी ङस् । पुच्छ प्रथमा सि ॥९७॥

## गर्जेर्बुक्कः ॥ ८।४।९८ ॥

गर्जतेर्बुक्क इत्यादेशो वा भवति ॥ बुक्कइ । गज्जइ ॥

**पक्षे- [ गज्जइ ]** 'गर्ज गर्जने(शब्दे)' (१६३) गर्ज् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गर्जति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम्-ज्ज० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गज्जइ** ॥९८॥

## वृषे ढिक्कः ॥ ८।४।९९ ॥

वृषकर्तृकस्य गर्जेर्ढिक्क इत्यादेशो वा भवति ॥ ढिक्कइ । वृषभो गर्जति ॥

**[ वृषे ढिक्कः ]** वृष सप्तमी ङि । ढिक्क प्रथमा सि ॥९९॥

## राजेरग्घ-छज्ज-सह-रीर-रेहाः ॥ ८।४।१०० ॥

राजेरेते पञ्चादेशा वा भवन्ति ॥ अग्घइ । छज्जइ । सहइ । रीरइ । रेहइ । रायइ ॥

**[ राजेरग्घ-छज्ज-सह-रीर-रेहाः ]** राजि षष्ठी ङस् । अग्घ-छज्ज-सह-रीर-रेह प्रथमा जस् ।

**पक्षे- [ रायइ ]** 'राजृग् दीप्तौ' (८९३) राज् । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) राजति । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'त्यादीनामा०' (३।१३९) तिव्०→ इ० **रायइ** ॥१००॥

## मस्जेराउड्ड-णिउड्ड-बुड्ड-खुप्पाः ॥ ८।४।१०१ ॥

मज्जतेरेते चत्वार आदेशा वा भवन्ति ॥ आउड्डइ । णिउड्डइ । बुड्डइ । खुप्पइ । मज्जइ ॥

**[ मस्जेराउड्ड-णिउड्ड-बुड्ड-खुप्पाः ]** मस्जि षष्ठी ङस् । आउड्ड-णिउड्ड-बुड्ड-खुप्प प्रथमा जस् ।

**पक्षे- [ मज्जइ ]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मस्जति । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - ज्ज० । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **मज्जइ** ॥१०१॥

## पुञ्जेरारोल-वमालौ ॥ ८।४।१०२ ॥

पुञ्जेरेतावादेशौ वा भवतः ॥ आरोलइ । वमालइ । पुञ्जइ ॥

**[ पुञ्जेरारोल-वमालौ ]** पुञ्जि षष्ठी ङस् । आरोल-वमाल प्रथमा औ ॥

**पक्षे- [ पुञ्जइ ]** [१]"पुञ्जि सौत्रो धातुः (?) पुञ्ज । पुञ्जं करोतीति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) पुञ्जति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पुञ्जइ** । राशीकरोतीत्यर्थः ॥१०२॥

## लस्जेर्जीहः ॥ ८।४।१०३ ॥

लज्जतेर्जीह इत्यादेशो वा भवति ॥ जीहइ । लज्जइ ॥

**[ लस्जेर्जीहः ]** लस्जि षष्ठी ङस् । जीह प्रथमा सि ।

**पक्षे- [ लज्जइ ]** 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । वर्त्त० ते । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) लस्जते । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वम्-ज्ज० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **लज्जइ** ॥१०३॥

## तिजेरोसुक्कः ॥ ८।४।१०४ ॥

तिजेरोसुक्क इत्यादेशो वा भवति ॥ ओसुक्कइ । तेअणं ॥

**[ तिजेरोसुक्कः ]** तिजि षष्ठी ङस् । ओसुक्क प्रथमा सि ।

**पक्षे- [ तेअणं ]** 'तिजि क्षमा-निशानयोः' (६६७) तिज् । ते(ति)ज्यते इति तेजनम् । अनट्प्र० → अन । 'लोकात्' (१।१।३) तिजन । 'युवर्णस्य गुणः' (४।२३७) ति० → ते० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **तेयणं** ॥१०४॥

## मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः ॥ ८।४।१०५ ॥

मृजेरेते नवादेशा वा भवन्ति ॥

उग्घुसइ । लुञ्छइ । पुञ्छइ । पुंसइ । फुसइ । पुसइ । लुहइ । हुलइ । रोसाणइ । पक्षे-मज्जइ ॥

**[ मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः ]** मृजि षष्ठी ङस् । उग्घुस-लुञ्छ-पुञ्छ-पुंस-फुस-पुस-लुह-हुल-रोसाण प्रथमा जस् ।

**पक्षे- [ मज्जइ ]** 'मृजौक् शुद्धौ' (१०९७) मृज् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) मृजति । 'ऋतोऽत्' (१।१२६) मृ० → म० । 'शकादीनां द्वित्वम्' (४।२३०) द्वित्वम् ज्ज० । 'त्यादी०' (३।१३९) तिव्० → इ० **मज्जइ** । शुद्धिं करोतीत्यर्थः ॥१०५॥

---

१. सौत्रादौ- 'पञ्ज रोधे' ।

## भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः ॥ ८।४।१०६ ॥

भञ्जेरेते नवादेशा वा भवन्ति ॥

वेमयइ । मुसुमूरइ । मूरइ । सूरइ । सूडइ । विरइ । पविरञ्जइ । करञ्जइ । नीरञ्जइ । भञ्जइ ॥

**[ भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जाः ]** भञ्जि षष्ठी ङस् । वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्ज प्रथमा जस् ।

**पक्षे- [ भञ्जइ ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) भञ्जति । 'त्यादीना०' (३।१३९) तिव्० → इ० **भञ्जइ** ॥१०६॥

## अनुव्रजेः पडिअग्गः ॥ ८।४।१०७ ॥

अनुव्रजेः पडिअग्ग इत्यादेशो वा भवति ॥ पडिअग्गइ । अणुवच्चइ ॥

**[ अनुव्रजेः पडिअग्गः ]** अनुव्रजि षष्ठी ङस् । पडिअग्ग प्रथमा सि ।

**पक्षे- [ अणुवच्चइ ]** अनुपूर्व० 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) अनुव्रजति । 'नो णः' (१।२२८) नु० → णु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'व्रज-नृत-मदां च्चः' (४।२२५) जस्य च्च० **अणुवच्चइ** ॥१०७॥

## अर्जेर्विढवः ॥ ८।४।१०८ ॥

अर्जेर्विढव इत्यादेशो वा भवति ॥ विढवइ । अज्जइ ॥

**[ अर्जेर्विढवः ]** अर्जि षष्ठी ङस् । विढव प्रथमा सि ।

**पक्षे- [ अज्जइ ]** 'अर्ज अर्जने' (१४२) अर्ज् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) अर्जति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ज० → ज्ज० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **अज्जइ** ॥१०८॥

## युजो जुञ्ज-जुज्ज-जुप्पाः ॥ ८।४।१०९ ॥

युजो जुञ्ज-जुज्ज-जुप्प इत्यादेशा भवन्ति ॥ जुञ्जइ । जुज्जइ । जुप्पइ ॥

**[ युजो जुञ्ज-जुज्ज-जुप्पाः ]** युज् षष्ठी ङस् । जुञ्ज-जुज्ज-जुप्प प्रथमा जस् ।

**[ जुञ्जइ जुज्जइ जुप्पइ ]** 'युजूंपी योगे' (१४७६) युज् । वर्त्त० तिव् । अनेन **जुञ्ज** इत्याद्यादेशाः ॥१०९॥

## भुजो भुज-जिम-जेम-कम्मा-ऽण्ह-[1]समाण-चमढ-चड्डाः ॥ ८।४।११० ॥

भुज एते अष्टादेशा भवन्ति ॥

[2]भुजइ । जिमइ । जेमइ । कम्मेइ । अण्हइ । समाणइ । चमढइ । चड्डइ ॥

**[ भुजो भुज-जिम-जेम-कम्मा-ऽण्ह-समाण-चमढ-चड्डाः ]** भुज् षष्ठी ङस् । भुज-जिम-जेम-कम्म-अण्ह-समाण-चमढ-चड्ड प्रथमा जस् ॥११०॥

---

१. G. M. सूत्ररचना चमढ-समाण-चड्डाः । २. E. G. H. I. J. भुञ्जइ । पा० म० - भुज० → भुजइ - भुज्जइ-भुञ्जइ ।

## वोपेन कम्मवः ॥ ८।४।१११ ॥

उपेन युक्तस्य भुजेः कम्मव इत्यादेशो वा भवति ॥ कम्मवइ । उवहुञ्जइ ॥

**[ वोपेन कम्मवः ]** वा प्रथमा सि । उप तृतीया टा । कम्मव प्रथमा सि ।

**पक्षे- [ उवहुञ्जइ ]** उपपूर्व० 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) उपभुञ्जति । 'ख-घ-थ-ध-भाम्' (१।१८७) भु० → हु० । 'पो वः' (१।२३१) प० → व० **उवहुञ्जइ** ॥१११॥

## घटेर्गढः ॥ ८।४।११२ ॥

घटतेर्गढ इत्यादेशो वा भवति ॥ गढइ । घडइ ॥

**[ घटेर्गढः ]** घटि षष्ठी ङस् । गढ प्रथमा सि ।

**पक्षे- [ घडइ ]** 'घटिष् चेष्टायाम्' (१०००) घट् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) घटते । 'टो डः' (१।१९५) ट० → ड० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **घडइ** ॥११२॥

## समो गलः ॥ ८।४।११३ ॥

सम्पूर्वस्य घटतेर्गल इत्यादेशो वा भवति ॥ संगलइ । संघडइ ॥

**[ समो गलः ]** सम् षष्ठी ङस् । गल प्रथमा सि ।

पक्षे- **[ संघडइ ]** सम्पूर्व० 'घटिष् चेष्टायाम्' (१०००) घट् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) संघटते । 'टो डः' (१।१९५) ट० → ड० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संघडइ** ॥११३॥

## हासेन स्फुटेर्मुरः ॥ ८।४।११४ ॥

हासेन करणेन यः स्फुटिस्तस्य मुरादेशो वा भवति ॥ मुरइ । हासेन स्फुटति ॥

**[ हासेन स्फुटेर्मुरः ]** हास तृतीया टा । स्फुटि षष्ठी ङस् । मुर प्रथमा सि ॥११४॥

## मण्डेश्चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिक्काः ॥ ८।४।११५ ॥

मण्डतेरेते पञ्चादेशा वा भवन्ति ॥ चिञ्चइ । चिञ्चअइ । चिञ्चिल्लइ । रीडइ । टिविडिक्कइ । मण्डइ ॥

**[ मण्डेश्चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिक्काः ]** मण्डि षष्ठी ङस् । चिञ्च-चिञ्चअ-चिञ्चिल्ल-रीड-टिविडिक्क प्रथमा जस् ।

**पक्षे- [ मण्डइ ]** 'मडु भूषायाम्' (२३१) मड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मण्डति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मण्डइ** । मण्डनं करोतीत्यर्थः ॥११५॥

## तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक्क-णिलुक्क-लुक्कोल्लूराः ॥ ८।४।११६ ॥

तुडेरेते नवादेशा वा भवन्ति ॥

तोडइ । तुट्टइ । खुट्टइ । खुडइ । उक्खुडइ । उल्लुक्कइ । णिलुक्कइ । लुक्कइ । उल्लूरइ । तुडइ ॥

**[ तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक्क-णिलुक्क-लुक्कोल्लूराः ]** तुडि षष्ठी ङस् । तोड-तुट्ट-खुट्ट-खुड-उक्खुड-उल्लुक्क-णिलुक्क-लुक्क-उल्लूर प्रथमा जस् ।

**पक्षे- [ तुडइ ]** 'तुडत् तोडने' (१४४७) तुड् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तुडति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तुडइ** ॥११६॥

## घूर्णो घुल-घोल-घुम्म-पहल्लाः ॥ ८।४।११७ ॥

घूर्णेरिते चत्वार आदेशा भवन्ति ॥ घुलइ । घोलइ । घुम्मइ । पहल्लइ ॥

**[ घूर्णो घुल-घोल-घुम्म-पहल्लाः ]** घूर्ण् षष्ठी ङस् । घुल-घोल-घुम्म-पहल्ल प्रथमा जस् ।

**[ घुलइ-घोलइ-घुम्मइ-पहल्लइ ]** 'घूर्णि भ्रमणे' (७०९) घूर्ण् । वर्त्त० ते । अनेन चत्वार आदेशाः । भ्रमतीत्यर्थः ॥११७॥

## विवृतेर्ढंसः ॥ ८।४।११८ ॥

विवृतेर्ढंस इत्यादेशो वा भवति ॥ ढंसइ । विवट्टइ ॥

**[ विवृतेर्ढंसः ]** विवृति षष्ठी ङस् । ढंस प्रथमा सि ।

**पक्षे- [ विवट्टइ ]** विपूर्व० 'वृतूङ् वर्तने' (९५५) वृत् । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'ऋवर्णस्यारः' (४।२३४) अर० । 'क्वथ-वर्धां ढः' (४।२२०) इत्यत्र कृतगुणस्य वर्ध इति निर्देशात् उपान्त्य ऋतोऽपि गुणः । 'र्तस्याऽधूर्त्तादौ' (२।३०) र्तस्य ट० । 'अनादौ०' (२।८९) द्वित्वं-ट० → ट्ट० **विवट्टइ** ॥११८॥

## क्वथेरट्टः ॥ ८।४।११९ ॥

क्वथेरट्ट इत्यादेशो वा भवति ॥ अट्टइ । कढइ ॥

**[ क्वथेरट्टः ]** क्वथि षष्ठी ङस् । अट्ट प्रथमा सि ।

**पक्षे- [ कढइ ]** 'क्वथे निष्पाके' (९६४) क्वथ् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) क्वथति । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'क्वथ-वर्धां ढः' (४।२२०) थ० → ढ० **कढइ** ॥११९॥

## [1]ग्रन्थो गण्ठः ॥ ८।४।१२० ॥

ग्रन्थेर्गण्ठ इत्यादेशो भवति ॥ गण्ठइ । गण्ठी ॥

**[ ग्रन्थो गण्ठः ]** ग्रन्थ् षष्ठी ङस् । गण्ठ प्रथमा सि ।

**पक्षे- [ गण्ठी ]** 'ग्रन्थश् सन्दर्भे' (१५४८) ग्रन्थ् । ग्रन्थनं = ग्रन्थिः । 'पदि-पठि०' (उणा० ६०७) इप्र० । अनेन गण्ठ आदेशः । प्रथमा सि । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **गण्ठी** ॥१२०॥

## मन्थेर्घुसल-विरोलौ ॥ ८।४।१२१ ॥

मन्थेर्घुसल-विरोल इत्यादेशौ वा भवतः ॥ घुसलइ । विरोलइ । मन्थइ ॥

**[ मन्थेर्घुसल-विरोलौ ]** मन्थि षष्ठी ङस् । घुसल-विरोल प्रथमा औ ।

**पक्षे- [ मन्थइ ]** 'मन्थश् विलोडने' (१५४७) मन्थ् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मन्थति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मन्थइ** ॥१२१॥

## ह्लादेरवअच्छः ॥ ८।४।१२२ ॥

ह्लादतेर्ण्यन्तस्या-ऽण्यन्तस्य च अवअच्छ इत्यादेशो भवति ॥

अवअच्छइ । ह्लादते ह्लादयते वा । इकारो ण्यन्तस्यापि परिग्रहार्थः ॥

**[ ह्लादेरवअच्छः ]** ह्लादि षष्ठी ङस् । अवअच्छ प्रथमा सि ।

---

१. B. C. E. I. J. M. ग्रन्थेर्गण्ठः ।

**[ अवअच्छइ ]** 'ह्लादैङ् सुखे च' (७३८) ह्लाद् । **अवअच्छइ** । ह्लादते इत्यर्थः ॥१२२॥

## नेः सदो मज्जः ॥ ८।४।१२३ ॥

निपूर्वस्य सदो मज्ज इत्यादेशो भवति ॥ [१]अत्ता एत्थ णुमज्जइ ।

**[ नेः सदो मज्जः ]** नि षष्ठी ङस् । सद् षष्ठी ङस् । मज्ज प्रथमा सि ।

उत्तरार्द्धः- एत्थ अहं दिवसयं पलोएसु ।
मा पहिअ ! रत्तिअन्धय ! सेज्जाइ मह णुमज्जहिसि ॥

अस्यार्थः - श्वश्रूरत्र निषीदति, अत्राहं निषीदामि, त्वं दिवसे प्रलोकय, हे रात्र्यन्धक ! हे पथिक ! मम शय्यायां मा निषत्स्यसि-मा पतिष्यसि इत्यर्थः ॥

**[ अत्ता एत्थ णुमज्जइ ]** श्वश्रु । 'गोणादयः' (२।१७४) अत्ता आदेशः । अथवा **अत्ता** इति शब्दः श्वश्रूवाचकः ।

अत्र । 'त्रपो हि-ह-त्थाः' (२।१६१) त्रस्य त्थः । सप्तमी ङि । 'अव्ययस्य' (३।२।७) ङिलुप् । 'एच्छय्यादौ' (१।५७) अ० → ए० **एत्थ** ।

निपूर्व० 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै०' (२।३।९८) सद् । 'द्विन्योरुत्' (१।९४) नि० → नु० । 'नो णः' (१।२२८) नु० → णु० । अनेन मज्ज आदेशः । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **णुमज्जइ** ॥१२३॥

## छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ॥ ८।४।१२४ ॥

छिदेरेते षडादेशा वा भवन्ति ॥

दुहावइ । णिच्छल्लइ । णिज्झोडइ । णिव्वरइ । णिल्लूरइ । लूरइ । पक्षे - छिन्दइ ॥

**[ छिदेः ]** छिदि षष्ठी ङस् ।

**[ दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ]** दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूर प्रथमा जस् ।

**पक्षे- [ छिन्दइ ]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । वर्त्त० तिव् । 'छिदि-भिदो न्दः' (४।२१६) छिद्० → छिन्द० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) छिन्दति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **छिन्दइ** ॥१२४॥

## आङा ओअन्दोद्दालौ ॥ ८।४।१२५ ॥

आङा युक्तस्य छिदेरोअन्द-उद्दाल इत्यादेशौ वा भवतः ॥ ओअन्दइ । उद्दालइ । अच्छिन्दइ ॥

**[ आङा ओअन्दोद्दालौ ]** आङ् तृतीया टा । ओअन्द-उद्दाल प्रथमा औ ।

**पक्षे- [ अच्छिन्दइ ]** आङ्पूर्व० 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छिन्दइ पूर्ववत् । 'तैलादौ' (२।९८) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अच्छिन्दइ** ॥१२५॥

---

१. **अत्ता एत्थ णिमज्जइ** एत्थ अहं दिवसअं पलोएहि । मा पहिअ ! रत्तिअन्धअ ! सेज्जाए मह णिमज्जहिसि ॥
[का० प्र० - ५।१३६ । शृ० प्र० - ७।१६८ । स० क० - प्रथमोल्लासः । ध्व० लो० - प्रथमोद्योतः]
श्वश्रूरत्र निमज्जति-शेते अत्राऽहं दिवसकं प्रलोकय । मा पथिक ! रात्र्यन्धक ! शय्यायामावयोर्निमङ्[४]क्ष्यसि ॥
१. पाठां० - ध्व० लो० ० शृ० प्र० - णुमज्जइ । २. का० प्र०- दिअसए । ३. ध्व० लो०- पलोएसु । ४. स० क०- शयिष्ठाः । ध्व० लो० - शेष्यसे ।

**एत्थ णिमज्जइ अत्ता** एत्थ अहं एत्थ परिअणो सअलो । पन्थिअ ! रत्तीअन्धअ ! मा अहं सअणे णिमज्जिहिसि ॥
[गा० स० - ७।६७]
अत्र निमज्जति श्वश्रूरत्राऽहमत्र परिजनः सकलः । पथिक ! रात्र्यन्धक ! मा मम शयने निमङ्क्ष्यसि ॥

## मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः ॥ ८।४।१२६ ॥

मृद्नातेरेते सप्तादेशा भवन्ति ॥ मलइ । मढइ । परिहट्टइ । खड्डइ । चड्डइ । मड्डइ । पन्नाडइ ॥

**[ मृदो मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडाः ]** मृद् षष्ठी ङस् । मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाड प्रथमा जस् ।

**[ मलइ-मढइ-परिहट्टइ-खड्डइ-चड्डइ-मड्डइ-पन्नाडइ ]** 'मृदश् क्षोदे' (१५५०) मृद् । अनेन सप्तादेशाः । मृद्नातीत्यर्थः ॥१२६॥

## स्पन्देश्चुलुचुलः ॥ ८।४।१२७ ॥

स्पन्देश्चुलुचुल इत्यादेशो वा भवति ॥ चुलुचुलइ । फन्दइ ॥

**[ स्पन्देश्चुलुचुलः ]** स्पन्दि षष्ठी ङस् । चुलुचुल प्रथमा सि ।

**पक्षे- [ फन्दइ ]** 'स्पदुङ् किञ्चिच्चलने' (७२९) स्पद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः- स्पन्द् । 'ष्प-स्पयोः फः' (२।५३) स्प० → फ० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) फन्दते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **फन्दइ** ॥१२७॥

## निरः पदेर्वलः ॥ ८।४।१२८ ॥

निर्पूर्वस्य पदेर्वल इत्यादेशो वा भवति ॥ निव्वलइ । निप्पज्जइ ॥

**[ निरः पदेर्वलः ]** निर् पञ्चमी ङसि । पदि षष्ठी ङस् । वल प्रथमा सि ।

**पक्षे- [ निप्पज्जइ ]** निर्पूर्व० 'पदिच् गतौ' (१२५७) पद् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) निर्पदते । 'स्विदां ज्जः' (४।२२४) द्० → ज्ज० । 'निर्दुर्बहिराविः०' (२।३।९) र्० → ष्० । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - प० → प्प० **निप्पज्जइ** । निष्पद्यते इत्यर्थः ॥१२८॥

## विसंवदेर्विअट्ट-विलोट्ट-फंसाः ॥ ८।४।१२९ ॥

वि-सम्पूर्वस्य वदेरेते त्रय आदेशा वा भवन्ति ॥ विअट्टइ । विलोट्टइ । फंसइ । विसंवयइ ॥

**[ विसंवदेः ]** विसंवदि षष्ठी ङस् ।

**[ विअट्ट-विलोट्ट-फंसाः ]** विअट्ट-विलोट्ट-फंस प्रथमा जस् ।

**पक्षे- [ विसंवयइ ]** वि-सम्पूर्व० 'वद व्यक्तायां वाचि' (९९८) वद् । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) विसंवदति । **'क-ग-च-ज०'** (१।१७७) द्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **विसंवयइ** । विसंवदतीत्यर्थः ॥१२९॥

## शदो झड-पक्खोडौ ॥ ८।४।१३० ॥

शीयतेरेतावादेशौ भवतः ॥ झडइ । पक्खोडइ ॥

**[ शदो झड-पक्खोडौ ]** शद् षष्ठी ङस् । झड-पक्खोड प्रथमा औ ।

**[ झडइ-पक्खोडइ ]** 'शद्लृं शातने' (९६७) शद् । वर्त्त० तिव् । अनेन **झड-पक्खोड** आदेशौ । शटतीत्यर्थः ॥१३०॥

## आक्रन्देर्णीहरः ॥ ८।४।१३१ ॥

आक्रन्देर्णीहर इत्यादेशो वा भवति ॥ णीहरइ । अक्कन्दइ ॥

**[ आक्रन्देर्णीहरः ]** आक्रन्दि षष्ठी ङस् । णीहर प्रथमा सि ।

**पक्षे- [ अक्कन्दइ ]** आङ्पूर्व० 'क्रदुङ् वैक्लव्ये' (१००७) क्रद् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आक्रन्दते' । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - क० → क्क० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अक्कन्दइ** । आक्रन्दं करोतीत्यर्थः ॥१३१॥

## खिदेर्जूर-विसूरौ ॥ ८।४।१३२ ॥

खिदेरेतावादेशौ वा भवतः ॥ जूरइ । विसूरइ । खिज्जइ ॥

**[ खिदेर्जूर-विसूरौ ]** खिदि षष्ठी ङस् । जूर - विसूर प्रथमा औ ।

**पक्षे- [ खिज्जइ ]** 'खिदिंच् दैन्ये' (१२५९) खिद् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) खिदते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'खिदां ज्जः' (४।२२४) द्० → ज्ज० **खिज्जइ** । खिद्यते इत्यर्थः ॥१३२॥

## रुधेरुत्थङ्घः ॥ ८।४।१३३ ॥

रुधेरुत्थङ्घ इत्यादेशो वा भवति ॥ उत्थङ्घइ । रुन्धइ ॥

**[ रुधेरुत्थङ्घः ]** रुधि षष्ठी ङस् । उत्थङ्घ प्रथमा सि ।

**पक्षे- [ रुन्धइ ]** 'रुधृंपी आवरणे' (१४७३) रुध् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) रुधति । 'रुधो न्ध-म्भौ च' (४।२१८) धस्य न्ध० **रुन्धइ** ॥१३३॥

## निषेधेर्हक्कः ॥ ८।४।१३४ ॥

निषेधतेर्हक्क इत्यादेशो वा भवति ॥ हक्कइ । निसेहइ ॥

**[ निषेधेर्हक्कः ]** निषेधि षष्ठी ङस् । हक्क प्रथमा सि ।

**पक्षे- [ निसेहइ ]** निपूर्व० 'षिधू गत्याम्' (३२०) षिध् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) निषिधति । 'युवर्णस्य०' (४।२३७) षि० → षे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'श-षोः सः' (१।२६०) षे० → से० **निसेहइ** ॥१३४॥

## क्रुधेर्जूरः ॥ ८।४।१३५ ॥

क्रुधेर्जूर इत्यादेशो वा भवति ॥ जूरइ । कुज्झइ ॥

**[ क्रुधेर्जूरः ]** क्रुधि षष्ठी ङस् । जूर प्रथमा सि ।

**पक्षे- [ कुज्झइ ]** 'क्रुधंच् कोपे' (११८४) क्रुध् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) क्रुधति । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः' (४।२१७) धस्य ज्झः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कुज्झइ** । क्रुध्यतीत्यर्थः ॥१३५॥

## जनो जा-जम्मौ ॥ ८।४।१३६ ॥

जायतेर्जा-जम्म इत्यादेशौ भवतः ॥ जाअइ । जम्मइ ॥

**[ जनो जा-जम्मौ ]** जन् षष्ठी ङस् । जा-जम्म प्रथमा औ ।

**[ जाअइ जम्मइ ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । अनेन जा-जम्म आदेशौ । जायते इत्यर्थः ॥१३६॥

## तनेस्तड-तड्ड-तड्डव-विरल्लाः ॥ ८।४।१३७ ॥

तनेरेते चत्वार आदेशा वा भवन्ति ॥ तडइ । तड्डइ । तड्डवइ । विरल्लइ । तणइ ॥

**[ तनेस्तड-तड्ड-तड्डव-विरल्लाः ]** तनि षष्ठी ङस् । तड-तड्ड-तड्डव-विरल्ल प्रथमा जस् ।

**पक्षे- [ तणइ ]** 'तनूयी विस्तारे' (१४९९) तन् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) तनति । 'नो णः' (१।२२८) न० → ण० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तणइ** । तनोतीत्यर्थः ॥१३७॥

## तृपस्थिप्पः ॥ ८।४।१३८ ॥

तृप्यतेस्थिप्प इत्यादेशो भवति ॥ थिप्पइ ॥

**[ तृपस्थिप्पः ]** तृप् षष्ठी ङस् । थिप्प प्रथमा सि ।

**[ थिप्पइ ]** 'तृपौच् प्रीतौ' (११८९) तृप् । वर्त्त० तिव् । अनेन थिप्प इति । तृप्यतीत्यर्थः ॥१३८॥

## उपसर्पेरल्लिअः ॥ ८।४।१३९ ॥

उपपूर्वस्य सृपेः कृतगुणस्य अल्लिअ इत्यादेशो वा भवति ॥ [1]अल्लिअइ । उवसप्पइ ॥

**[ उपसर्पेरल्लिअः ]** उपसर्पि षष्ठी ङस् । अल्लिअ प्रथमा सि ।

**पक्षे- [ उवसप्पइ ]** उपपूर्व० 'सृप्लृं गतौ' (३४१) सृप् । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० सृ० → सर्० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) उपसर्पति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - प० → प्प० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'पो वः' (१।२३१) प० → व० **उवसप्पइ** ॥१३९॥

## संतपेर्झङ्खः ॥ ८।४।१४० ॥

[2]संतप्यतेर्झङ्ख इत्यादेशो वा भवति ॥ झङ्खइ । संतप्पइ ॥

**[ संतपेर्झङ्खः ]** संतपि षष्ठी ङस् । झङ्ख प्रथमा सि ।

**पक्षे- [ संतप्पइ ]** सम्पूर्व० [3]'तपिंच् ऐश्वर्ये' (१२६७) तप् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) संतपते । 'शकादीनां द्वित्वम्' (४।२३०) प० → प्प० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संतप्पइ** । संतप्यते इत्यर्थः ॥१४०॥

## व्यापेरोअग्गः ॥ ८।४।१४१ ॥

व्याप्नोतेरोअग्ग इत्यादेशो वा भवति ॥ ओअग्गइ । वावेइ ॥

**[ व्यापेरोअग्गः ]** व्यापि षष्ठी ङस् । ओअग्ग प्रथमा सि ।

**पक्षे- [ वावेइ ]** वि-आङ्पूर्व० 'आप्लृंट् व्याप्तौ' (१३०७) आप् । 'इवर्णादे०' (१।२।१) यत्वम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) व्यापति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'वर्तमाना-पञ्चमी०' (३।१५८) प० → पे० । 'पो वः' (१।२३१) पे० → वे० । 'अधो म-न-याम्' (२।७८) यलुक् **वावेइ** । व्याप्नोतीत्यर्थः ॥१४१॥

---

१. J. अलिअइ । २. H. J. M. संतपे० । ३. I. 'तपं संतापे' (३३३) ।

## समापेः समाणः ॥ ८।४।१४२ ॥

समाप्नोतेः समाण इत्यादेशो वा भवति ॥ समाणइ । समावेइ ॥

**[ समापेः समाणः ]** समापि षष्ठी ङस् । समाण प्रथमा सि ।

**पक्षे- [ समावेइ ]** सम्पूर्व० 'आप्लृंट् व्याप्तौ' (१३०७) आप् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) समापति । त्यादीनामा०' (३।१३९) तिव्० → इ० । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) प० → पे० । 'पो वः' (१।२३१) पे० → वे० **समावेइ** । समाप्नोतीत्यर्थः ॥१४२॥

## क्षिपेर्गलत्था-ऽड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः ॥ ८।४।१४३ ॥

क्षिपेरेते नवादेशा वा भवन्ति ॥

गलत्थइ । अड्डक्खइ । सोल्लइ । पेल्लइ । णोल्लइ । ह्रस्वत्वे तु- णुल्लइ । छुहइ । हुलइ । परीइ । घत्तइ । खिवइ ॥

**[ क्षिपेर्गलत्थ-अड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः ]** क्षिपि षष्ठी ङस् । गलत्थ-अड्डक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्त प्रथमा जस् ।

**पक्षे- [ खिवइ ]** 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) क्षिपति । 'पो वः' (१।२३१) प० → व० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षि० → खि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खिवइ** ॥१४३॥

## उत्क्षिपेर्गुलगुञ्छोत्थङ्घा-ऽल्लत्थोब्भुत्तोस्सिक्क-हक्खुवाः ॥ ८।४।१४४ ॥

उत्पूर्वस्य क्षिपेरेते षडादेशा वा भवन्ति ॥

गुलगुञ्छइ । उत्थङ्घइ । अल्लत्थइ । उब्भुत्तइ । उस्सिक्कइ । हक्खुवइ । उक्खिवइ ॥

**[ उत्क्षिपेर्गुलगुञ्छोत्थङ्घा-ऽल्लत्थोब्भुत्तोस्सिक्क-हक्खुवाः ]** उत्क्षिपि षष्ठी ङस् । गुलगुञ्छ-उत्थङ्घ-अल्लत्थ-उब्भुत्त-उस्सिक्क-हक्खुव प्रथमा जस् ।

**[ हक्खुवइ उक्खिवइ ]** उत्पूर्व० 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । **हक्खुवइ** इत्यत्र 'पो वः' (१।२३१) प० → व० । पक्षे-उत्पूर्व० क्षिप् । खिवइ पूर्ववत् । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वम् - ख्खि० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः **उक्खिवइ** । उत्क्षिपतीत्यर्थः ॥१४४॥

## आक्षिपेर्णीरवः ॥ ८।४।१४५ ॥

आङ्पूर्वस्य क्षिपेर्णीरव इत्यादेशो वा भवति ॥ णीरवइ । अक्खिवइ ॥

**[ आक्षिपेर्णीरवः ]** आक्षिपि षष्ठी ङस् । णीरव प्रथमा सि ।

**पक्षे- [ अक्खिवइ ]** आङ्पूर्व० 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । खिवइ पूर्ववत् (४।१४३) । 'अनादौ०' (२।८९) द्वित्वम्-ख्खि० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अक्खिवइ** ॥१४५॥

## स्वपेः कमवस-लिस-लोट्टाः ॥ ८।४।१४६ ॥

स्वपेरेते त्रय आदेशा वा भवन्ति । कमवसइ । लिसइ । लोट्टइ । सुअइ ॥

**[ स्वपेः कमवस-लिस-लोट्टाः ]** स्वपि षष्ठी ङस् । कमवस-लिस-लोट्ट प्रथमा जस् ।

**पक्षे- [ सुअइ ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) स्वपइ । 'स्वपावुच्च' (१।६४) सु० । 'क-ग-च-ज०' (१।१७७) प्लुक् **सुअइ** ॥१४६॥

## वेपेरायम्बा-ऽऽयज्झौ ॥ ८।४।१४७ ॥

वेपेरायम्ब-आयज्झ इत्यादेशौ वा भवतः ॥ आयम्बइ । आयज्झइ । वेवइ ॥

**[ वेपेरायम्बा-ऽऽयज्झौ ]** वेपि षष्ठी ङस् । आयम्ब-आयज्झ प्रथमा औ ।

**पक्षे- [ वेवइ ]** 'टुवेपृङ् कम्पने' (७५४) वेप् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वेपते । 'पो वः' (१।२३१) प० → व० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वेवइ** ॥१४७॥

## विलपेर्झङ्ख-वडवडौ ॥ ८।४।१४८ ॥

विलपेर्झङ्ख - वडवड इत्यादेशौ वा भवतः ॥ झङ्खइ । वडवडइ । विलवइ ॥

**[ विपलेर्झङ्ख-वडवडौ ]** विलपि षष्ठी ङस् । झङ्ख-वडवड प्रथमा औ ।

**पक्षे- [ विलवइ ]** विपूर्व० 'लप व्यक्ते वचने' (३३६) लप् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) विलपति । 'पो वः' (१।२३१) प० → व० **विलवइ** । विलपतीत्यर्थः ॥१४८॥

## [1]लिपो लिम्पः ॥ ८।४।१४९ ॥

लिम्पतेर्लिम्प इत्यादेशो भवति ॥ लिम्पइ ॥

**[ लिपो लिम्पः ]** लिप् षष्ठी ङस् । लिम्प प्रथमा सि ।

**[ लिम्पइ ]** 'लिपींत् उपदेहे' (१३२४) लिप् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लिपति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन लिम्प आदेशः **लिम्पइ** ॥१४९॥

## [2]गुप्येर्विर-णडौ ॥ ८।४।१५० ॥

गुप्यतेरेतावादेशौ वा भवतः ॥ विरइ । णडइ । पक्षे-गुप्पइ ॥

**[ गुप्येर्विर-णडौ ]** [3]गुप्यि षष्ठी ङस् । विर-णड प्रथमा औ ।

**पक्षे- [ गुप्पइ ]** 'गुपच् व्याकुलत्वे' (११९२) गुप् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गुपति । 'शकादीनां द्वित्वम्' (४।२३०) प० → प्प० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गुप्पइ** ॥१५०॥

## क्रपोऽवहो णिः ॥ ८।४।१५१ ॥

क्रपेः अवह इत्यादेशो ण्यन्तो भवति ॥ अवहावेइ । कृपां करोतीत्यर्थः ॥

**[ क्रपोऽवहो णिः ]** क्रप् षष्ठी ङस् । अवह प्रथमा सि । णि प्रथमा सि ।

---

१. B. लिपेर्लिवः । लिपतेर्लिव इत्यादेशो भवति ॥ लिवइ । लिपइ ॥ C. लिपेर्लिपः । लिपतेर्लिप इत्यादेशो भवति ॥ लिपइ ।
२. G. गुपेर्विर-णडौ । ३. E. गुपि षष्ठी ङस् ।

**[ अवहावेइ ]** 'क्रपि कृपायाम्' (१००९) क्रप् । वर्त्त० ते । णिगप्र० । अनेन क्रप्० → अवह आदेशः । 'णेरदेदावावे' (३।१४९) णिग्० → आवे० । 'समानानां०' (१।२।१) दीर्घः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **अवहावेइ** ॥१५१॥

**प्रदीपेस्तेअव-सन्दुम-सन्धुक्का-ऽब्भुत्ताः ॥ ८।४।१५२ ॥**

प्रदीप्यतेरेते चत्वार आदेशा वा भवन्ति ॥ तेअवइ । सन्दुमइ । सन्धुक्कइ । अब्भुत्तइ । पलीवेइ ॥

**[ प्रदीपेस्तेअव-सन्दुम-सन्धुक्का-ऽब्भुत्ताः ]** प्रदीपि षष्ठी ङस् । तेअव-सन्दुम-सन्धुक्क-अब्भुत्त प्रथमा जस् ।

**पक्षे- [ पलीवेइ ]** प्रपूर्व० 'दीपैचि दीप्तौ' (१२६६) दीप् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रदीपते । 'प्रदीपि-दोहदे लः' (१।२२१) दस्य लः । 'वर्तमाना-पञ्चमी०' (३।१५८) प० → पे० । 'पो वः' (१।२३१) पे० → वे० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् **पलीवेइ** ॥१५२॥

**लुभेः सम्भावः ॥ ८।४।१५३ ॥**

लुभ्यतेः सम्भाव इत्यादेशो वा भवति ॥ सम्भावइ । लुब्भइ ॥

**[ लुभेः सम्भावः ]** लुभि षष्ठी ङस् । सम्भाव प्रथमा सि ।

**पक्षे- [ लुब्भइ ]** 'लुभच् गार्द्ध्ये' (११९८) लुभ् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लुभति । 'शकादीनां द्वित्वम्' (४।२३०) द्वित्वम्-भ्भ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **लुब्भइ** ॥१५३॥

**क्षुभेः खउर-पड्डुहौ ॥ ८।४।१५४ ॥**

क्षुभेः खउर-पड्डुह इत्यादेशौ वा भवतः ॥ खउरइ । पड्डुहइ । खुब्भइ ॥

**[ क्षुभेः खउर-पड्डुहौ ]** क्षुभि षष्ठी ङस् । खउर-पड्डुह प्रथमा औ ।

**पक्षे- [ खुब्भइ ]** 'क्षुभश् सञ्चलने' (१५५३) क्षुभ् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) क्षुभति । 'क्षः खः क्वचित्तु०' (२।३) क्षु० → खु० । 'शकादीनां द्वित्वम्' (४।२३०) द्वित्वम्-भ्भ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वभस्य बः । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **खुब्भइ** ॥१५४॥

**आङो रभे रम्भ-ढवौ ॥ ८।४।१५५ ॥**

आङः परस्य रभे रम्भ-ढव इत्यादेशौ वा भवतः ॥ आरम्भइ । आढवइ । आरभइ ॥

**[ आङो रभे रम्भ-ढवौ ]** आङ् पञ्चमी ङसि । रभि षष्ठी ङस् । रम्भ-ढव प्रथमा औ ।

**पक्षे- [ आरभइ ]** आङ्पूर्व० 'रभिं राभस्ये' (७८५) रभ् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आरभते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **आरभइ** ॥१५५॥

**उपालम्भेर्झङ्ख-पच्चार-वेलवाः ॥ ८।४।१५६ ॥**

उपालम्भेरेते त्रय आदेशा वा भवन्ति ॥ झङ्खइ । पच्चारइ । वेलवइ । [1]उवालम्भइ ।

**[ उपालम्भेर्झङ्ख-पच्चार-वेलवाः ]** उपालम्भि षष्ठी ङस् । झङ्ख-पच्चार-वेलव प्रथमा जस् ।

**[ उवालम्भइ ]** उप-आङ्पूर्व० 'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) उपालभते । 'पो वः' (१।२३१) पा० → वा० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उवालम्भइ** ॥१५६॥

१. E. उवालभइ ।

## अवेर्जृम्भो जम्भा ॥ ८।४।१५७ ॥

जृम्भेर्जम्भा इत्यादेशो भवति, वेस्तु न भवति ॥

जम्भाइ । जम्भाअइ । अवेरिति किम् ? केलि-पसरो विअम्भइ ॥

**[ अवेर्जृम्भो जम्भा ]** न विः = अविः, तस्य = अवेः । जृम्भ् षष्ठी ङस् । जम्भा प्रथमा सि ।

**[ जम्भाइ जम्भाअइ ]** जम्भाअइ इत्यत्र 'स्वरादनतो वा' (४।२४०) अकारागमः । पक्षे-

**[ केलि-पसरो विअम्भइ ]** विपूर्व० जभुङ् । (७८२) - जभैङ् (७८३) - 'जृभुङ् गात्रविनामे' (७८४) जृभ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः- जृम्भ्० । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) विजृम्भते । 'ऋतोऽत्' (१।१२६) जृ० → ज० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **विअम्भइ** । विलसतीत्यर्थः ॥१५७॥

## भाराक्रान्ते नमेर्णिसुढः ॥ ८।४।१५८ ॥

भाराक्रान्ते कर्तरि नमेर्णिसुढ इत्यादेशो वा भवति ॥ णिसुढइ । पक्षे- णवइ । भाराक्रान्तो नमतीत्यर्थः ॥

**[ भाराक्रान्ते नमेर्णिसुढः ]** भाराक्रान्त सप्तमी ङि । नमि षष्ठी ङस् । णिसुढ प्रथमा सि ।

**पक्षे- [ णवइ ]** 'णमं प्रह्वत्वे' (३८८) णम् ॥१५८॥

## विश्रमेर्णिव्वा ॥ ८।४।१५९ ॥

विश्राम्यतेर्णिव्वा इत्यादेशो वा भवति ॥ णिव्वाइ । वीसमइ ॥

**[ विश्रमेर्णिव्वा ]** विश्रमि षष्ठी ङस् । णिव्वा प्रथमा सि ।

**पक्षे- [ वीसमइ ]** 'श्रमूच् खेद-तपसोः' (१२३३) श्रम्, विपूर्व० । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) विश्रमति । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'लुप्त-य-र-व०' (१।४३) दीर्घः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वीसमइ** ॥१५९॥

## आक्रमेरोहावोत्थारच्छुन्दाः ॥ ८।४।१६० ॥

आक्रमतेरेते त्रय आदेशा वा भवन्ति ॥ ओहावइ । उत्थारइ । छुन्दइ । अक्कमइ ॥

**[ आक्रमेरोहावोत्थारच्छुन्दाः ]** आक्रमि षष्ठी ङस् । ओहाव-उत्थार-छुन्द प्रथमा जस् ।

**पक्षे- [ अक्कमइ ]** आङ्पूर्व० 'क्रमू पादविक्षेपे' (३८५) क्रम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आक्रमति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-क्क० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **अक्कमइ** ॥१६०॥

## भ्रमेष्टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म-भम्मड-भमड-भमाड-तलअण्ट-झण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पराः ॥ ८।४।१६१ ॥

भ्रमेरेतेऽष्टादशादेशा वा भवन्ति ॥

टिरिटिल्लइ । ढुण्ढुल्लइ । ढण्ढल्लइ । चक्कम्मइ । भम्मडइ । भमडइ । भमाडइ । तलअण्टइ । झण्टइ । झम्पइ । भुमइ । गुमइ । फुमइ । फुसइ । ढुमइ । ढुसइ । परीइ । परइ । भमइ ॥

**[ भ्रमेष्टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म-भम्मड-भमड-भमाड-तलअण्ट-झण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पराः ]** भ्रमि षष्ठी ङस् । टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म-भम्मड-भमड-भमाड-तलअण्ट-झण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पर प्रथमा जस् ।

**पक्षे- [ भमइ ]** 'भ्रमू चलने' (९७०) भ्रम् । 'भ्रमूच् अनवस्थाने' (१२३४) भ्रम् वा । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) भ्रमति । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भमइ** ॥१६१॥

## गमेरई-अइच्छा-ऽणुवज्जा-ऽवज्जसोक्कुसा-ऽक्कुस-पच्चड्ड-पच्चछन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहा-ऽवसेहा-ऽवहराः ॥ ८।४।१६२ ॥

गमेरेते एकविंशतिरादेशा वा भवन्ति ॥

अईइ । अइच्छइ । अणुवज्जइ । अवज्जसइ । उक्कुसइ । अक्कुसइ । पच्चड्डइ । पच्छन्दइ । णिम्महइ । णीइ । णीणइ । णीलुक्कइ । पदअइ । रम्भइ । परिअल्लइ । वोलइ । परिअलइ । णिरिणासइ । णिवहइ । अवसेहइ । अवहरइ । पक्षे-

गच्छइ । हम्मइ । णिहम्मइ । णीहम्मइ । आहम्मइ । पहम्मइ इत्येते तु 'हम्म गतौ' (३९४) इत्यस्यैव भविष्यन्ति ॥

**[ गमेरई-अइच्छा-ऽणुवज्जा-ऽवज्जसोक्कुसा-ऽक्कुस-पच्चड्ड-पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहा-ऽवसेहा-ऽवहराः ]** गमि षष्ठी ङस् । अई-अइच्छा-ऽणुवज्जा-ऽवज्जसोक्कुसा-ऽक्कुस-पच्चड्ड-पच्छन्द-णिम्मह-णी-णीण-णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहा-ऽवसेहा-ऽवहर प्रथमा जस् ।

**पक्षे- [ गच्छइ ]** 'गम्लृं गतौ' (३९६) गम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गमति । 'गमिष्यमासां छः' (४।२१५) मस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गच्छइ** ।

**[ णिहम्मइ ]** निपूर्व० 'हम्म गतौ' (३९४) हम्म् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) निहम्मति । 'नो णः' (१।२२८) नि० → णि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **णिहम्मइ** ।

**[ णीहम्मइ ]** निर्पूर्व० हम्म् । वर्त्त० तिव् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । ('निर्दुरोर्वा' (१।१३) र्लुक्) । 'र्लुकि निरः' (१।९३) नि० → नी० । 'नो णः' (१।२२८) नी० → णी० । शेषं सुगमम् । **णीहम्मइ** ॥१६२॥

## आङा अहिपच्चुअः ॥ ८।४।१६३ ॥

आङा सहितस्य गमेः अहिपच्चुअ इत्यादेशो वा भवति ॥ अहिपच्चुअइ । पक्षे- **आगच्छइ** ॥

**[ आङा अहिपच्चुअः ]** आङ् तृतीया टा । अहिपच्चुअ प्रथमा सि ।

**पक्षे- [ आगच्छइ ]** आङ्पूर्व० 'गम्लृं गतौ' (३९६) गम् । गच्छइ पूर्ववत् [४।१६२] आगच्छइ ॥१६३॥

## समा अब्भिडः ॥ ८।४।१६४ ॥

समा युक्तस्य गमेः अब्भिड इत्यादेशो वा भवति ॥ अब्भिडइ । संगच्छइ ॥

**[ समा अब्भिडः ]** सम् तृतीया टा । अब्भिड प्रथमा सि ॥१६४॥

**अभ्याङोम्मत्थः ॥ ८।४।१६५ ॥**

अभ्याङ्भ्यां युक्तस्य गमेः उम्मत्थ इत्यादेशो वा भवति ॥

उम्मत्थइ । अब्भागच्छइ । अभिमुखमागच्छतीत्यर्थः ॥

**[ अभ्याङोम्मत्थः ]** अभ्याङ् तृतीया टा । उम्मत्थ प्रथमा सि ।

**पक्षे- [ अब्भागच्छइ ]** अभि-आङ्पूर्व० 'गम्लृं गतौ' (३९६) गम् । गच्छइ पूर्ववत् [४।१६२] । 'लुक्' (१।१०) इलुक् । 'तैलादौ' (२।९८) द्वित्वं-भ्भ्० । 'द्वितीय-तुर्य०' (२।९०) पूर्वभस्य बः **अब्भागच्छइ** ॥१६५॥

**प्रत्याङा पलोट्टः ॥ ८।४।१६६ ॥**

प्रत्याङ्भ्यां युक्तस्य गमेः पलोट्ट इत्यादेशो वा भवति ॥ पलोट्टइ । पच्चागच्छइ ॥

**[ प्रत्याङा पलोट्टः ]** प्रत्याङ् तृतीया टा । पलोट्ट प्रथमा सि ।

**पक्षे- [ पच्चागच्छइ ]** प्रत्यागच्छइ । 'त्योऽचैत्ये' (२।१३) त्या० → चा० । 'अनादौ०' (२।८९) द्वित्वं-च्चा० **पच्चागच्छइ** ॥१६६॥

**शमेः पडिसा-परिसामौ ॥ ८।४।१६७ ॥**

शमेरेतावादेशौ वा भवतः । पडिसाइ । परिसामइ । समइ ॥

**[ शमेः पडिसा-परिसामौ ]** शमि षष्ठी ङस् । पडिसा-परिसाम प्रथमा औ ।

**पक्षे- [ समइ ]** 'शमू उपशमे' (१२३०) शम् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) शमति । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **समइ** ॥१६७॥

**रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः ॥ ८।४।१६८ ॥**

रमतेरेतेऽष्टादेशा वा भवन्ति ॥

संखुड्डइ । खेड्डइ । उब्भावइ । किलिकिञ्चइ । कोट्टुमइ । मोट्टायइ । णीसरइ । वेल्लइ । रमइ ॥

**[ रमेः संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्लाः ]** रमि षष्ठी ङस् । संखुड्ड-खेड्डोब्भाव-किलिकिञ्च-कोट्टुम-मोट्टाय-णीसर-वेल्ल प्रथमा जस् ।

**पक्षे- [ रमइ ]** 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) रमते । 'त्यादीना०' (३।१३९) ते० → इ० **रमइ** ॥१६८॥

**पूरेरग्घाडा-ऽग्घवोद्धुमा-ऽङ्गुमा-ऽहिरेमाः ॥ ८।४।१६९ ॥**

पूरेरेते पञ्चादेशा वा भवन्ति ॥ अग्घाडइ । अग्घवइ । उद्धुमाइ । अङ्गुमइ । अहिरेमइ । पूरइ ॥

**[ पूरेरग्घाडा-ऽग्घवोद्धुमा-ऽङ्गुमा-ऽहिरेमाः ]** पूरि षष्ठी ङस् । अग्घाडा-ऽग्घवोद्धुमा-ऽङ्गुमा-ऽहिरेम प्रथमा जस् ।

**पक्षे- [ पूरइ ]** 'पूरण् पूरणे(आप्यायने)' (१७४९) पूर । वर्त्त० तिव् । 'चुरादि०' (३।४।१७) णिच्प्र० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) पूरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पूरइ** ॥१६९॥

## त्वरस्तुवर-जअडौ ॥ ८।४।१७० ॥

त्वरतेरेतावादेशौ भवतः ॥ तुवरइ । जअडइ । तुवरन्तो । जअडन्तो ॥

**[ त्वरस्तुवर-जअडौ ]** त्वर् षष्ठी ङस् । तुवर-जअड प्रथमा औ ।

**[ तुवरन्तो जअडन्तो ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । अनेन त्वर० → तुवर०-जअड० । 'न्त-माणौ' (३।१८०) ? ('शत्रानशः' (३।१८१)) आन० → न्त० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुवरन्तो जअडन्तो** । त्वरमाण इत्यर्थः ॥१७०॥

## त्यादि-शत्रोस्तूरः ॥ ८।४।१७१ ॥

त्वरतेस्त्यादौ शतरि च तूर इत्यादेशो भवति ॥ तूरइ । तूरन्तो ॥

**[ त्यादि-शत्रोस्तूरः ]** त्यादि-शतृ षष्ठी ओस् । तूर प्रथमा सि ।

**[ तूरइ तूरन्तो ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । त्यादिप्रत्यये-**तूरइ** । शतृप्रत्यये-**तूरन्तो** ॥१७१॥

## तुरोऽत्यादौ ॥ ८।४।१७२ ॥

त्वरोऽत्यादौ तुर आदेशो भवति ॥ तुरिओ । तुरन्तो ॥

**[ तुरोऽत्यादौ ]** तुर प्रथमा सि । अत्यादि सप्तमी ङि ।

**[ तुरिओ ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । क्तप्र० । 'व्यञ्जना०' (४।२३९) अत् । 'क्ते' (३।१५६) अ० → इ० । अनेन तुर आदेशः । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) तुरित० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुरिओ** ॥१७२॥

## क्षरः खिर-झर-पज्झर-पच्चड-[1]णिव्वल-णिट्टुआः ॥ ८।४।१७३ ॥

क्षरेरेते षडादेशा भवन्ति ॥ खिरइ । झरइ । पज्झरइ । पच्चडइ । णिव्वलइ । णिट्टुअइ ॥

**[ क्षरः खिर-झर-पज्झर-पच्चड-णिव्वल-णिट्टुआः ]** क्षर् षष्ठी ङस् । खिर-झर-पज्झर-पच्चड-णिव्वल-णिट्टुअ प्रथमा जस् ॥१७३॥

## उच्छल उत्थल्लः ॥ ८।४।१७४ ॥

उच्छलतेरुत्थल्ल इत्यादेशो भवति ॥ उत्थल्लइ ॥

**[ उच्छल उत्थल्लः ]** उच्छल् षष्ठी ङस् । उत्थल्ल प्रथमा सि ।

**[ उत्थल्लइ ]** उत्पूर्व० 'शल गतौ' (९८४) शल् । वर्त्त० तिव् । अनेन उत्थल्ल आदेशः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **उत्थल्लइ** ॥१७४॥

## विगलेस्थिप्प-णिट्टुहौ ॥ ८।४।१७५ ॥

विगलतेरेतावादेशौ वा भवतः ॥ थिप्पइ । णिट्टुहइ । विगलइ ॥

---

१. पा० म० - क्षर० → णिच्चल० - णिव्वल० ।

**[ विगलेस्थिप्प-णिट्टुहौ ]** विगलि षष्ठी ङस् । थिप्प-णिट्टुह प्रथमा औ ।

**पक्षे- [ विगलइ ]** विपूर्व० 'गल अदने' (४५२) गल् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) विगलति । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **विगलइ** । गलतीत्यर्थः ॥१७५॥

## दलि-वल्योर्विसट्ट-वम्फौ ॥ ८।४।१७६ ॥

दलेर्वलेश्च यथासंख्यं विसट्ट-वम्फ इत्यादेशौ वा भवतः ॥ विसट्टइ । वम्फइ । पक्षे- दलइ । वलइ ॥

**[ दलि-वल्योर्विसट्ट-वम्फौ ]** दलि-वलि षष्ठी ओस् । विसट्ट-वम्फ प्रथमा औ ।

**पक्षे- [ दलइ ]** 'दल विशरणे' (४१३) दल् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) दलति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दलइ** ।

**[ वलइ ]** 'वलि संवरणे' (८०७) वल् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वलते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वलइ** ॥१७६॥

## भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः ॥ ८।४।१७७ ॥

भ्रंशेरेते षडादेशा वा भवन्ति ॥ फिडइ । फिट्टइ । फुडइ । फुट्टइ । चुक्कइ । भुल्लइ । पक्षे-भंसइ ॥

**[ भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः ]** भ्रंशि षष्ठी ङस् । फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्ल प्रथमा जस् ।

**पक्षे- [ भंसइ ]** 'भ्रंशूङ् अवस्रंसने' (९५२) भ्रंश् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) भ्रंशते । 'सर्वत्र०' (२।७९) र्लुक् । 'त्यादी०' (३।१३९) ते० → इ० **भंसइ** ॥१७७॥

## नशेर्णिरणास-णिवहा-ऽवसेह-पडिसा-सेहा-ऽवहराः ॥ ८।४।१७८ ॥

नशेरेते षडादेशा वा भवन्ति ॥

णिरणासइ । णिवहइ । अवसेहइ । पडिसाइ । सेहइ । अवहरइ । पक्षे- नस्सइ ॥

**[ नशेर्णिरणास-णिवहा-ऽवसेह-पडिसा-सेहा-ऽवहराः ]** नशि षष्ठी ङस् । णिरणास-णिवहा-ऽवसेह-पडिसा-सेहा-ऽवहर प्रथमा जस् ।

**पक्षे- [ नस्सइ ]** 'नशौच् अदर्शने' (१२०२) नश् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) नशति । 'शकादीनां द्वित्वम्' (४।२३०) श्श० । 'श-षोः सः' (१।२६०) स्स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नस्सइ** ॥१७८॥

## अवात्काशो वासः ॥ ८।४।१७९ ॥

अवात् परस्य काशो वास इत्यादेशो भवति ॥ ओवासइ ॥

**[ अवात् काशो वासः ]** अव पञ्चमी ङसि । काश् षष्ठी ङस् । वास प्रथमा सि ।

**[ ओवासइ ]** अवपूर्व० 'काशृङ् दीप्तौ' (८३०) काश् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) अवकाशते । अनेन काश० → वास० इति । 'अवापोते' (१।१७२) अवस्य ओ० **ओवासइ** । अवकाशं ददातीत्यर्थः ॥१७९॥

**संदिशेरप्पाहः ॥ ८।४।१८० ॥**

संदिशतेरप्पाह इत्यादेशो वा भवति ॥ अप्पाहइ । संदिसइ ॥

**[ संदिशेरप्पाहः ]** संदिशि षष्ठी ङस् । अप्पाह प्रथमा सि ।

**पक्षे- [ संदिसइ ]** 'दिशींत् अतिसर्जने' (१३१८) दिश्, सम्पूर्व० । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) संदिशति । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **संदिसइ** ॥१८०॥

**दृशो निअच्छ-पेच्छा-ऽवयच्छा-ऽवयज्झ-वज्ज-सव्वव-देक्खौअक्खा-ऽवक्खा-ऽवअक्ख-पुलोअ-पुलअ-निआ-ऽवआस-पासाः ॥ ८।४।१८१ ॥**

निअच्छइ । पेच्छइ । अवयच्छइ । अवयज्झइ । वज्जइ । सव्ववइ । देक्खइ । ओअक्खइ । अवक्खइ । अवअक्खइ । पुलोएइ । पुलएइ । निअइ । अवआसइ । पासइ ॥

निज्झाअइ इति तु निध्यायतेः स्वरादत्यन्ते भविष्यति ॥

**[ दृशो निअच्छ-पेच्छा-ऽवयच्छा-ऽवयज्झ-वज्ज-सव्वव-देक्खौअक्खा-ऽवक्खा-ऽवअक्ख-पुलोअ-पुलअ-निआ-ऽवआस-पासाः ]** दृश् षष्ठी ङस् । निअच्छ-पेच्छा-ऽवयच्छा-ऽवयज्झ-वज्ज-सव्वव-देक्खौअक्खा-ऽवक्खा-ऽवअक्ख-पुलोअ-पुलअ-निआ-ऽवआस-पास प्रथमा जस् ।

**[ निअच्छइ-पेच्छइ-अवयच्छइ-अवयज्झइ-वज्जइ-सव्ववइ-देक्खइ-ओअक्खइ-अवक्खइ-अवअक्खइ-पुलोएइ-पुलएइ-निअइ-अवआसइ-पासइ ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । अनेन सर्वे आदेशाः । पश्यतीत्यर्थः ।

**[ निज्झाअइ ]** निपूर्व० 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'स्वराणां०' (४।२३८) ध्यै० → ध्या० । 'ध्या-गोर्झा-गौ' (४।६) ध्या० → झा० । 'स्वरादनतो वा' (४।२४०) अत् । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य ज० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निज्झाअइ** ॥१८१॥

**स्पृशः फास-फंस-फरिस-छिव-छिहा-ऽऽलुङ्खा-ऽऽलिहाः ॥ ८।४।१८२ ॥**

स्पृशतेरेते सप्त आदेशा भवन्ति ॥ फासइ । फंसइ । फरिसइ । छिवइ । छिहइ । आलुङ्खइ । आलिहइ ॥

**[ स्पृशः फास-फंस-फरिस-छिव-छिहा-ऽऽलुङ्खा-ऽऽलिहाः ]** स्पृश् षष्ठी ङस् । फास-फंस-फरिस-छिव-छिहा-ऽऽलुङ्ख-ऽऽलिह प्रथमा जस् ।

**[ फासइ-फंसइ-फरिसइ-छिवइ-छिहइ-आलुङ्खइ-आलिहइ ]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । अनेन सर्वे आदेशाः । स्पृशतीत्यर्थः ॥१८२॥

**प्रविशे रिअः ॥ ८।४।१८३ ॥**

प्रविशे रिअ इत्यादेशो वा भवति ॥ रिअइ । पविसइ ॥

**[ प्रविशे रिअः ]** प्रविशि षष्ठी ङस् । रिअ प्रथमा सि ।

**पक्षे- [ पविसइ ]** प्रपूर्व० 'विशंत् प्रवेशने' (१४१५) विश् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रविशति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पविसइ** ॥१८३॥

**प्रान्मृश-मुषोर्म्हुसः ॥ ८।४।१८४ ॥**

प्रात्परयोर्मृशति-मुष्णात्योर्म्हुस इत्यादेशो भवति ॥ पम्हुसइ । प्रमृशति-प्रमुष्णाति वा ॥

**[ प्रान्मृश-मुषोर्म्हुसः ]** प्र पञ्चमी ङसि । मृश-मुष् षष्ठी ओस् । म्हुस प्रथमा सि ।

**[ पम्हुसइ ]** 'मृशंत् आमर्शने' (१४१६) मृश्, प्रपूर्व० । 'मुषश् स्तेये' (१५६३) मुष्, प्रपूर्व० । वर्त्त० तिव् । अनेन द्वयोः म्हुस आदेशः । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पम्हुसइ** ॥१८४॥

**पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्डाः ॥ ८।४।१८५ ॥**

पिषेरेते पञ्चादेशा भवन्ति वा ॥

णिवहइ । णिरिणासइ । णिरिणज्जइ । रोञ्चइ । चड्डइ । पक्षे - पीसइ ॥

**[ पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्डाः ]** पिषि षष्ठी ङस् । णिवह-णिरिणास-णिरिणज्ज-रोञ्च-चड्ड प्रथमा जस् ।

**पक्षे- [ पीसइ ]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पिषति । 'रुषादीनां दीर्घः' (४।२३६) पि० → पी० । 'श-षोः सः' (१।२६०) ष० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पीसइ** ॥१८५॥

**भषेर्भुक्कः ॥ ८।४।१८६ ॥**

भषेर्भुक्क इत्यादेशो वा भवति ॥ भुक्कइ । भसइ ॥

**[ भषेर्भुक्कः ]** भषि षष्ठी ङस् । भुक्क प्रथमा सि ।

**पक्षे- [ भसइ ]** 'भष भर्त्सने' (५२१) भष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भषति । 'श-षोः सः' (१।२६०) ष० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भसइ** ॥१८६॥

**कृषेः कड्ढ-साअड्ढा-ऽञ्चा-ऽणच्छा-ऽयञ्छा-ऽऽइञ्छाः ॥ ८।४।१८७ ॥**

कृषेरेते षडादेशा वा भवन्ति ॥

कड्ढइ । साअड्ढइ । अञ्चइ । अणच्छइ । अयञ्छइ । आइञ्छइ । पक्षे- करिसइ ॥

**[ कृषेः कड्ढ-साअड्ढा-ऽञ्चा-ऽणच्छा-ऽयञ्छा-ऽऽइञ्छाः ]** कृषि षष्ठी ङस् । कड्ढ-साअड्ढा-ऽञ्चा-ऽणच्छा-ऽयञ्छ-ऽऽइञ्छ प्रथमा जस् ।

**पक्षे- [ करिसइ ]** 'कृषींत् विलेखने' (१३१९) कृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कृषति । 'वृषादीनामरिः' (४।२३५) कृ० → करि० । 'श-षोः सः' (१।२६०) ष० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करिसइ** । कर्षतीत्यर्थः ॥१८७॥

## असावक्खोडः ॥ ८।४।१८८ ॥

[1]असिविषयस्य कृषेरक्खोड इत्यादेशो भवति ॥ अक्खोडेइ । असिं कोशात् कर्षतीत्यर्थः ॥

**[ असावक्खोडः ]** असावक्खोड प्रथमा सि ।

**[ अक्खोडेइ ]** 'कृषींत् विलेखने' (१३१९) कृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कृषति । अनेन कृष० → अक्खोड० । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) एत्त्वं-ड० → डे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **अक्खोडेइ** । असिं कोशात् कर्षतीत्यर्थः । ॥१८८॥

## गवेषेर्ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः ॥ ८।४।१८९ ॥

गवेषेरेते चत्वार आदेशा वा भवन्ति ॥

ढुण्ढुल्लइ । ढण्ढोलइ । गमेसइ । घत्तइ । गवेसइ ॥

**[ गवेषेर्ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्ताः ]** गवेषि षष्ठी ङस् । ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्त प्रथमा जस् ।

**पक्षे- [ गवेसइ ]** 'गवेषण् मार्गणे' (१९१९) गवेष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गवेषति । 'श-षोः सः' (१।२६०) ष० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गवेसइ** । गवेषयतीत्यर्थः ॥१८९॥

## श्लिषेः सामग्गा-ऽवयास-परिअत्ताः ॥ ८।४।१९० ॥

श्लिष्यतेरेते त्रय आदेशा वा भवन्ति ॥ सामग्गइ । अवयासइ । [2]परिअत्तइ । सिलेसइ ॥

**[ श्लिषेः सामग्गा-ऽवयास-परिअत्ताः ]** श्लिषि षष्ठी ङस् । सामग्गा-ऽवयास-परिअत्त प्रथमा जस् ।

**[ सिलेसइ ]** 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) श्लिषति । 'लात्' (२।१०६) लात् पूर्व इ० । 'लोकात्' (१।१।३) शिलिषति । 'युवर्णस्य गुणः' (४।२३७) लि० → ले० । 'श-षोः सः' (१।२६०) शि० → सि० - ष० → स० । 'त्यादीनामाद्य०'(३।१३९) तिव्० → इ० **सिलेसइ** । श्लिष्यतीत्यर्थः ॥१९०॥

## म्रक्षेश्चोप्पडः ॥ ८।४।१९१ ॥

म्रक्षेश्चोप्पड इत्यादेशो वा भवति ॥ चोप्पडइ । मक्खइ ॥

**[ म्रक्षेश्चोप्पडः ]** म्रक्षि षष्ठी ङस् । चोप्पड प्रथमा सि ।

**पक्षे- [ मक्खइ ]** 'म्रक्षण् म्लेच्छने' (१७१६) म्रक्ष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) म्रक्षति । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मक्खइ** । म्रक्षतीत्यर्थः ॥१९१॥

## काङ्क्षेराहा-ऽहिलङ्घा-ऽहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः ॥ ८।४।१९२ ॥

काङ्क्षतेरेतेऽष्टादेशा वा भवन्ति ॥

---

१. E. असिविषये । २. पा० म०- श्लिष० → परिअत्त० - परिअन्त० ।

आहइ । अहिलङ्घइ । अहिलङ्खइ । वच्चइ । वम्फइ । महइ । सिहइ । विलुम्पइ । कङ्खइ ॥

**[ काङ्क्षेराहा-ऽहिलङ्घा-ऽहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पाः ]** काङ्क्षि षष्ठी ङस् । आहा-ऽहिलङ्घा-ऽहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्प प्रथमा जस् ।

**पक्षे- [ कङ्खइ ]** 'काक्षु काङ्क्षायाम्' (५८०) काक्ष् । वर्त्त० तिव् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) काङ्क्षति । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'त्यादीनामाद्य० (३।१३९) तिव्० → इ० **कङ्खइ** । काङ्क्षतीत्यर्थः ॥१९२॥

## प्रतीक्षेः सामय-विहीर-विरमालाः ॥ ८।४।१९३ ॥

प्रतीक्षेरेते त्रय आदेशा वा भवन्ति ॥ सामयइ । विहीरइ । विरमालइ । पडिक्खइ ॥

**[ प्रतीक्षेः सामय-विहीर-विरमालाः ]** प्रतीक्षि षष्ठी ङस् । सामय-विहीर-विरमाल प्रथमा जस् ।

**पक्षे- [ पडिक्खइ ]** प्रतिपूर्व० 'ईक्षि दर्शने' (८८२) ईक्ष् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रतीक्षते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'सर्वत्र०' (२।७९) र्लुक् । 'समानानां०' (१।२।१) दीर्घः-ती० । 'प्रत्यादौ डः' (१।२०६) ती० → डी० । 'ह्रस्वः संयोगे' (१।८४) डी० → डि० । 'क्षः खः क्वचित्तु०' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः **पडिक्खइ** । प्रतीक्षते इत्यर्थः ॥१९३॥

## तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः ॥ ८।४।१९४ ॥

तक्षेरेते चत्वार आदेशा वा भवन्ति ॥ तच्छइ । चच्छइ । रम्पइ । रम्फइ । तक्खइ ॥

**[ तक्षेस्तच्छ-चच्छ-रम्प-रम्फाः ]** तक्षि षष्ठी ङस् । तच्छ-चच्छ-रम्प-रम्फ प्रथमा जस् ।

**पक्षे- [ तक्खइ ]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तक्षति । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'अनादौ०' (२।८९) द्वित्वं - ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तक्खइ** । तक्षतीत्यर्थः ॥१९४॥

## विकसेः कोआस-वोसट्टौ ॥ ८।४।१९५ ॥

विकसेरेतावादेशौ वा भवतः ॥ कोआसइ । वोसट्टइ । विअसइ ॥

**[ विकसेः कोआस-वोसट्टौ ]** विकसि षष्ठी ङस् । कोआस-वोसट्ट प्रथमा औ ।

**पक्षे- [ विअसइ ]** 'कस गतौ' (९८७) कस्, विपूर्व० । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) विकसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **विअसइ** । विकसतीत्यर्थः ॥१९५॥

## हसेर्गुञ्जः ॥ ८।४।१९६ ॥

हसेर्गुञ्ज इत्यादेशो वा भवति ॥ गुञ्जइ । हसइ ॥

**[ हसेर्गुञ्जः ]** हसि षष्ठी ङस् । गुञ्ज प्रथमा सि ।

**पक्षे- [ हसइ ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसइ** ॥१९६॥

## स्रंसेर्ल्हस-डिम्भौ ॥ ८।४।१९७ ॥

स्रंसेरेतावादेशौ वा भवतः ॥ ल्हसइ । परिल्हसइ सलिल-वसणं । डिम्भइ । संसइ ॥

**[ स्रंसेर्ल्हस-डिम्भौ ]** स्रंसि षष्ठी ङस् । ल्हस-डिम्भ प्रथमा औ ।

**पक्षे- [ संसइ ]** 'स्रंसूङ् अवस्रंसने' (९५३) स्रंस् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) स्रंसते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **संसइ** ॥१९७॥

## त्रसेर्डर-वोज्ज-वज्जाः ॥ ८।४।१९८ ॥

त्रसेरेते त्रय आदेशा वा भवन्ति ॥ डरइ । वोज्जइ । वज्जइ । तसइ ॥

**[ त्रसेर्डर-वोज्ज-वज्जाः ]** त्रसि षष्ठी ङस । डर-वोज्ज-वज्ज प्रथमा जस् ।

**पक्षे- [ तसइ ]** 'त्रसैच् भये' (११७१) त्रस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) त्रसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'सर्वत्र०' (२।७९) र्लुक् **तसइ** । त्रस्यतीत्यर्थः ॥१९८॥

## न्यसो णिम-णुमौ ॥ ८।४।१९९ ॥

न्यस्यतेरेतावादेशौ भवतः ॥ णिमइ णुमइ ॥

**[ न्यसो णिम-णुमौ ]** न्यस् षष्ठी ङस् । णिम-णुम प्रथमा औ ।

**[ णिमइ णुमइ ]** निपूर्व० 'असूच् क्षेपणे' (१२२१) अस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) न्यसति । अनेन न्यस्० → णिम०-णुम० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **णिमइ णुमइ**। क्षिपतीत्यर्थः ॥१९९॥

## पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः ॥ ८।४।२०० ॥

पर्यस्यतेरेते त्रय आदेशा भवन्ति । पलोट्टइ । पल्लट्टइ । पल्हत्थइ ॥

**[ पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः ]** पर्यस् षष्ठी ङस् । पलोट्ट-पल्लट्ट-पल्हत्थ प्रथमा जस् ।

**[ पलोट्टइ पल्लट्टइ पल्हत्थइ ]** परिपूर्व० 'असूच् क्षेपणे' (१२२१) अस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पर्यसति । अनेन त्रय आदेशाः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पलोट्टइ** । **पल्लट्टइ** । **पल्हत्थइ** । क्षिपतीत्यर्थः ॥२००॥

## निःश्वसेर्झङ्खः ॥ ८।४।२०१ ॥

निःश्वसेर्झङ्ख इत्यादेशो वा भवति ॥ झङ्खइ । नीससइ ॥

**[ निःश्वसेर्झङ्खः ]** निःश्वसि षष्ठी ङस् । झङ्ख प्रथमा सि ।

**पक्षे- [ नीससइ ]** निर्पूर्व० अन (१०८९) - 'श्वसक् प्राणने' (१०९०) श्वस् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) निर्श्वसति । 'त्यादीनामा०' (३।१३९) तिव्० → इ० । 'निर्दुरोर्वा' (१।१३)र्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'लुंकि निरः' (१।९३) नि० → नी० । 'श-षोः सः' (१।२६०) श० → स० **नीससइ** । निःश्वासान् मुञ्चतीत्यर्थः ॥२०१॥

## उल्लसेरूसलोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्ल-ऽऽरोआः ॥ ८।४।२०२ ॥

उल्लसेरेते षडादेशा वा भवन्ति ॥

ऊसलइ । ऊसुम्भइ । णिल्लसइ । पुलआअइ । गुञ्जोल्लइ । ह्रस्वत्वे तु - गुञ्जुल्लइ । आरोअइ । उल्लसइ ॥

**[ उल्लसेरूसलोसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्ल-ऽऽरोआः ]** उल्लसि षष्ठी ङस् । ऊसल-ऊसुम्भ-णिल्लस-पुलआअ-गुञ्जोल्ल-आरोअ प्रथमा जस् ।

**पक्षे- [ उल्लसइ ]** उत्पूर्व० 'लस श्लेषण-क्रीडनयोः' (५४३) लस् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) उल्लसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ल्ल० **उल्लसइ** ॥२०२॥

## भासेर्भिसः ॥ ८।४।२०३ ॥

भासेर्भिस इत्यादेशो वा भवति ॥ भिसइ । भासइ ॥

**[ भासेर्भिसः ]** भासि षष्ठी ङस् । भिस प्रथमा सि ।

**पक्षे- [ भासइ ]** 'भासि दीप्तौ' (८४६) भास् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) भासते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **भासइ** ॥२०३॥

## ग्रसेर्घिसः ॥ ८।४।२०४ ॥

ग्रसेर्घिस इत्यादेशो वा भवति ॥ घिसइ । गसइ ॥

**[ ग्रसेर्घिसः ]** ग्रसि षष्ठी ङस् । घिस प्रथमा सि ।

**पक्षे- [ गसइ ]** 'ग्रसूङ् अदने' (८५४) ग्रस् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) ग्रसते । 'सर्वत्र०' (२।७९) र्लुक् । 'त्यादीनामा०' (३।१३९) ते० → इ० **गसइ** । ग्रसतीत्यर्थः ॥२०४॥

## अवाद् गाहेर्वाहः ॥ ८।४।२०५ ॥

अवात्परस्य गाहेर्वाह इत्यादेशो वा भवति ॥ ओवाहइ । ओगाहइ ॥

**[ अवाद् गाहेर्वाहः ]** अव पञ्चमी ङसि । गाहि षष्ठी ङस् । वाह प्रथमा सि ।

**पक्षे- [ ओगाहइ ]** अवपूर्व० 'गाहौङ् विलोडने' (८७१) गाह् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) अवगाहते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'अवापोते' (१।१७२) अवस्य ओ० **ओगाहइ** । अवगाहते इत्यर्थः ॥२०५॥

## आरुहेश्चड-वलग्गौ ॥ ८।४।२०६ ॥

आरुहेरेतावादेशौ वा भवतः ॥ चडइ । वलग्गइ । आरुहइ ॥

**[ आरुहेश्चड-वलग्गौ ]** आरुहि षष्ठी ङस् । चड-वलग्ग प्रथमा औ ।

**पक्षे- [ आरुहइ ]** आङ्पूर्व० 'रुहं जन्मनि' (९८८) रुह् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) आरुहति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । बाहुलकात् 'युवर्णस्य गुणः' (४।२३७) इत्यनेन न गुणः । **आरुहइ** ॥२०६॥

## मुहेर्गुम्म-गुम्मडौ ॥ ८।४।२०७ ॥

मुहेरेतावादेशौ वा भवतः ॥ गुम्मइ । गुम्मडइ । मुज्झइ ॥

**[ मुहेर्गुम्म-गुम्मडौ ]** मुहि षष्ठी ङस् । गुम्म-गुम्मड प्रथमा औ ।

**पक्षे- [ मुज्झइ ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह् । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) मुहति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः' (४।२१७) ज्झ० **मुज्झइ** । मोहं प्राप्नोतीत्यर्थः ॥२०७॥

## दहेरहिऊला-ऽऽलुङ्खौ ॥ ८।४।२०८ ॥

दहेरेतावादेशौ वा भवतः ॥ अहिऊलइ । आलुङ्खइ । डहइ ॥

**[ दहेरहिऊला-ऽऽलुङ्खौ ]** दहि षष्ठी ङस् । अहिऊल - आलुङ्ख प्रथमा औ ।

**पक्षे- [ डहइ ]** 'दहं भस्मीकरणे' (५५२) दह् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) दहति । 'दंश-दहोः' (१।२१८) द० → ड० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **डहइ** । दहतीत्यर्थः ॥२०८॥

## ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवारा-ऽहिपच्चुआः ॥ ८।४।२०९ ॥

ग्रहेरेते षडादेशा भवन्ति ॥

वलइ । गेण्हइ । हरइ । पङ्गइ । निरुवारइ । अहिपच्चुअइ ॥

**[ ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवारा-ऽहिपच्चुआः ]** ग्रह् षष्ठी ङस् । वल-गेण्ह-हर-पङ्ग-निरुवार-अहिपच्चुअ प्रथमा जस् ।

**[ वलइ-गेण्हइ-हरइ-पङ्गइ-निरुवारइ-अहिपच्चुअइ ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । वर्त्त० तिव् । अनेन षडादेशाः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । गृह्णातीत्यर्थः ॥२०९॥

## क्त्वा-तुम्-तव्येषु घेत् ॥ ८।४।२१० ॥

ग्रहः क्त्वा-तुम्-तव्येषु घेत् इत्यादेशो भवति ॥

क्त्वा-घेत्तूण । घेत्तुआण । क्वचिन्न भवति-गेण्हिअ । तुम्-घेत्तुं । तव्य-घेत्तव्वं ॥

**[ क्त्वा-तुम्-तव्येषु घेत् ]** क्त्वा-तुम्-तव्य सप्तमी सुप् । घेत् प्रथमा सि ।

**[ घेत्तुं घेत्तूण घेत्तुआण ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् (३) । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तुम्-तूण-तुआण० । अनेन ग्रह्० → घेत् आदेशः - **घेत्तुं घेत्तूण घेत्तुआण** ।

क्वचिद् घेदादेशो न भवति -

**[ गेण्हिअ ]** ग्रह् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'ग्रहो वल-गेण्ह-हर०' (४।२०९) ग्रह्० → गेण्ह० । 'क्त्वस्तुम०' (२।१४६) क्त्वा० → अत्० । 'व्यञ्जना०' (४।२३९) अत् । 'एच्च क्त्वा०' (३।१५७) इ० । 'लुक्' (१।१०) अलुक् **गेण्हिअ** ।

**[ घेत्तुं ]** ग्रह् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम्प्र० । अनेन ग्रह्० → घेत्० । 'लोकात्' (१।१।३) घेत्तुम् **घेत्तुं** ।

**[ घेत्तव्वं ]** ग्रह् । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । अनेन ग्रह्० → घेत्० । 'लोकात्' (१।१।३) घेत्तव्य० । 'अधो म-न-याम्' (२।७८) यूलुक् । 'अनादौ०' (२।८९) द्वित्वं-व्व० **घेत्तव्वं** ॥२१०॥

## वचो वोत् ॥ ८।४।२११ ॥

वक्तेर्वोत् इत्यादेशो भवति, क्त्वा-तुम्-तव्येषु ॥ वोत्तूण । वोत्तुं । वोत्तव्वं ॥

**[ वचो वोत् ]** वच् षष्ठी ङस् । वोत् प्रथमा सि ।

**[ वोत्तूण वोत्तुं वोत्तव्वं ]** 'वचंक् भाषणे' (१०९६) वच् । क्त्वाप्र० । अनेन वच्० → वोत्० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० **वोत्तूण** । तुमि परे-**वोत्तुं** । तव्यप्रत्यये **वोत्तव्वं** । 'अधो म-न-याम्' (२।७८) य्लुक्। 'अनादौ०' (२।८९) द्वित्वं-व्व० **वोत्तव्वं** ॥२११॥

## रुद-भुज-मुचां तोऽन्त्यस्य ॥ ८।४।२१२ ॥

एषामन्त्यस्य क्त्वा-तुम्-तव्येषु तो भवति ॥

रोत्तूण । रोत्तुं । रोत्तव्वं । भोत्तूण । भोत्तुं । भोत्तव्वं । मोत्तूण । मोत्तुं । मोत्तव्वं ॥

**[ रुद-भुज-मुचां तोऽन्त्यस्य ]** रुद-भुज-मुच् षष्ठी आम् । त प्रथमा सि । अन्त्य षष्ठी ङस् ।

**[ रोत्तूण रोत्तुं रोत्तव्वं ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद् (३) । क्त्वा-तुम्-तव्यप्र० । प्रथमे 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । अनेन द० → त० । 'युवर्णस्य गुणः' (४।२३७) रु० → रो० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व्व० **रोत्तूण रोत्तुं रोत्तव्वं** ।

**[ भोत्तूण भोत्तुं भोत्तव्वं ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् (३) । क्त्वा-तुम्-तव्यप्र० । प्रथमे 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । अनेन ज० → त० । 'युवर्णस्य गुणः' (४।२३७) भु० → भो० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व्व० **भोत्तूण भोत्तुं भोत्तव्वं** ।

**[ मोत्तूण मोत्तुं मोत्तव्वं ]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् (३) । क्त्वा-तुम्-तव्यप्र० । प्रथमे 'क्त्वस्तुमत्तूण०' (२।१४६) क्त्वा० → तूण० । अनेन च० → त० । 'युवर्णस्य गुणः' (४।२३७) मु० → मो० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व्व० **मोत्तूण मोत्तुं मोत्तव्वं** ॥२१२॥

## दृशस्तेन ट्ठः ॥ ८।४।२१३ ॥

दृशोऽन्त्यस्य तकारेण सह द्विरुक्तष्ठकारो भवति ॥ दट्ठूण । दट्ठुं । दट्ठव्वं ॥

**[ दृशस्तेन ट्ठः ]** दृश् षष्ठी ङस् । तद् तृतीया टा । ट्ठ प्रथमा सि ।

**[ दट्ठूण दट्ठुं दट्ठव्वं ]** 'दृशृं प्रेक्षणे' (४९५) दृश् (३) । क्त्वा-तुम्-तव्यप्र० । प्रथमे 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । अनेन शकार-तकारयोः ट्ठ० **दट्ठूण दट्ठुं दट्ठव्वं** ॥२१३॥

## आः कृगो भूत-भविष्यतोश्च ॥ ८।४।२१४ ॥

कृगोऽन्त्यस्य आ इत्यादेशो भवति, भूत-भविष्यत्कालयोश्चकारात् क्त्वा-तुम्-तव्येषु च ॥

काहीअ-अकार्षीत् अकरोत् चकार वा ॥ काहिइ-करिष्यति कर्ता वा । क्त्वा-काऊण । तुम्-काउं । तव्य-कायव्वं ॥

**[ आः कृगो भूत-भविष्यतोश्च ]** आ प्रथमा सि । कृग् षष्ठी ङस् । भूत-भविष्यत् सप्तमी ओस् । च प्रथमा सि ।

पूर्वसूत्रे यदन्त्यग्रहणं तेनेहापि ज्ञेयम् ॥

**[ काहीअ ]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी दि-ह्यस्तनी दिव् वा अथवा परोक्षा णव् । 'सी-ही-हीअ भूतार्थस्य' (३।१६२) दि-दिव्-णव्स्थाने ही० । अनेन कृ० → का० **काहीअ** ।

**[ काहिइ ]** कृ । भवि० स्यति । 'भविष्यति हिरादिः' (३।१६६) "हि"आगमः । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । अनेन कृ० → का० **काहिइ** ।

**[ काऊण काउं कायव्वं ]** कृ । क्त्वा-तुम्-तव्यप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । द्वितीये तुम्प्र० । तृतीये तव्यप्र० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन कृ० → का० । तृतीये 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **काऊण काउं कायव्वं** ॥२१४॥

## गमिष्यमासां छः ॥ ८।४।२१५ ॥

एषामन्त्यस्य छो भवति ॥ गच्छइ । इच्छइ । जच्छइ । अच्छइ ॥

**[ गमिष्यमासां छः ]** गम्-इष्-यम्-आस् षष्ठी आम् । छ प्रथमा सि ।

**[ गच्छइ ]** 'गम्लृं गतौ' (३९६) गम् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गमति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन म० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः **गच्छइ** ।

**[ इच्छइ ]** 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) इषति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन ष० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः **इच्छइ** ।

**[ जच्छइ ]** 'यमूं उपरमे' (३८६) यम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) यमति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन म० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'आदेर्यो जः' (१।२४५) य० → ज० **जच्छइ** । निवर्त्तते इत्यर्थः ।

**[ अच्छइ ]** 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आसते । अनेन स० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **अच्छइ** । तिष्ठतीत्यर्थः ॥२१५॥

## छिदि-भिदो न्दः ॥ ८।४।२१६ ॥

अनयोरन्त्यस्य नकाराक्रान्तो दकारो भवति ॥ छिन्दइ । भिन्दइ ॥

**[ छिदि-भिदो न्दः ]** छिदि-भिद् षष्ठी ङस् । न्द प्रथमा सि ।

**[ छिन्दइ ]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन द० → न्द० । 'लोकात्' (१।१।३) छिन्दति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **छिन्दइ** ।

**[ भिन्दइ ]** 'भिदृंपी विदारणे' (१४७७) भिद् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन द० → न्द० । 'लोकात्' (१।१।३) भिन्दति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भिन्दइ** ॥२१६॥

---

१. E. G. छिद० ।

## युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ॥ ८।४।२१७ ॥

एषामन्त्यस्य द्विरुक्तो झो भवति ॥

जुज्झइ । बुज्झइ । गिज्झइ । कुज्झइ । सिज्झइ । मुज्झइ ॥

**[ युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ]** युध-बुध-गृध-क्रुध-सिध-मुह् षष्ठी आम् । ज्झ प्रथमा सि ।

**[ जुज्झइ ]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । वर्त्त० ते । 'व्यञ्जनाद०' (४।२३९) अत् । अनेन ध० → ज्झ० । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **जुज्झइ** ।

**[ बुज्झइ ]** 'बुधि ज्ञाने' (१२६२) बुध् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन ध० → ज्झ० । 'लोकात्' (१।१।३) बुज्झते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **बुज्झइ** ।

**[ गिज्झइ ]** 'गृधूच् अभिकाङ्क्षायाम्' (११८७) गृध् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन ध० → ज्झ० । 'लोकात्' (१।१।३) गृज्झति । 'इत्कृपादौ' (१।१२८) गृ० → गि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **गिज्झइ** ।

**[ कुज्झइ ]** 'क्रुधंच् कोपे' (११८४) क्रुध् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन ध० → ज्झ० । 'लोकात्' (१।१।३) क्रुज्झति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कुज्झइ** ।

**[ सिज्झइ ]** 'षिधू गत्याम्' (३२०) षिध् । वर्त्त तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन ध० → ज्झ० । 'लोकात्' (१।१।३) षिज्झति । 'श-षोः सः' (१।२६०) षि० → सि० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सिज्झइ** ।

**[ मुज्झइ ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन ह० → ज्झ० । 'लोकात्' (१।१।३) मुज्झति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मुज्झइ** ॥२१७॥

## रुधो न्ध-म्भौ च ॥ ८।४।२१८ ॥

रुधोऽन्त्यस्य न्ध-म्भ इत्येतौ चकारात् ज्झश्च भवति ॥ रुन्धइ । रुम्भइ । रुज्झइ ॥

**[ रुधो न्ध-म्भौ च ]** रुध् षष्ठी ङस् । न्ध-म्भ प्रथमा औ । च प्रथमा सि ।

**[ रुन्धइ रुम्भइ रुज्झइ ]** 'रुधूंपी आवरणे' (१४७३) रुध् (३) । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन ध० → न्ध०-म्भ०-ज्झ० । 'लोकात्' (१।१।३) रुन्धति-रुम्भति-रुज्झति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रुन्धइ रुम्भइ रुज्झइ** ॥२१८॥

## सद-पतोर्डः ॥ ८।४।२१९ ॥

अनयोरन्त्यस्य डो भवति ॥ सडइ । पडइ ॥

**[ सद-पतोर्डः ]** सद-पत् षष्ठी ओस् । ड प्रथमा सि ।

**[ सडइ ]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन द० → ड० । 'लोकात्' (१।१।३) सडति । 'त्यादीनामा०' (३।१३९) तिव्० → इ० **सडइ** ।

**[ पडइ ]** 'पत्लृ गतौ' (९६२) पत् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन त० → ड० । 'लोकात्' (१।१।३) पडति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पडइ** ॥२१९॥

**क्वथ-वर्धां ढः ॥ ८।४।२२० ॥**

अनयोरन्त्यस्य ढो भवति ॥

कढइ । वड्ढइ पवय-कलयलो । परिअड्ढइ लायण्णं ॥ बहुवचनाद् वृधेः कृतगुणस्य वर्धेश्चाविशेषेण ग्रहणम् ॥

**[ क्वथ-वर्धां ढः ]** क्वथ-वर्ध् षष्ठी आम् । ढ प्रथमा सि ।

**[ कढइ ]** 'क्वथे निष्पाके' (९६४) क्वथ् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन थ० → ढ० । 'लोकात्' (१।१।३) क्वढति । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कढइ** ।

**[ [१]वड्ढइ पवयकलयलो चलइ चलंतवडयामुहो सलिलनिही ।**
**पवणनिराइयरुक्खा पडंति उद्धठिअनिज्झरा धरणिधरा ]** । ।

अस्यार्थः- प्लवगकलकलो वर्धते । सलिलनिधिश्चलति । किंविशिष्टः सलिलनिधिः ? चलद्वडवामुखो-वडवानलो यत्र सः । धरणिधराः पर्वताः पतन्ति । किंविशिष्टा धरणिधराः ? पवनेन-वायुना निराजिताः-कम्पिता वृक्षा येषु ते - पवननिराजितवृक्षाः । पुनः किंविशिष्टा धरणिधराः ? ऊर्ध्वस्थितनिर्झरा इति गाथार्थः ।

'वर्धण् छेदन-पूरणयोः' (१६६१) वर्ध् । बहुवचनात् कृतगुणस्य 'वृधूङ् वृद्धौ' (९५७) इत्यस्य धातोर्ग्रहणं, तत्रापि वर्द्ध इति मण्डनिका । वर्त्त० ते । अनेन र्द्धस्य ढः । 'अनादौ०' (२।८९) द्वित्वं-ढ्ढ० । 'द्वितीय-तुर्य०' (२।९०) पूर्वढस्य डः **वड्ढइ** ।

प्लवगकलकल । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) ल्लुक् । 'क-ग-च-ज०' (१।१७७) क-गयोर्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पवयकलयलो** ।

परिअड्ढइ लायण्णं पययच्छायाए सक्कवयणाणं(णेण) ।
सक्कइ सक्कारुक्करिसणेण पययस्स वि पहावो ॥

अस्य व्याख्या - संस्कृतवचसा लावण्यं वर्धते । किं० संस्कृतवचसा ? प्राकृतछायाया(यया) प्राकृतस्यापि प्रभावः शक्यते । केन ? संस्कारोत्कर्षणेन इत्यर्थः ।

परिपूर्व० वृध् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन र्धस्य ढः । 'अनादौ०' (२।८९) द्वित्वं-ढ्ढ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वढस्य डः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'क-ग-च-ज०' (१।१७७) व्लुक् **परिअड्ढइ** ।

लावण्य । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) व्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ण्ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **लायण्णं** ॥२२०॥

---

१. वड्ढइ पवअकलअलो वलइ वलंतवलआमुहो सलिलणिही । पवणणिराइअरुक्खा पयन्ति उद्धट्ठिओज्झरा धरणिहरा ॥
[से० ब०- ७।३६]
वर्धते प्लवगकलकलो वलति वलमानवडवामुखः सलिलनिधिः । पवननिरायतवृक्षाः पतन्त्यूर्ध्वस्थितनिर्झरा धरणीधराः ॥

## वेष्टः ॥ ८।४।२२१ ॥

'वेष्टि वेष्टने' (६७३) इत्यस्य धातोः 'क-ग-ट-ड०' (२।७७) इत्यादिना षलोपेऽन्त्यस्य ढो भवति ॥ वेढइ । वेढिज्जइ ॥

**[ वेष्टः ]** वेष्ट् षष्ठी ङस् ।

**[ वेढइ ]** 'वेष्टि वेष्टने' (६७३) वेष्ट् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वेष्टते । 'क-ग-ट-ड०' (२।७७) ष्लुक् । अनेन टस्य ढः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वेढइ** ।

**[ वेढिज्जइ ]** वेष्ट् । वेष्टते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज आदेशः । शेषं पूर्ववत् । **वेढिज्जइ** ॥२२१॥

## समो ल्लः ॥ ८।४।२२२ ॥

सम्पूर्वस्य वेष्टतेरन्त्यस्य द्विरुक्तो लो भवति ॥ संवेल्लइ ॥

**[ समो ल्लः ]** सम् षष्ठी ङस् । ल्ल प्रथमा सि ।

**[ संवेल्लइ ]** सम्पूर्व० 'वेष्टि वेष्टने' (६७३) वेष्ट् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) संवेष्टते । 'क-ग-ट-ड०' (२।७७) ष्लुक् । अनेन टस्य ल्लः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संवेल्लइ** ॥२२२॥

## वोदः ॥ ८।४।२२३ ॥

उदः परस्य वेष्टतेरन्त्यस्य ल्लो वा भवति ॥ उव्वेल्लइ । उव्वेढइ ॥

**[ वोदः ]** वा प्रथमा सि । उद् षष्ठी ङस् ।

**[ उव्वेल्लइ ]** उद्पूर्व० 'वेष्टि वेष्टने' (६७३) वेष्ट् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) उद्वेष्टते । 'क-ग-ट-ड०' (२।७७) ष्लुक् । अनेन टस्य ल्लः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व्वे० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उव्वेल्लइ** । पक्षे -

**[ उव्वेढइ ]** उद्पूर्व० 'वेष्टि वेष्टने' (६७३) वेष्ट् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) उद्वेष्टते । 'क-ग-ट-ड०' (२।७७) ष्लुक् । 'वेष्टः' (४।२२१) टस्य ढः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व्वे० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उव्वेढइ** ॥२२३॥

## स्विदां ज्जः ॥ ८।४।२२४ ॥

स्विदिप्रकाराणामन्त्यस्य द्विरुक्तो जो भवति ॥

सव्वङ्गसिज्जिरीए । संपज्जइ । खिज्जइ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥

**[ स्विदां ज्जः ]** स्विद् षष्ठी आम् । ज्ज प्रथमा सि ।

**[ सव्वङ्गसिज्जिरीए ]** सर्वाङ्ग । 'ह्रस्वः संयोगे' (१।८४) र्वा० → र्व० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व० → व्व० **सव्वङ्ग** ।

'ष्विदांच् गात्रप्रक्षरणे' (११७८) ष्विद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्विद् । स्विद्यतीत्येवंशीला । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । 'शीलाद्यर्थस्येरः' (२।१४५) तृन्० → इर० । 'प्रत्यये ङीनर्वा' (३।३१) ङीप्र० ।

'लुक्' (१।१०) रस्य अलोपः । 'लोकात्' (१।१।३) स्विदिरी । 'सर्वत्र ल-व०' (२।७९) व्लुक् । अनेन द० → ज्ज० । 'लोकात्' (१।१।३) सिज्जिरी । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा तु ङसेः' (३।२९) टा० → ए० **सिज्जिरीए** । सर्वाङ्गस्वेदत्या[1] इत्यर्थः ।

**[ संपज्जइ ]** सम्पूर्व० 'पदिंच् गतौ' (१२५७) पद् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन द० → ज्ज० । 'लोकात्' (१।१।३) संपज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संपज्जइ** ।

**[ खिज्जइ ]** 'खिदिंच् दैन्ये' (१२५९) खिद् । वर्त्त० ते । 'व्यञ्जना०' (४।२३९) अत् । अनेन द० → ज्ज० । 'लोकात्' (१।१।३) खिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **खिज्जइ** ॥२२४॥

## व्रज-नृत-मदां च्चः ॥ ८।४।२२५ ॥

एषामन्त्यस्य द्विरुक्तश्चो भवति ॥ वच्चइ । नच्चइ । मच्चइ ॥

**[ व्रज-नृत-मदां च्चः ]** व्रज-नृत-मद् षष्ठी आम् । च्च प्रथमा सि ।

**[ वच्चइ ]** 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन ज० → च्च० । 'लोकात्' (१।१।३) वच्चति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वच्चइ** ।

**[ नच्चइ ]** 'नृतैच् नर्तने' (११५२) नृत् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन त० → च्च० । 'लोकात्' (१।१।३) नृच्चति । 'ऋतोऽत्' (१।१२६) नृ० → न० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नच्चइ** ।

**[ मच्चइ ]** 'मदैच् हर्षे' (१२३६) मद् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (३।१३९) अत् । अनेन द० → च्च० । 'लोकात्' (१।१।३) मच्चति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मच्चइ** ॥२२५॥

## रुद-नमोर्वः ॥ ८।४।२२६ ॥

अनयोरन्त्यस्य वो भवति ॥ रुवइ । रोवइ । नवइ ॥

**[ रुद-नमोर्वः ]** रुद-नम् षष्ठी ओस् । व प्रथमा सि ।

**[ रुवइ रोवइ ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन द० → व० । 'लोकात्' (१।१।३) रुवति । एकत्र 'स्वराणां स्वराः' (४।२३८) रु० → रो० **रुवइ** । **रोवइ** ।

**[ नवइ ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन म० → व० । 'लोकात्' (१।१।३) नवति **नवइ** ॥२२६॥

## उद्विजः ॥ ८।४।२२७ ॥

उद्विजतेरन्त्यस्य वो भवति ॥ उव्विवइ । उव्वेवो ॥

**[ उद्विजः ]** उद्विज् षष्ठी ङस् ।

**[ उव्विवइ ]** उद्पूर्व० 'ओविजैति भय-चलनयोः' (१४६८) विज् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन ज० → व० । 'लोकात्' (१।१।३) उद्विवते । 'क-ग-ट०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं -वि० → व्वि० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उव्विवइ** ।

---

१. M. सर्वाङ्गस्वेदनशीलायाः ।

**[ उव्वेवो ]** उद्पूर्व० 'ओविजैति भय-चलनयोः' (१४६८) विज् । उद्वेजनमुद्वेजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । अनेन ज० → व० । 'लोकात्' (१।१।३) उद्विव० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं - वि० → व्वि० । 'युवर्णस्य गुणः' (४।२३७) व्वि० → व्वे० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **उव्वेवो** ॥२२७॥

## खाद-धावोर्लुक् ॥ ८।४।२२८ ॥

अनयोरन्त्यस्य लुग् भवति ॥

खाइ । खाअइ । खाहिइ । खाउ । धाइ । धाहिइ । धाउ ॥

बहुलाधिकाराद् वर्तमाना - भविष्यद्विध्याद्येकवचने एव भवति तेनेह न भवति - खादन्ति । धावन्ति ॥ क्वचिन्न भवति - धावइ[1] पुरओ ॥

**[ खाद-धावोर्लुक् ]** खाद-धाव् षष्ठी ओस् । लुक् प्रथमा सि ।

**[ खाइ ]** 'खादृ भक्षणे' (२९४) खाद् । वर्त्त० तिव् । अनेन द्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खाइ** ।

**[ खाअइ ]** खाद् । वर्त्त० तिव् । अनेन द्लुक् । 'स्वरादनतो वा' (४।२४०) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खाअइ** ।

**[ खायइ[3] ]** खाद् । वर्त्त० तिव् । अनेन द्लुक् । 'स्वरादनतो वा' (४।२४०) अत् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **खायइ** ।

**[ खाहिइ ]** खाद् । भविष्यन्ती स्यति । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । अनेन द्लुक् **खाहिइ** ।

**[ खाउ ]** खाद् । तुव्प्रत्यये **खाउ** ।

**[ धाइ ]** 'धावूग् गति-शुद्ध्योः' (९२०) धाव् । वर्त्त० तिव् । अनेन व्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धाइ** ।

**[ [4]धाअइ ]** धाव् । वर्त्त० तिव् । अनेन व्लुक् । 'स्वरादनतो वा' (४।२४०) अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धाअइ** ।

**[ [5]धायइ ]** धाव् । वर्त्त० तिव् । अनेन व्लुक् । 'स्वरादनतो वा' (४।२४०) अत् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धायइ** ।

**[ धाहिइ ]** धाव् । भविष्यन्ती स्यति । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इ० । अनेन व्लुक् **धाहिइ** ।

---

१. **धावइ पुरओ** पासेसु भमइ दिट्ठीपहम्मि संठाइ । णवलइ[आ]करस्स तुह हलिअउत्त ! दे पहरसु वराइं ॥ [गा० स० - ५।५६] धावति पुरतः पार्श्वयोर्भ्रमति दृष्टिपथे संतिष्ठते । नवलतिकाकरस्य तव हलिकपुत्र ! हे प्रहर वराकीम् ॥

२. पाठां० - नवलयपहारभीया सा देउरस्स ववलगइ [गा०-को० -५।५७] नवलताप्रहारभीता सा देवरस्य व्यवलगति ।

३. A. खायइ उदाहरणम् । ४. A. धाअइ उदाहरणम् । ५. A. धायइ उदाहरणम् ।

**[ धाउ ]** धाव् । तुव्प्रत्यये **धाउ** ।

**[ खादन्ति ]** खाद् । वर्त्त० अन्ति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) खाद-अन्ति । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० **खादन्ति** ।

**[ धावन्ति ]** धाव् । वर्त्त० अन्ति । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) धाव-अन्ति । 'बहुष्वाद्यस्य०' (३।१४२) अन्ति० → न्ति० **धावन्ति** ।

**[ धावइ पुरओ ]** धाव् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) धावति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धावइ** ।

पुरतः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **पुरओ** ॥२२८॥

## सृजो रः ॥ ८।४।२२९ ॥

सृजो धातोरन्त्यस्य रो भवति ॥ निसिरइ । वोसिरइ । वोसिरामि ॥

**[ सृजो रः ]** सृज् षष्ठी ङस् । र प्रथमा सि ।

**[ निसिरइ ]** 'सृजंत् विसर्गे' (१३४९) सृज्, निपूर्व० । वर्त्त० तिव् । 'इत्कृपादौ' (१।१२८) सृ० → सि० । अनेन ज० → र० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) निसिरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निसिरइ** ।

**[ वोसिरइ ]** व्युद्पूर्व० सृज्० । सिरइ पूर्ववत् । 'गोणादयः' (२।१७४) व्युदो वो इत्यादेशः-**वोसिरइ** ।

**[ वोसिरामि ]** व्युद्पूर्व० सृज्० । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । अनेन ज० → र० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) व्युत्सृरमि । 'मौ वा' (३।१५४) दीर्घः - र० → रा० । 'इत्कृपादौ' (१।१२८) सृ० → सि० । 'गोणादयः' (२।१७४) व्युदो वो इत्यादेशः - **वोसिरामि** ॥२२९॥

## शकादीनां द्वित्वम् ॥ ८।४।२३० ॥

शकादीनामन्त्यस्य द्वित्वं भवति ॥

शक्-सक्कइ । जिम्-जिम्मइ । लग्-लग्गइ । मग्-मग्गइ । कुप्-कुप्पइ । नश्-नस्सइ । अट्-परिअट्टइ । लुट्-पलोट्टइ । तुट्-तुट्टइ । नट्-नट्टइ । सिव्-सिव्वइ इत्यादि ॥

**[ शकादीनां द्वित्वम् ]** शकादि षष्ठी आम् । द्वित्व प्रथमा सि ।

**[ सक्कइ ]** 'शक्लृंट् शक्तौ' (१३००) शक् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) शक्कति । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सक्कइ** ।

**[ जिम्मइ ]** 'जिमू अदने' (३८४) जिम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) जिम्मति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जिम्मइ** ।

**[ लग्गइ ]** 'लगे सङ्गे' (१०२४) लग् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) लग्गति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **लग्गइ** ।

**[ मग्गइ ]** 'मगु गतौ' (८५) मग् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) मग्गति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मग्गइ** ।

**[ कुप्पइ ]** 'कुपच् कोपे' (११९१) कुप् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) कुप्पति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कुप्पइ** ।

**[ नस्सइ ]** 'नशौच् अदर्शने' (१२०२) नश् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) नश्शति । 'श-षोः सः' (१।२६०) श्श० → स्स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नस्सइ** ।

**[ परिअट्टइ ]** परिपूर्व० 'अट गतौ' (१९४) अट् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) परिअट्टति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **परिअट्टइ** ।

**[ पलोट्टइ ]** प्रपूर्व० 'लुट विलोटने' (१९०) लुट् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) प्रलुट्टति । 'युवर्णस्य गुणः' (४।२३७) लु० → लो० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पलोट्टइ** ।

**[ तुट्टइ ]** 'त्रुटत् छेदने' (१४३७) त्रुट् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) त्रुट्टति । 'सर्वत्र ल-व०' (२।७९) र्लुक् **तुट्टइ** ।

**[ नट्टइ ]** 'नटण् भ्रंशे (अवस्यन्दने) (१५९३) नट् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) नट्टति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नट्टइ** ।

**[ सिव्वइ ]** 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन धातोरन्त्यस्य द्वित्वम् । 'लोकात्' (१।१।३) सिव्वति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सिव्वइ** ॥२३०॥

## स्फुटि - चलेः ॥ ८।४।२३१ ॥

अनयोरन्त्यस्य द्वित्वं वा भवति ॥ फुट्टइ । फुडइ । चल्लइ । चलइ ॥

**[ स्फुटि-चलेः ]** स्फुटि-चलि षष्ठी ङस् ।

**[ फुट्टइ फुडइ ]** 'स्फुटृ विशरणे' (२०९) स्फुट् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा द्वित्वम् । 'लोकात्' (१।१।३) स्फुट्टति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'क-ग-ट-ड०' (२।७७) स्लुक् **फुट्टइ** । पक्षे- 'टो डः' (१।१९५) ट० → ड० **फुडइ** ।

**[ चल्लइ चलइ ]** 'चल कम्पने' (९७२।१०५५) चल् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा द्वित्वम् । 'लोकात्' (१।१।३) चल्लति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चल्लइ चलइ** ॥२३१॥

## प्रादेर्मीलेः ॥ ८।४।२३२ ॥

प्रादेः परस्य मीलेरन्त्यस्य द्वित्वं वा भवति ॥

पमिल्लइ । पमीलइ । निमिल्लइ । निमीलइ । सम्मिल्लइ । सम्मीलइ । उम्मिल्लइ । उम्मीलइ ॥ प्रादेरिति किम् ? मीलइ ॥

**[ प्रादेर्मीलेः ]** प्रादि षष्ठी ङस् । मीलि षष्ठी ङस् ।

**[ पमिल्लइ पमीलइ निमिल्लइ निमीलइ सम्मिल्लइ सम्मीलइ ]** प्रपूर्व० 'मील निमेषणे' (४१५) मील् (२) । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा द्वित्वं - ल० → ल्ल० । 'लोकात्' (१।१।३) प्रमील्लति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । यत्र द्वित्वं तत्र 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः - **पमिल्लइ** । **पमीलइ** । निद्रां करोतीत्यर्थः ।

एवं निपूर्व० - **निमिल्लइ** । **निमीलइ** । सम्पूर्व० - **सम्मिल्लइ** । **सम्मीलइ** ।

**[ उम्मिल्लइ उम्मीलइ ]** उत्पूर्व० मील्(२) । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा द्वित्वं - ल० → ल्ल० । 'लोकात्' (१।१।३) उत्मील्लति । प्रथमे 'ह्रस्वः संयोगे' (१।८४) ह्रस्वः-मी० → मि० । उभयत्र 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । **उम्मिल्लइ उम्मीलइ** । प्रकटीभवतीत्यर्थः ।

**[ मीलइ ]** मील् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) मीलति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मीलइ** ॥२३२॥

## उवर्णस्याऽवः ॥ ८।४।२३३ ॥

धातोरन्त्यस्य उवर्णस्य अवादेशो भवति ॥

ह्नुङ् - निण्हवइ । हु - निवहइ । च्युंङ् - चवइ । रु - रवइ । कु - कवइ । सु - सवइ । पसवइ ॥

**[ उवर्णस्याऽवः ]** उवर्ण षष्ठी ङस् । अव प्रथमा सि ।

**[ निण्हवइ ]** 'ह्नुंङ्क् अपनयने' (११०६) ह्नु, निपूर्व० । वर्त्त० ते । 'सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः' (२।७५) ह्नु० → ण्हु० । अनेन अव० -ण्हु० → ण्हव० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) निण्हवते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **निण्हवइ** ।

**[ निहवइ ]** निपूर्व० 'हुंक् दाना-ऽदनयोः' (११३०) हु । वर्त्त० तिव् । अनेन अव० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) निहवति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **निहवइ** । होमं करोतीत्यर्थः ।

**[ चवइ ]** 'च्युंङ् गतौ' (२९४) च्यु । वर्त्त० ते । अनेन अव० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) च्यवते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'अधो म-न-याम्' (२।७८) य्लुक् **चवइ** ।

**[ रवइ ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । वर्त्त० तिव् । अनेन अव० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) रवति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रवइ** ।

**[ कवइ ]** टुक्षु (१०८४) - रु (१०८५) - 'कुंक् शब्दे' (१०८६) कु । वर्त्त० तिव् । अनेन अव० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कवति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कवइ** ।

**[ सवइ ]** 'षुंक् प्रसवैश्वर्ययोः' (१०७८) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । वर्त्त० तिव् । अनेन अव० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) सवति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सवइ**।

**[ पसवइ ]** प्रपूर्व० 'षुंक् प्रसवैश्वर्ययोः' (१०७८) षु । 'षः सोऽष्ट्यै०' (२।३।९८) सु । वर्त्त० तिव् । अनेन अव० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रसवति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पसवइ** ॥२३३॥

## ऋवर्णस्याऽरः ॥ ८।४।२३४ ॥

धातोरन्त्यस्य ऋवर्णस्य अरादेशो भवति ॥

करइ । धरइ । मरइ । वरइ । सरइ । हरइ । तरइ । जरइ ॥

**[ ऋवर्णस्याऽरः ]** ऋवर्ण षष्ठी ङस् । अर प्रथमा सि ।

**[ करइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । अनेन कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) करति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करइ** ।

**[ धरइ ]** 'धृंग् धारणे' (८८७) धृ । वर्त्त० तिव् । अनेन धृ० → धर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) धरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धरइ** ।

**[ मरइ ]** 'मृंत् प्राणत्यागे' (१३३२) मृ । वर्त्त० ते । अनेन मृ० → मर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) मरते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **मरइ** ।

**[ वरइ ]** 'वृग्ट् वरणे' (१२९४) वृ । वर्त्त० तिव् । अनेन वृ० → वर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वरइ** ।

**[ सरइ ]** 'सृं गतौ' (२५) सृ । वर्त्त० तिव् । अनेन सृ० → सर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) सरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सरइ** ।

**[ हरइ ]** 'हृंग् हरणे' (८८५) हृ । वर्त्त० तिव् । अनेन हृ० → हर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हरइ** ।

**[ तरइ ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । वर्त्त० तिव् । अनेन तॄ० → तर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तरइ** ।

**[ जरइ ]** 'जॄष्च् जरसि' (११४५) जॄ । वर्त्त० तिव् । अनेन जॄ० → जर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) जरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जरइ** ॥२३४॥

## वृषादीनामरिः ॥ ८।४।२३५ ॥

वृष इत्येवंप्रकाराणां धातूनां ऋवर्णस्य अरिः इत्यादेशो भवति ॥

वृष् - वरिसइ । कृष् - करिसइ । मृष् - मरिसइ । हृष् - हरिसइ । येषामरिरादेशो दृश्यते ते वृषादयः ॥

**[ वृषादीनामरिः ]** वृषादि षष्ठी आम् । अरि प्रथमा सि ।

**[ वरिसइ ]** 'वृषू सेचने' (५२७) वृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन अरि० - वृ० → वरि० । 'श-षोः सः' (१।२६०) ष० → स० । 'लोकात्' (१।१।३) वरिसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वरिसइ** ।

**[ करिसइ ]** 'कृषींत् विलेखने' (१३१९) कृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन अरि० → कृ० → करि० । 'श-षोः सः' (१।२६०) ष० → स० । 'लोकात्' (१।१।३) करिसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करिसइ** ।

**[ मरिसइ ]** 'मृषीच् तितिक्षायाम्' (१२८४) मृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन अरि० → मृ० → मरि० । 'श-षोः सः' (१।२६०) ष० → स० । 'लोकात्' (१।१।३) मरिसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मरिसइ** ।

**[ हरिसइ ]** 'हृषू अलीके' (५३५) हृष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । अनेन अरि० - हृ० → हरि० । 'श-षोः सः' (१।२६०) ष० → स० । 'लोकात्' (१।१।३) हरिसति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हरिसइ** ॥२३५॥

## रुषादीनां दीर्घः ॥ ८।४।२३६ ॥

रुष इत्येवंप्रकाराणां धातूनां स्वरस्य दीर्घो भवति ॥

रूसइ । तूसइ । सूसइ । दूसइ । पूसइ । सीसइ इत्यादि ॥

**[ रुषादीनां दीर्घः ]** रुषादि षष्ठी आम् । दीर्घ प्रथमा सि ।

**[ रूसइ ]** 'रुषंच् रोषे' (१२१५) रुष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रुषति । 'श-षोः सः' (१।२६०) ष० → स० । अनेन दीर्घः-रु० → रू० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रूसइ** ।

**[ तूसइ ]** 'तुषं तुष्टौ' (१२१३) तुष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) तुषति । 'श-षोः सः' (१।२६०) ष० → स० । अनेन दीर्घः- तु० → तू० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **तूसइ** ।

**[ सूसइ ]** 'शुषंच् शोषणे' (१२०८) शुष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) शुषति । 'श-षोः सः' (१।२६०) शु० → सु० - ष० → स० । अनेन दीर्घः- सु० → सू० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सूसइ** ।

**[ दूसइ ]** 'दुषंच् वैकृत्ये' (१२०९) दुष् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) दुषति । 'श-षोः सः' (१।२६०) ष० → स० । अनेन दीर्घः - दु० → दू० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दूसइ** ।

**[ पूसइ ]** 'पुषश् पुष्टौ' (१५६४) पुष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) पुषति । 'श-षोः सः' (१।२६०) ष० → स० । अनेन दीर्घः- पु० → पू० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पूसइ** ।

**[ सीसइ ]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) शिषति । 'श-षोः सः' (१।२६०) शि० → सि० - ष० → स० । अनेन दीर्घः - सि० → सी० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सीसइ** ॥२३६॥

## युवर्णस्य गुणः ॥ ८।४।२३७ ॥

धातोरिवर्णस्य उवर्णस्य च किङ्त्यपि गुणो भवति ॥

जेऊण । नेऊण । नेइ । नेन्ति । उड्डेइ । उड्डेन्ति । मोत्तूण । सोऊण । क्वचिन्न भवति - नीओ । उड्डीणो ॥

**[ युवर्णस्य गुणः ]** युवर्ण षष्ठी ङस् । गुण प्रथमा सि ।

**[ जेऊण ]** 'जिं अभिभवे' (८) जि । जयनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । अनेन गुणः - जि० → जे० । 'क-ग-च-ज०' (१।१७७) त्लुक् **जेऊण** ।

**[ नेऊण ]** 'णींग् प्रापणे' (८८४) णी । 'आदेष्णोऽष्व०' (शाकटायने (४।२।२६१) ('पाठे धात्वादे०' (२।३।९७)) णी० → नी० । नयनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण-तुआणाः' (२।१४६) क्त्वा० → तूण० । अनेन गुणः - नी० → ने० । 'क-ग-च-ज०' (१।१७७) त्लुक् **नेऊण** ।

**[ नेइ ]** नी । वर्त्त० तिव् । अनेन गुणः - नी० → ने० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नेइ** ।

**[ नेन्ति ]** नी । वर्त्त० अन्ति । अनेन गुणः - नी० → ने० । 'बहुष्वाद्यस्य न्ति-न्ते-इरे' (३।१४२) अन्ति० → न्ति० **नेन्ति** ।

**[ उड्डेइ ]** उत्पूर्व० 'डीङ् विहायसां गतौ' (५८८) डी । वर्त्त० ते । अनेन गुणः - डी० → डे० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं - डे० → ड्डे० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उड्डेइ**।

**[ उड्डेन्ति ]** उत्पूर्व० 'डीङ् विहायसां गतौ' (५८८) डी । वर्त्त० अन्ते । अनेन गुणः - डी० → डे० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं - उडे० → उड्डे० । 'बहुष्वाद्यस्य०' (३।१४२) अन्ते० → न्ति० **उड्डेन्ति** ।

**[ मोत्तूण ]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् । मोचनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तू०' (२।१४६) क्त्वा० → तूण० । अनेन गुणः - मु० → मो० । 'रुद-भुज-मुचां तोऽन्त्यस्य' (४।२१२) च्० → त्० । 'लोकात्' (१।१।३) मोत्-**मोत्तूण** ।

**[ सोऊण ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । श्रवणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तू०' (२।१४६) क्त्वाप्र० → तूण० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन गुणः सु० → सो० । 'क-ग-च-ज०' (१।१७७) त्लुक् **सोऊण** ।

**[ नीओ ]** नी । क्ते सति **नीओ** ।

**[ उड्डीणो ]** उड्डी । 'क्तेनाऽप्फुण्णादयः' (४।२५८) क्तस्य नकारे कृते **उड्डीणो** ॥२३७॥

## स्वराणां स्वराः ॥ ८।४।२३८ ॥

धातुषु स्वराणां स्थाने स्वरा बहुलं भवन्ति ॥

हवइ । हिवइ । चिणइ । चुणइ । सद्दहणं । सद्दहाणं । धावइ । धुवइ । रुवइ । रोवइ । **क्वचिन्नित्यम्** - देइ । लेइ । विहेइ । नासइ । आर्षे-बेमि ॥

**[ स्वराणां स्वराः ]** स्वर षष्ठी आम् । स्वर प्रथमा जस् ।

**[ हवइ हिवइ ]** 'भू सत्तायाम्' (१) भू(२) । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हव० । शेषं सुगमम् । अस्य कार्यम् । **हवइ हिवइ** ।

**[ चिणइ चुणइ ]** 'चिंग्ट् चयने' (१२९०) चि (२) । 'चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च' (४।२४१) ण आगमः । शेषं सुगमम् । अस्य कार्यम् । **चिणइ चुणइ** ।

**[ सद्दहणं सद्दहाणं ]** श्रद्पूर्व० 'डुधांग्क् धारणे च' (११३९) धा (२) । 'श्रदो धो दहः' (४।९) धा० → दह० इति । श्रद्धीयते इति सद्दहणं । 'भावे' (५।३।१२२) अनट्प्र० → अन । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'अनादौ०' (२।८९) द्वित्वं - द्द० । 'लुक्' (१।१०)

अलुक्। 'लोकात्' (१।१।३) सद्दहन । 'नो णः' (१।२२८) न० → ण० । अस्य कार्यम् । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सद्दहणं सद्दहाणं** ।

**[ धावइ धुवइ ]** 'धावूग् गति-शुद्ध्योः' (९२०) धाव् (२) । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) धावति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन द्वितीये धा० → धु० **धावइ धुवइ** ।

**[ रुवइ रोवइ ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'रुद-नमोर्वः' (४।२२६) द० → व० । 'लोकात्' (१।१।३) रुवति । अनेन द्वितीये रु० → रो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रुवइ रोवइ** ।

**[ देइ ]** 'डुदांग्क् दाने' (११३८) दा । वर्त्त० तिव् । अनेन दा० → दे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **देइ** ।

**[ लेइ ]** 'लांक् आदाने' (१०६८) ला । वर्त्त० तिव् । अनेन ला० → ले० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **लेइ** ।

**[ विहेइ ]** विपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । वर्त्त० तिव् । 'ख-घ-थ-ध-भाम्' (१।१८७) धा० → हा० । अनेन हा० → हे० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **विहेइ** ।

**[ नासइ ]** 'नशौच् अदर्शने' (१२०२) नश् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) नशति । 'श-षोः सः' (१।२६०) श० → स० । अनेन न० → ना० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **नासइ** ।

**[ बेमि ]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'सर्वत्र०' (२।७९) र्लुक् । अनेन बू० → बे० **बेमि** ॥२३८॥

## व्यञ्जनाददन्ते ॥ ८।४।२३९ ॥

व्यञ्जनान्ताद्धातोरन्ते अकारो भवति ॥

भमइ । हसइ । कुणइ । चुम्बइ । भणइ । उवसमइ । पावइ । सिञ्चइ । रुन्धइ । मुसइ । हरइ । करइ । शवादीनां च प्रायः प्रयोगो नास्ति ॥

**[ व्यञ्जनाददन्ते ]** व्यञ्जन पञ्चमी ङसि । अदन्त सप्तमी ङि ।

**[ भमइ ]** 'भ्रमू चलने' (९७०) भ्रम् । वर्त्त० तिव् । अनेन अत् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भमइ** ।

**[ हसइ ]** 'हसे हसने' (५४५) हस् । वर्त्त० तिव् । अनेन अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हसइ** ।

**[ कुणइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृगेः कुणः' (४।६५) कृ० → कुण० । अनेन अत् । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) कुणति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **कुणइ** ।

**[ चुम्बइ ]** 'चुबु वक्त्रसंयोगे' (३७१) चुब् । वर्त्त० तिव् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । अनेन अत् । 'लोकात्' (१।१।३) चुम्बति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चुम्बइ** ।

**[ भणइ ]** 'भण शब्दे' (२६४) भण् । वर्त्त० तिव् । अनेन अत् । 'लोकात्' (१।१।३) भणति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **भणइ** ।

**[ उवसमइ ]** उपपूर्व० 'शमू उपशमे' (१२३०) शम् । वर्त्त० तिव् । अनेन अत् । **'लोकात्'** (१।१।३) उपशमति । 'श-षोः सः' (१।२६०) श० → स० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । **'पो वः'** (१।२३१) प० → व० **उवसमइ** ।

**[ पावइ ]** प्रपूर्व० 'आप्लृंट् व्याप्तौ' (१३०७) आप् । वर्त्त० तिव् । अनेन अत् । **'लोकात्'** (१।१।३) प्रापति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'समानानां०' (१।२।१) दीर्घः । 'पो वः' (१।२३१) प० → व० । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **पावइ** ।

**[ सिञ्चइ ]** 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिच् । वर्त्त० तिव् । अनेन अत् । 'लोकात्' (१।१।३) सिचति । 'सिचेः सिञ्च-सिम्पौ' (४।९६) सिच० → सिञ्च० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सिञ्चइ** ।

**[ रुन्धइ ]** 'रुधृंपी आवरणे' (१४७३) रुध् । वर्त्त० तिव् । **'रुधो न्ध-म्भौ च'** (४।२१८) ध० → न्ध० । अनेन अत् । 'लोकात्' (१।१।३) रुन्धति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **रुन्धइ** ।

**[ मुसइ ]** 'मुसच् खण्डने' (१२२८) मुस् । वर्त्त० तिव् । अनेन अत् । **'लोकात्'** (१।१।३) **मुसति** । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **मुसइ** ।

**[ हरइ ]** 'हृंग् हरणे' (८८५) हृ । वर्त्त० तिव् । **'ऋवर्ण०'** (४।२३४) हृ० → हर० । अनेन अत् । **'लोकात्'** (१।१।३) हरति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हरइ** ।

**[ करइ ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । **'ऋवर्ण०'** (४।२३४) कृ० → कर० । अनेन अत् । **'लोकात्'** (१।१।३) करति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **करइ** ॥२३९॥

## स्वरादनतो वा ॥ ८।४।२४० ॥

अकारान्तवर्जितात् स्वरान्ताद्धातोरन्ते अकारागमो वा भवति ॥

पाइ पाअइ । धाइ धाअइ । जाइ जाअइ । झाइ झाअइ । जम्भाइ जम्भाअइ । उव्वाइ उव्वाअइ । मिलाइ मिलाअइ । विक्केइ विक्केअइ । होऊण होइऊण । अनत इति किम् ? चिइच्छइ । दुगुच्छइ ॥

**[ स्वरादनतो वा ]** स्वर पञ्चमी ङसि । न अत् = अनत्, तस्मात् = अनतः । **पञ्चमी ङसि** । **वा प्रथमा सि** ।

**[ पाइ पाअइ ]** 'पां पाने' (२) पा (२) । वर्त्त० तिव् । अनेन द्वितीये अत् । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **पाइ पाअइ** ।

**[ धाइ धाअइ ]** 'डुधांग्क् धारणे च' (११३९) धा० । वर्त्त० तिव् । अनेन द्वितीये अत् । **'त्यादीनामाद्य०'** (३।१३९) तिव्० → इ० **धाइ धाअइ** ।

**[ जाइ जाअइ ]** 'ज्यांश् हानौ' (१५२४) ज्या (२) । वर्त्त० तिव् । अनेन वा अत् । **'अधो म-न-याम्'** (२।७८) य्लुक् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जाइ जाअइ** ।

**[ झाइ झाअइ ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'स्वराणां स्वराः' (४।२३८) ध्यै० → ध्या० (२) । **'ध्या-गोर्झा-गौ'** (४।६) ध्या० → झा० । वर्त्त० तिव् । अनेन वा अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **झाइ झाअइ** ।

**[ जम्भाइ जम्भाअइ ]** जभुङ् (७८२) - जभैङ् (७८३) - 'जृभुङ् गात्रविनामे' (७८४) जृभ्, अविपूर्व० । 'अवेर्जृम्भो जम्भा' (४।१५७) अविसहितस्य जृम्भो जम्भा इत्यादेशः । वर्त्त० ते । अनेन वा अत् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **जम्भाइ जम्भाअइ** ।

**[ उव्वाइ उव्वाअइ ]** उत्पूर्व० 'वांक् गति-गन्धनयोः' (१०६२) वा । वर्त्त० तिव् । अनेन वा अत् । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं - वा० → व्वा० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **उव्वाइ उव्वाअइ** ।

**[ मिलाइ मिलाअइ ]** 'म्लैं गात्रविनामे' (३२) म्लै । 'स्वराणां०' (४।२३८) म्लै० → म्ला० (२) । वर्त्त० तिव् । 'लात्' (२।१०६) लात्पूर्व इ० । 'लोकात्' (१।१।३) मिलाति । अनेन वा अत् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **मिलाइ मिलाअइ** ।

**[ विक्केइ विक्केअइ ]** विपूर्व० 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री (२) । वर्त्त० तिव् । अनेन वा अत् । 'क्रियः किणो वेस्तु क्के च' (४।५२) क्री० → क्के० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **विक्केइ विक्केअइ** ।

**[ होऊण होइऊण ]** 'भू सत्तायाम्' (१) भू (२) । क्त्वाप्र० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'क्त्वस्तुमत्तूण०' (२।१४६) क्त्वा० → तूण० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन वा अत् । 'एच्च क्त्वा-तुम्०' (३।१५७) अ० → इ० **होऊण होइऊण** ।

**[ चिइच्छइ ]** चिकित्स । वर्त्त० तिव् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'ह्रस्वात् थ्य-श्च-त्स०' (२।२१) त्स० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय०' (२।९०) पूर्वछस्य चः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चिइच्छइ** ।

**[ दुगुच्छइ ]** जुगुप्स । वर्त्त० तिव् । 'जुगुप्सेर्झुण-दुगुच्छ-दुगुञ्छाः' (४।४) दुगुच्छ आदेशः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **दुगुच्छइ** ॥२४०॥

### चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च ॥ ८।४।२४१ ॥

च्यादीनां धातूनामन्ते णकारागमो भवति, एषां स्वरस्य दीर्घस्य ह्रस्वो भवति ॥

चि-चिणइ । जि-जिणइ । श्रु-सुणइ । हु-हुणइ । स्तु-थुणइ । लू-लुणइ । पू-पुणइ । धूग्-धुणइ ॥

बहुलाधिकारात् क्वचिद्विकल्पः- उच्चिणइ उच्चेइ । जेऊण जिणिऊण । जयइ जिणइ । सोऊण सुणिऊण ॥

**[ चि-जि-श्रु-हु-स्तु-लू-पू- धूगाम् ]** चि-जि-श्रु-हु-स्तु-लू-पू-धूग् षष्ठी आम् ।

**[ णो ह्रस्वश्च ]** ण प्रथमा सि । ह्रस्व प्रथमा सि । च प्रथमा सि ।

**[ चिणइ ]** 'चिंग्ट् चयने' (१२९०) चि । वर्त्त० तिव् । अनेन ण आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **चिणइ** ।

**[ जिणइ ]** 'जिं अभिभवे' (८) जि । वर्त्त० तिव् । अनेन ण आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जिणइ** । जयतीत्यर्थः ।

१. E. H. J. M. च ।

**[ सुणइ ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । वर्त्त० तिव् । अनेन ण आगमः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **सुणइ** ।

**[ हुणइ ]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । वर्त्त० तिव् । अनेन ण आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **हुणइ** । होमं करोतीत्यर्थः ।

**[ थुणइ ]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) स्तु । वर्त्त० तिव् । अनेन ण आगमः । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तु० → थु० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **थुणइ** ।

**[ लुणइ ]** 'लूग्श् छेदने' (१५१९) लू । वर्त्त० तिव् । अनेन ण आगमः- ह्रस्वश्च- लू० → लु० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **लुणइ** ।

**[ पुणइ ]** 'पूग्श् पवने' (१५१८) पू । वर्त्त० तिव् । अनेन ण आगमः- ह्रस्वश्च- पू० → पु० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **पुणइ** ।

**[ धुणइ ]** 'धूग्ट् कम्पने' (१२९१) धू । वर्त्त० तिव् । अनेन ण आगमः - ह्रस्वश्च - धू० → धु० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **धुणइ** ।

**[ उच्चिणइ उच्चेइ ]** उत्पूर्व० 'चिंग्ट् चयने' (१२९०) चि (२) । वर्त्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) चि० → चे० । द्वितीये 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ' (२।८९) द्वित्वम् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । अनेन प्रथमे ण आगमः **उच्चिणइ उच्चेइ** ।

**[ जेऊण जिणिऊण ]** 'जिं अभिभवे' (८) जि (२) । जयनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण०' (२।१४६) क्त्वा० → तूण० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमे 'युवर्णस्य गुणः' (४।२३७) जि० → जे० । द्वितीये अनेन ण आगमः । 'एच्च क्त्वा०' (३।१५७) ण० → णि० **जेऊण जिणिऊण** ।

**[ जयइ जिणइ ]** 'जिं अभिभवे' (८) जि (२) । वर्त्त० तिव् । प्रथमे 'स्वरादनतो वा' (४।२४०) अत् । 'युवर्णस्य गुणः' (४।२३७) जि० → जे० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लोकात्' (१।१।३) जयति । द्वितीये अनेन ण आगमः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **जयइ जिणइ** ।

**[ सोऊण सुणिऊण ]** 'श्रुंट् श्रवणे' (१२९६) श्रु (२) । श्रवणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'क्त्वस्तुमत्तूण०' (२।१४६) क्त्वा० → तूण० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । प्रथमे 'युवर्णस्य गुणः' (४।२३७) सु० → सो० । द्वितीये अनेन ण आगमः । 'एच्च क्त्वा०' (३।१५७) ण० → णि० **सोऊण सुणिऊण** ॥२४१॥

## नवा कर्म-भावे व्वः क्यस्य च लुक् ॥ ८।४।२४२ ॥

च्यादीनां कर्मणि भावे च वर्तमानानामन्ते द्विरुक्तो वकारागमो वा भवति, तत्संनियोगे च क्यस्य लुक् ॥

चिव्वइ चिणिज्जइ । जिव्वइ जिणिज्जइ । सुव्वइ सुणिज्जइ । हुव्वइ हुणिज्जइ । थुव्वइ थुणिज्जइ । लुव्वइ लुणिज्जइ । पुव्वइ पुणिज्जइ । धुव्वइ धुणिज्जइ ॥ एवं भविष्यति-चिव्विहिइ इत्यादि ॥

**[ नवा कर्म-भावे व्वः क्यस्य च लुक् ]** नवा प्रथमा सि । कर्म-भाव सप्तमी ङि । व्व प्रथमा सि । क्य षष्ठी ङस् । च प्रथमा सि । लुक् प्रथमा सि ।

**[ चिव्वइ चिणिज्जइ ]** 'चिंग्ट् चयने' (१२९०) चि (२) । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **चिव्वइ** । पक्षे- चि । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च' (४।२४१) ण आगम: । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) चिणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **चिणिज्जइ** ।

**[ जिव्वइ जिणिज्जइ ]** 'जिं अभिभवे' (८) जि । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० जिव्वइ । पक्षे- जि । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि०' (४।२४१) ण आगम: । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) जिणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **जिणिज्जइ** ।

**[ सुव्वइ सुणिज्जइ ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षो: स:' (१।२६०) शु० → सु० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **सुव्वइ** । पक्षे- सु । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि-श्रु०' (४।२४१) ण आगम: । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) सुणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **सुणिज्जइ** ।

**[ हुव्वइ हुणिज्जइ ]** 'हुंक् दाना-ऽदनयो:' (११३०) हु । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **हुव्वइ** । पक्षे - हु । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि-श्रु-हु०' (४।२४१) ण आगम: । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) हुणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **हुणिज्जइ** ।

**[ थुव्वइ थुणिज्जइ ]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'ष: सोऽष्ट्यै०' (२।३।९८) स्तु । 'स्तस्य थोऽसमस्त०' (२।४५) स्तु० → थु० । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् **थुव्वइ** । पक्षे- थु । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि-श्रु-हु-स्तु०' (४।२४१) ण आगम: । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) थुणिज्जते । 'त्यादीनामाद्य०' (३।१४९) ते० → इ० **थुणिज्जइ** ।

**[ लुव्वइ लुणिज्जइ ]** 'लूग्श् छेदने' (१५१९) लू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् **लुव्वइ** । पक्षे- लू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि०' (४।२४१) ण आगम: -ह्रस्वश्च । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) लुणिज्जते । 'त्यादीनामाद्य०' (३।१३०) ते० → इ० **लुणिज्जइ** ।

**[ पुव्वइ पुणिज्जइ ]** 'पूग्श् पवने' (१५१८) पू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् **पुव्वइ** । पक्षे- पू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि०' (४।२४१) ण आगम:- ह्रस्वश्च । 'लुक्' (१।१०) णस्य अलुक् । 'लोकात्' (१।१।३) पुणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **पुणिज्जइ** ।

**[ धुव्वइ धुणिज्जइ ]** 'धूग्ट् कम्पने' (१२९१) धू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । अनेन वा व्व० - क्यस्य च लुक् **धुव्वइ** । पक्षे - धू । वर्त्त० ते । 'क्य: शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-

इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'चि-जि०' (४।२४१) ण आगमः - ह्रस्वश्च । 'लुक्' (१।१०) णस्य अलुक्। 'लोकात्' (१।१।३) धुणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **धुणिज्जइ** ।

**[ चिव्विहिइ ]** 'चिंग्ट् चयने' (१२९०) चि । भविष्यन्ती स्यते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन व्व आगमः - क्यस्य च लुक् । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा-तुम्०' (३।१५७) व्व० → व्वि० । 'त्यादीनामाद्य०' (३।१३९) स्यते० → इ० **चिव्विहिइ** ॥२४२॥

## म्मश्चेः ॥ ८।४।२४३ ॥

चिगः कर्मणि भावे चान्ते संयुक्तो मो वा भवति, तत्संयोगे क्यस्य च लुक् ॥

चिम्मइ चिव्वइ चिणिज्जइ । भविष्यति - चिम्मिहिइ चिव्विहिइ चिणिहिइ ॥

**[ म्मश्चेः ]** म्म प्रथमा सि । चि षष्ठी ङस् ।

**[ चिम्मइ चिव्वइ चिणिज्जइ ]** 'चिंग्ट् चयने' (१२९०) चि । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन म्म आगमः- क्यलुक् च **चिम्मइ चिव्वइ चिणिज्जइ** । पूर्वसूत्रद्वयेन सिद्धम् ।

**[ चिम्मिहिइ चिव्विहिइ चिणिहिइ ]** चि । भविष्यन्ती स्यते । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । सूत्रत्रयस्यापि उदाहरणानि । **चिम्मिहिइ चिव्विहिइ चिणिहिइ** ॥२४३॥

## हन्-खनोऽन्त्यस्य ॥ ८।४।२४४ ॥

अनयोः कर्म-भावेऽन्त्यस्य द्विरुक्तो मो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

हम्मइ हणिज्जइ । खम्मइ खणिज्जइ । भविष्यति - हम्मिहिइ हणिहिइ । खम्मिहिइ खणिहिइ ॥

बहुलाधिकाराद्धन्तेः कर्त्तर्यपि - हम्मइ । हन्तीत्यर्थः । क्वचिन्न भवति - हन्तव्वं । हन्तूण । हओ ॥

**[ हन्खनोऽन्त्यस्य ]** हन् - खन् षष्ठी ङस् । अन्त्य षष्ठी ङस् ।

**[ हम्मइ हणिज्जइ हम्मिहिइ हणिहिइ ]** 'हनंक् हिंसागत्योः' (११००) हन् (४) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा म्म आगमः । यत्र म्मस्तत्र क्यलुक् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । यत्र म्मो नायातस्तत्र 'ईअ-इज्जौ क्यस्य' (३।१६०) इज्ज आदेशः । 'नो णः' (१।२२८) नि० → णि० । 'लोकात्' (१।१।३) हणिज्जते । **हम्मइ हणिज्जइ** । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **हम्मिहिइ हणिहिइ** ।

**[ खम्मइ खणिज्जइ खम्मिहिइ खणिहिइ ]** 'खनूग् अवदारणे' (९१३) खन् (४) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा म्म आगमः । यत्र म्मस्तत्र क्यलुक् । 'अन्त्य०' (१।११) न्लुक् । यत्र म्मो नायातस्तत्र 'ईअ-इज्जौ क्यस्य' (३।१६०) इज्ज आदेशः । 'नो णः' (१।२२८) नि० → णि० । 'लोकात्' (१।१।३) खणिज्जते । **खम्मइ खणिज्जइ** । 'भविष्यति हिरादिः' (३।१६६) हि आगमः **खम्मिहिइ खणिहिइ** ।

**[ हम्मइ ]** बहुलाधिकाराद्धन्तेः कर्त्तर्यपि म्म आगमः । हम्मइ ।

**[ हंतव्वं ]** हन् । तव्यप्र० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं- व्व० । 'ङ-ञ-ण-नो व्यञ्जने' (१।२५) नकारस्य अनुस्वारः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **हंतव्वं** ।

**[ हन्तूण हओ ]** हन् । क्त्वाप्र० । 'क्त्वस्तुमत्तूण०' (२।१४६) क्त्वा० → तूण० **हन्तूण** । क्तप्रत्यये 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलोपः **हओ** ॥२४४॥

## ब्भो दुह-लिह-वह-रुधामुच्चातः ॥ ८।४।२४५ ॥

दुहादीनामन्त्यस्य कर्म-भावे द्विरुक्तो भो वा भवति, तत्संनियोगे क्यस्य च लुक्, वहेरकारस्य च उकारः ॥

दुब्भइ दुहिज्जइ । लिब्भइ लिहिज्जइ । वुब्भइ वहिज्जइ । रुब्भइ रुन्धिज्जइ । भविष्यति-दुब्भिहिइ दुहिहिइ इत्यादि ॥

**[ ब्भो दुह-लिह-वह-रुधामुच्चातः ]** ब्भ प्रथमा सि । दुह-लिह-वह-रुध् षष्ठी आम् । उत् प्रथमा सि । च प्रथमा सि । अत् षष्ठी ङस् ।

**[ दुब्भइ दुहिज्जइ ]** 'दुहींक् क्षरणे' (११२७) दुह् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ह० → ब्भ० । यत्र ब्भस्तत्र क्यलुक् । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **दुब्भइ दुहिज्जइ** ।

**[ लिब्भइ लिहिज्जइ ]** 'लिहींक् आस्वादने' (११२९) लिह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ह० → ब्भ० । यत्र ब्भस्तत्र क्यलुक् । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **लिब्भइ लिहिज्जइ** ।

**[ वुब्भइ वहिज्जइ ]** 'वहीं प्रापणे' (९९६) वह् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ह० → ब्भ० - क्यलुक्- व० → वु० । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) वहिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वुब्भइ वहिज्जइ** ।

**[ रुब्भइ रुन्धिज्जइ ]** 'रुधृंपी आवरणे' (१४७३) रुध् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ध० → ब्भ० - क्यलुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'रुधो न्ध-म्भौ च' (४।२१८) ध० → न्ध० । 'लोकात्' (१।१।३) रुन्धिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **रुब्भइ रुन्धिज्जइ** ।

**[ दुब्भिहिइ दुहिहिइ ]** दुह् (२) । भविष्यन्ती स्यते । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन वा ह० → ब्भ० । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) ब्भ० → ब्भि० - ह० → हि० **दुब्भिहिइ दुहिहिइ** ॥२४५॥

## दहो ज्झः ॥ ८।४।२४६ ॥

दहोऽन्त्यस्य कर्म-भावे द्विरुक्तो झो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

डज्झइ डहिज्जइ । भविष्यति - डज्झिहिइ डहिहिइ ॥

**[ दहो ज्झः ]** दह् षष्ठी ङस् । ज्झ प्रथमा सि ।

**[ डज्झइ डहिज्जइ ]** 'दहं भस्मीकरणे' (५५२) दह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा हस्य ज्झ-क्यस्य च लुक् । 'दंश-दहोः' (१।२१८) द० → ड० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **डज्झइ** ।

पक्षे- दह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) दहिज्जते । 'दंश-दहोः' (१।२१८) द० → ड० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **डहिज्जइ** ।

**[ डज्झिहिइ डहिहिइ ]** दह् । भविष्यन्ती स्यते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा हस्य ज्झ-क्यस्य च लुक् । 'दंश-दहोः' (१।२१८) द० → ड० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा-तुम्०' (३।१५७) ज्झ० → ज्झि० । 'त्यादीनामाद्य०' (३।१३९) स्यते० → इ० **डज्झिहिइ** ।

पक्षे - दह् । भविष्यन्ती स्यते । 'दंश-दहोः' (१।२१८) द० → ड० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा०' (३।१५७) ह० → हि० **डहिहिइ** ॥२४६॥

## बन्धो न्धः ॥ ८।४।२४७ ॥

बन्धेर्धातोरन्त्यस्य न्ध इत्यवयवस्य कर्म-भावे ज्झो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

बज्झइ बन्धिज्जइ । भविष्यति-बज्झेहिइ[1] बन्धिहिइ ॥

**[ बन्धो न्धः ]** बन्ध् षष्ठी ङस् । न्ध प्रथमा सि (न्ध् षष्ठी ङस्) ।

**[ बज्झइ बन्धिज्जइ ]** 'बन्धंश् बन्धने' (१५५२) बन्ध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा न्धस्य ज्झः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **बज्झइ** । पक्षे- 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० **बन्धिज्जइ** ।

**[ बज्झेहिइ बन्धिहिइ ]** बन्ध् । भविष्यन्ती स्यते । अनेन वा न्धस्य ज्झः । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा-तुम्०' (३।१५७) एत्वं-इत्वं च । अस्य कार्यम् । **बज्झेहिइ बन्धिहिइ** ॥२४७॥

## समनूपाद्रुधेः ॥ ८।४।२४८ ॥

समनूपेभ्यः परस्य रुधेरन्त्यस्य कर्म-भावे ज्झो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

संरुज्झइ । अणुरुज्झइ । उवरुज्झइ । पक्षे-संरुन्धिज्जइ । अणुरुन्धिज्जइ । उवरुन्धिज्जइ । भविष्यति-संरुज्झिहिइ । संरुन्धिहिइ इत्यादि ॥

**[ समनूपाद्रुधेः ]** सम्-अनु-उप पञ्चमी ङसि । रुधि षष्ठी ङस् ।

**[ संरुज्झइ संरुन्धिज्जइ ]** सम्पूर्व० 'रुधूंपी आवरणे' (१४७३) रुध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा धस्य ज्झ - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **संरुज्झइ** । पक्षे- 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'रुधो न्ध-म्भौ च' (४।२१८) ध० → न्ध० **संरुन्धिज्जइ** ।

**[ अणुरुज्झइ अणुरुन्धिज्जइ ]** अनुपूर्व० रुध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा धस्य ज्झ-क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । 'नो णः' (१।२२८) नु० → णु० **अणुरुज्झइ** । पक्षे- 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'रुधो न्ध-म्भौ च' (४।२१८) ध० → न्ध० **अणुरुन्धिज्जइ** ।

**[ उवरुज्झइ उवरुन्धिज्जइ ]** उपपूर्व० रुध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा धस्य ज्झ-क्यस्य च लुक् । 'पो वः' (१।२३१) प० → व० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **उवरुज्झइ** । पक्षे- 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'रुधो न्ध-म्भौ च' (४।२१८) ध० → न्ध० **उवरुन्धिज्जइ** ।

**[ संरुज्झिहिइ संरुन्धिहिइ ]** सम्पूर्व० रुध् । भविष्यन्ती स्यते । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन वा धस्य ज्झः । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) इत्वम् । 'त्यादीनामाद्य०' (३।१३९) स्यते० → इ० **संरुज्झिहिइ** ।

---

१. E. H. I. J. M. बज्झिहिइ ।

पक्षे- 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'एच्च क्त्वा-तुम्०' (३।१५७) इत्वम् । 'रुधो न्ध-म्भौ च' (४।२१८) ध० → न्ध० **संरुन्धिहिइ** ॥२४८॥

## गमादीनां द्वित्वम् ॥ ८।४।२४९ ॥

गमादीनामन्त्यस्य कर्म-भावे द्वित्वं वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

गम्- गम्मइ गमिज्जइ । हस्-हस्सइ हसिज्जइ । भण्-भण्णइ भणिज्जइ । छुप्-छु(छि)प्पइ छुविज्जइ । 'रुद-नमोर्वः' (४।२२६) इति कृतवकारादेशो रुदिरत्र पठ्यते । रुव्-रुव्वइ रुविज्जइ । लभ्-लब्भइ लहिज्जइ । कथ्-कत्थइ कहिज्जइ । भुज्-भुज्जइ भुज्जिज्जइ । भविष्यति-गम्मिहिइ गमिहिइ इत्यादि ॥

**[ गमादीनां द्वित्वम् ]** गमादि षष्ठी आम् । द्वित्व प्रथमा सि ।

**[ गम्मइ गमिज्जइ ]** 'गम्लृं गतौ' (३९६) गम्(२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा म० → म्म० - क्यलुक् च । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) गमिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **गम्मइ गमिज्जइ** ।

**[ हस्सइ हसिज्जइ ]** 'हसे हसने' (५४५) हस् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा स्० → स्स्० - क्यलुक् च । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हस्सते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) हसिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **हस्सइ हसिज्जइ** ।

**[ भण्णइ भणिज्जइ ]** 'भण शब्दे' (२६४) भण् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ण्० → ण्ण० - क्यलुक् च । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भण्णते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) भणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **भण्णइ भणिज्जइ** ।

**[ छु( छि )प्पइ छुविज्जइ ]** 'छुपंत् स्पर्शे' (१३७५) छुप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा प्प-क्यलुक् च । 'लोकात्' (१।१।३) छुप्पते । 'स्वराणां स्वराः' (४।२३८) छु० → छि० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **छिप्पइ** । पक्षे- 'छुपंत् स्पर्शे' (१३७५) छुप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) छुपिज्जते । 'पो वः' (१।२३१) पि० → वि० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **छुविज्जइ** ।

**[ रुव्वइ रुविज्जइ ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद्(२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'रुद-नमोर्वः' (४।२२६) द० → व० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । अनेन वा व्व० - क्यलुक् च । 'लोकात्' (१।१।३) रुव्वते । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) रुविज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **रुव्वइ रुविज्जइ** ।

**[ लब्भइ लहिज्जइ ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'व्यञ्जना०' (४।२३९) अत् । अनेन वा भ्भ० - क्यलुक् च । 'लोकात्' (१।१।३) लभ्भते । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वभस्य बः । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) लभिज्जते । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **लब्भइ लहिज्जइ** ।

**[ कत्थइ कहिज्जइ ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा थस्य द्वित्वम् - क्यस्य लुक् च । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'लोकात्' (१।१।३) कत्थते । द्वितीये 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'ख-घ-थ०' (१।१८७) थ० → ह० । 'लोकात्' (१।१।३) कहिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **कत्थइ कहिज्जइ** ।

**[ भुज्जइ भुञ्जिज्जइ ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'भुजो भुञ्ज-जिम-जेम०' (४।११०) भुञ्जादेशः । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारलोपः' । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ज्ज० - क्यस्य च लुक् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) भुज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **भुज्जइ** ।

पक्षे- भुज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'भुजो भुञ्ज-जिम-जेम०' (४।११०) भुञ्जादेशः । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) भुञ्जिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **भुञ्जिज्जइ** ।

**[ गम्मिहिइ गमिहिइ ]** 'गम्लृं गतौ' (३९६) गम् । भविष्यन्ती स्यते । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । अनेन वा द्वित्वं म्० → म्म्० । 'व्यञ्जना०' (४।२३९) अत् । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) इत्वम् । 'त्यादी०' (३।१३९) स्यते० → इ० **गम्मिहिइ** । पक्षे-गम् । भविष्यन्ती स्यते । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'त्यादीनामाद्य०' (३।१३९) स्यते० → इ० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गमहिइ । 'एच्च क्त्वा-तुम्०' (३।१५७) इत्वम् **गमिहिइ** ॥२४९॥

## ह-कृ-तृ-ज्रामीरः ॥ ८।४।२५० ॥

एषामन्त्यस्य ईर इत्यादेशो वा भवति, तत्संनियोगे च क्यलुक् ॥

हीरइ हरिज्जइ । कीरइ करिज्जइ । तीरइ तरिज्जइ । जीरइ जरिज्जइ ॥

**[ ह-कृ-तृ-ज्रामीरः ]** ह-कृ-तृ-जृ षष्ठी आम् । ईर प्रथमा सि ।

**[ हीरइ हरिज्जइ ]** 'हृंग् हरणे' (८८५) हृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा हृ० → हीर० इति - क्यस्य च लुक् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) हीरते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **हीरइ** ।

पक्षे- हृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ऋवर्णस्याऽरः' (४।२३४) हृ० → हर० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) हरिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **हरिज्जइ** ।

**[ कीरइ करिज्जइ ]** 'डुकृंग् करणे' (८८८) कृ । शेषं 'हीरइ हरिज्जइ' वत् ।

**[ तीरइ तरिज्जइ ]** 'तृ प्लवन-तरणयोः' (२७) तृ । शेषं 'हीरइ हरिज्जइ' वत् ।

**[ जीरइ जरिज्जइ ]** 'जृष्च् जरसि' (११४५) जृ । शेषं 'हीरइ हरिज्जइ' वत् ॥२५०॥

## अर्जेर्विढप्पः ॥ ८।४।२५१ ॥

अन्त्यस्येति निवृत्तम् ॥ अर्जेर्विढप्प इत्यादेशो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥

विढप्पइ । पक्षे- विढविज्जइ । अज्जिज्जइ ॥

**[ अर्जेर्विढप्पः ]** अर्जि षष्ठी ङस् । विढप्प प्रथमा सि ।

**[ विढप्पइ ]** 'अर्ज अर्जने' (१४२) अर्ज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा अर्ज० → विढप्प इति - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **विढप्पइ** । अर्जते इत्यर्थः ।

**[ विढविज्जइ ]** 'अर्ज अर्जने' (१४२) अर्ज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'अर्जेर्विढवः' (४।१०८) अर्ज० → विढव इति । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) विढविज्जते । 'त्यादी०' (३।१४९) ते० → इ० **विढविज्जइ** ।

**[ अज्जिज्जइ ]** 'अर्ज अर्जने' (१४२) अर्ज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लोकात्' (१।१।३) अर्जिज्जते । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ज० → ज्ज० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **अज्जिज्जइ** ॥२५१॥

## ज्ञो णव्व-णज्जौ ॥ ८।४।२५२ ॥

जानातेः कर्म-भावे णव्व-णज्ज इत्यादेशौ वा भवतः, तत्संनियोगे क्यस्य च लुक् ॥

णव्वइ । णज्जइ । पक्षे-जाणिज्जइ । मुणिज्जइ । 'म्न-ज्ञोर्णः' (२।४२) इति णादेशे तु णाइज्जइ । नञ्पूर्वकस्य अणाइज्जइ ॥

**[ ज्ञो णव्व-णज्जौ ]** ज्ञ्-ज्ञा षष्ठी ङस् । णव्व-णज्ज प्रथमा औ ।

**[ णव्वइ णज्जइ ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा ज्ञा० → णव्व-णज्ज इत्यादेशौ-क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **णव्वइ णज्जइ** । पक्षे-

**[ जाणिज्जइ मुणिज्जइ ]** ज्ञा (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण-मुण० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) जाणिज्जते मुणिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **जाणिज्जइ मुणिज्जइ** ।

**[ णाइज्जइ अणाइज्जइ ]** 'म्न-ज्ञोर्णः' (२।४२) इति णादेशे **णाइज्जइ** । नञि पूर्वे तु 'नञत्' (३।२।१२५) इति नकारस्य अकारे कृते **अणाइज्जइ** । न ज्ञायते इत्यर्थः ॥२५२॥

## व्याहृगेर्वाहिप्पः ॥ ८।४।२५३ ॥

व्याहरतेः कर्म-भावे वाहिप्प इत्यादेशो वा भवति, तत्संनियोगे क्यस्य च लुक् ॥ वाहिप्पइ । वाहरिज्जइ ॥

**[ व्याहृगेर्वाहिप्पः ]** व्याहृगि षष्ठी ङस् । वाहिप्प प्रथमा सि ।

**[ वाहिप्पइ वाहरिज्जइ ]** वि-आङ्पूर्व० 'हृंग् हरणे' (८८५) हृ(२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन वा उपसर्गेण सह हृस्थाने वाहिप्प इत्यादेशः - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वाहिप्पइ** । जल्पते इत्यर्थः ।

पक्षे- वि-आङ्पूर्व० हृ० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ऋवर्णस्याऽरः' (४।२३४) हृ० → हर० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० इति । 'अधो म-न-याम्' (२।७८) य्लुक् । 'लोकात्' (१।१।३) वाहरिज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **वाहरिज्जइ** ॥२५३॥

## आरभेराढप्पः ॥ ८।४।२५४ ॥

आङ्पूर्वस्य रभेः कर्म-भावे आढप्प आदेशो वा भवति, क्यलुक् च ॥ आढप्पइ । पक्षे- आढवीअइ ॥

**[ आरभेराढप्पः ]** आरभि षष्ठी ङस् । आढप्प प्रथमा सि ।

**[ आढप्पइ ]** आङ्पूर्व० 'रभिं राभस्ये' (७८५) रभ् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यंप्र० → य० । अनेन उपसर्गेण सह आरभ्० → आढप्प० इति - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **आढप्पइ** ।

**पक्षे-[ आढवीअइ ]** आङ्पूर्व० रभ् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'आङो रभे रम्भ-ढवौ' (४।१५५) आरभ० → आढव० इति । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ० । 'लुक्' (१।१०) "व" मध्यादस्य लुक् । 'लोकात्' (१।१।३) आढवीअते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **आढवीअइ** । आरभ्यते इत्यर्थः ॥२५४॥

## स्निह-सिचोः सिप्पः ॥ ८।४।२५५ ॥

अनयोः कर्म-भावे सिप्प आदेशो वा भवति, क्यलुक् च ॥ सिप्पइ स्निह्यते सिच्यते वा ॥

**[ स्निह-सिचोः सिप्पः ]** स्निह-सिच् षष्ठी ओस् । सिप्प प्रथमा सि ।

**[ सिप्पइ ]** 'ष्णिहौच् प्रीतौ' (१२८१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह् । 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै०' (२।३।९८) सिच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन द्वयोर्धात्वोः सिप्प आदेशः । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **सिप्पइ** ॥२५५॥

## ग्रहेर्घेप्पः ॥ ८।४।२५६ ॥

ग्रहेः कर्म-भावे घेप्प इत्यादेशो वा भवति, क्यलुक् च ॥ घेप्पइ । गेण्हिज्जइ ॥

**[ ग्रहेर्घेप्पः ]** ग्रहि षष्ठी ङस् । घेप्प प्रथमा सि ।

**[ घेप्पइ गेण्हिज्जइ ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन ग्रह० → घेप्प आदेशः - क्यलुक् च । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **घेप्पइ** । पक्षे- 'ग्रहो वल-गेण्ह०' (४।२०९) ग्रह० → गेण्ह आदेशः । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **गेण्हिज्जइ** ॥२५६॥

## स्पृशश्छिप्पः[1] ॥ ८।४।२५७ ॥

स्पृशतेः कर्म-भावे छिप्पादेशो वा भवति, क्यलुक् च ॥ छिप्पइ । छिविज्जइ ॥

**[ स्पृशश्छिप्पः ]** स्पृश् षष्ठी ङस् । छिप्प प्रथमा सि ।

**[ छिप्पइ ]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन स्पृश० → छिप्प० इति - क्यस्य च लुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **छिप्पइ** ।

**पक्षे- [ छिविज्जइ ]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'स्पृशः फास-फंस-फरिस-छिव-छिहा-ऽऽलुङ्खा-ऽऽलिहाः' (४।१८२) स्पृश० → छिव० । 'ईअ-इज्जौ क्यस्य'

---

१. G. H. I. J. स्पृशेश्छिप्पः ।

(३।१६०) क्य० → इज्ज० इति । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) छिविज्जते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **छिविज्जइ** ॥२५७॥

## क्तेनाऽप्फुण्णाऽऽदयः ॥ ८।४।२५८ ॥

अप्फुण्णादयः शब्दा आक्रमिप्रभृतीनां धातूनां स्थाने क्तेन सह वा निपात्यन्ते ॥

अप्फुण्णो आक्रान्तः । उक्कोसं उत्कृष्टम् । फुडं स्पष्टम् । वोलीणो अतिक्रान्तः । वोसट्टो विकसितः । निसुट्टो निपातितः । लुग्गो रुग्णः । ल्हिक्को नष्टः । पम्हुट्ठो प्रमृष्टः प्रमुषितो वा । विढत्तं अर्जितम् । छित्तं स्पृष्टम् । निमिअं स्थापितम् । चक्खिअं आस्वादितम् । लुअं लूनम् । जढं व्यक्तम् । झोसिअं क्षिप्तम् । निच्छूढं उद्वृत्तम् । पल्हत्थं पलोट्टं च पर्यस्तम् । होसमणं हेषितम् इत्यादि ॥

**[ क्तेनाऽप्फुण्णाऽऽदयः ]** क्त तृतीया टा । अप्फुण्णाऽऽदि प्रथमा जस् ।

**[ अप्फुण्णो ]** आङ्पूर्व० 'क्रमू पादविक्षेपे' (३८५) क्रम् । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त० । अनेन क्तप्रत्ययेन सह क्रम्स्थाने अप्फुण्ण इति निपातः । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अप्फुण्णो** ।

**[ उक्कोसं ]** उत्कृष्ट । अनेन **उक्कोसं** इति निपातः ॥

एवं सर्वत्र निपातः ॥२५८॥

## धातवोऽर्थान्तरेऽपि ॥ ८।४।२५९ ॥

उक्तादर्थादर्थान्तरेऽपि धातवो वर्तन्ते ॥

बलिः प्राणने पठितः खादनेपि वर्तते । बलइ । खादति प्राणनं करोति वा ॥ एवं कलिः संख्यानं संज्ञानेऽपि । कलइ । जानाति संख्यानं करोति वा ॥ रिगिर्गतौ प्रवेशेऽपि । रिगइ । प्रविशति गच्छति वा ॥ काङ्क्षतेर्वम्फ आदेशः प्राकृते । वम्फइ । अस्यार्थः - इच्छति खादति वा ॥ फक्कतेस्थक्क आदेशः । थक्कइ । नीचां गतिं करोति विलम्बयति वा ॥ विलप्युपालम्भ्योर्झङ्ख आदेशः । झङ्खइ । विलपति उपालभते भाषते वा ॥ एवं - पडिवालइ । प्रतीक्षते रक्षति वा ॥

केचित् कैश्चिदुपसर्गैर्नित्यम् । पहरइ युध्यते । संहरइ संवृणोति । अणुहरइ सदृशीभवति । नीहरइ पुरीषोत्सर्गं करोति । विहरइ क्रीडति । आहरइ खादति । पडिहरइ पुनः पूरयति । परिहरइ त्यजति । उवहरइ पूजयति । वाहरइ आह्वयति । पवसइ देशान्तरं गच्छति । उच्चुपइ चटति । उल्लुहइ निःसरति ॥

**[ धातवोऽर्थान्तरेऽपि ]** धातु प्रथमा जस् । अर्थान्तर सप्तमी ङि । अपि प्रथमा सि ।

**[ झङ्खइ ]** रप (३३५) - 'लप व्यक्ते वचने' (३३६) लप्, विपूर्व० । वर्त्त० तिव् । 'विलपेर्झङ्ख-वडवडौ' (४।१४८) विलप० → झङ्ख० इति । अथवा उप-आङ्पूर्व० 'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० ते । 'उपालम्भेर्झङ्ख-पच्चार-वेलवाः' (४।१५६) उपसर्गेण सह लभ्स्थाने झङ्ख इति । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **झङ्खइ** ।

**[ पडिवालइ ]** प्रतिपूर्व० 'पलण् रक्षणे' (१६९९) पल् । वर्त्त० तिव् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) प्रतिपालति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'प्रत्यादौ डः' (१।२०६) ति० → डि० 'पो वः' (१।२३१) पा० → वा० **पडिवालइ** ।

**[ उच्चुपइ ]** 'चुप मन्दायां गतौ' (३४२) चुप्, उत्पूर्व० । **उच्चुपइ** ।

**[ उल्लुहइ ]** 'लुहं हिंसा-मोहयोः' (७६) लुह इति सौत्रो धातुः, उत्पूर्व० । **उल्लुहइ** ॥२५९॥

## तो दोऽनादौ शौरसेन्यामयुक्तस्य ॥ ८।४।२६० ॥

शौरसेन्यां भाषायामनादावपदादौ वर्तमानस्य तकारस्य दकारो भवति, न चेदसौ वर्णान्तरेण संयुक्तो भवति ॥

तदो पूरिद-पदिञ्ञेन मारुदिनामन्तिदो । एतस्मात् → एदाहि-एदाओ ॥

अनादाविति किम् ? तधा करेध जधा तस्स राइणो अणुकम्पणीआ भोमि ॥

अयुक्तस्येति किम् ? मत्तो । अय्यउत्तो । असंभाविद-सक्कारं । हला सउन्तले ! ॥

**[ तो दोऽनादौ शौरसेन्यामयुक्तस्य ]** त् षष्ठी ङस् । द प्रथमा सि । अनादि सप्तमी ङि । शौरसेनी सप्तमी ङि । अयुक्त षष्ठी ङस् ।

**[ तदो पूरिद-पदिञ्ञेन मारुदिनामन्तिदो ]** ततः । अनेन तस्य दः । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **तदो** ।

पूरितप्रतिज्ञ । तृतीया टा । अनेन तस्य दः । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ज्ञ० → ज्ञे० । 'णो नः' (४।३०६) णस्य नः । 'न्य-ण्य-ज्ञ-ञ्जां ञ्ञः' (४।२९३) ज्ञे० → ञ्ञे० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पूरिद-पदिञ्ञेन** ।

मारुति । तृतीया टा । 'टो णा' (३।२४) टा० → णा० । 'णो नः' (४।३०६) णा० → ना० । अनेन तस्य दः **मारुदिना** । आमन्त्रित । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन तस्य दः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **आमन्तिदो** । तेन(ततः) पूरितप्रतिज्ञेन हेतुमता आमन्त्रित इत्यर्थः ।

**[ एदाहि एदाओ ]** एतद् (२) । पञ्चमी ङसि । 'ङसेस्त्तो-दो-दु-हि०' (३।८) ङसिस्थाने हि०-दो० । 'अन्त्यव्य०' (१।११) द्लुक् । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'जस्-शस्-ङसि-त्तो-दो०' (३।१२) दीर्घः - त० → ता० । अनेन ता० → दा० **एदाहि एदाओ** । एतस्मादित्यर्थः ।

**[ [1]तधा करेध जधा तस्स राइणो अणुकम्पणीआ भोमि ]** तथा । 'थो धः' (४।२६७) था० → धा० **तधा** ।

'डुकृंग् करणे' (८८८) कृ । पञ्चमी ध्वम् । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) करध्वम् । 'वर्तमाना-पञ्चमी - शतृषु वा' (३।१५८) र० → रे० । 'बहुषु न्तु-ह-मो' (३।१७६) ध्वम्० → ह० । 'इह-हचोर्हस्य' (४।२६८) हकारोपलक्षणत्वात् हस्यापि ध० **करेध** ।

यथा । प्रथमा सि । 'आदेर्यो जः' (१।२४५) यस्य जः । 'थो धः' (४।२६७) था० → धा० । 'अव्ययस्य' (३।२।७) सिलुप् **जधा** ।

तद् । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'अन्त्यव्य०' (१।११) द्लुक् **तस्स** ।

राजन् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) न्लुक् । 'जस्-शस्-ङसि-ङसां णो' (३।५०) ङस्० → णो० । 'इर्जस्य णो-णा-ङौ' (३।५२) ज० → जि० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **राइणो** ।

---

१. शकुन्तला- तं जइ वो अणुमदं ता तह वट्टह जह तस्स राएसिणो अणुकम्पणिज्जा होमि । [अभि० शा० तृतीयेऽङ्के]
तद्यदि वामनुमतं तदा तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि ।

अनुकम्पनीया । प्रथमा सि । 'नो णः' (१।२२८) नु० → णु० - नी० → णी० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **अणुकम्पणीआ** ।

'भू सत्तायाम्' (१) भू । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'भुवो भः' (४।२६९) हो० → भो० **भोमि** ।

तथा कुरुध्वं यथा तस्य राज्ञोऽनुकम्पनीआ भवामीत्यर्थः ।

**[ मत्तो ]** मत्तः संस्कृतरूपम् ।

**[ अय्यउत्तो ]** आर्यपुत्र । प्रथमा सि । 'नवा र्यो य्यः' (४।२६६) र्य० → य्य० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त० → त्त० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अय्यउत्तो** ।

**[ [1]असंभाविद-सक्कारं ]** असंभावित-सत्कारम् । 'तो दोनादौ शौरसेन्यामयुक्तस्य' (४।२६०) तस्य दः । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं-का० → क्का० **असंभाविद-सक्कारं** ।

**[ [2]हला सउन्तले ! ]** हला इति सख्या आमन्त्रणे मामि-हला-हले इत्यर्थः । शकुन्तला । सम्बो० सि । 'श-षोः सः' (१।२६०) शस्य सः । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'वाप ए' (३।४१) ला० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **सउन्तले** ! ॥२६०॥

## अधः क्वचित् ॥ ८।४।२६१ ॥

वर्णान्तरस्याऽधोवर्तमानस्य तस्य शौरसेन्यां दो भवति, क्वचिल्लक्ष्यानुसारेण ॥ महन्दो । निच्चिन्दो । अन्देउरं ॥

**[ अधः क्वचित् ]** अधः सप्तमी ङि । क्वचित् प्रथमा सि ।

**[ महन्दो ]** महत् । गोणादित्वात् महन्त । प्रथमा सि । अनेन तस्य दः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **महन्दो** ।

**[ निच्चिन्दो ]** निश्चिन्त । प्रथमा सि । 'क-ग-ट-ड०' (२।७७) श्लुक् । 'अनादौ०' (२।८९) द्वित्वं - चि० → च्चि० । अनेन तस्य दः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **निच्चिन्दो** ।

**[ अन्देउरं ]** अन्तर्-पुर । प्रथमा सि । अनेन तस्य दः । 'अन्त्यव्य०' (१।११) र्लुक् । 'तोऽन्तरि' (१।६०) दे० । 'क-ग-च-ज०' (१।१७७) प्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अन्देउरं** ॥२६१॥

## वादेस्तावति ॥ ८।४।२६२ ॥

शौरसेन्यां तावच्छब्दे आदेस्तकारस्य दो वा भवति ॥ दाव । ताव ॥

**[ वादेस्तावति ]** वा प्रथमा सि । आदि षष्ठी ङस् । तावत् सप्तमी ङि ।

---

१. सख्यौ-अज्ज ! **असंभाविदअइहिसक्कारं** भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णविदुं । [अभि० शा० प्रथमेऽङ्के]
आर्य ! असम्भावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जावहे आर्यं विज्ञापयितुम् ॥

२. प्रियंवदा - **हला सउन्दले** ! एत्थ एव्व दाव मुहुत्तअं चिट्ठ । [अभि० शा० प्रथमेऽङ्के]
हला शकुन्तले ! अत्रैव तावन्मुहूर्तं तिष्ठ ।

**[ दाव ताव ]** तावत् (२) । प्रथमा सि । अनेन वा ता० → दा० । 'अन्त्यव्य०' (१।११) त्लुक् । 'अव्ययस्य' (३।२।७) सिलुप् **दाव ताव** ॥२६२॥

## आ आमन्त्र्ये सौ वेनो नः ॥ ८।४।२६३ ॥

शौरसेन्यामिनो नकारस्य आमन्त्र्ये सौ परे आकारो वा भवति ॥

भो कञ्चुइआ ! । भो सुहिआ ! । पक्षे-भो तवस्सि ! । भो मणस्सि ! ॥

**[ आ आमन्त्र्ये सौ वेनो नः ]** आ प्रथमा सि । आमन्त्र्य सप्तमी ङि । सि सप्तमी ङि । वा प्रथमा सि । इन् षष्ठी ङस् । न् षष्ठी ङस् ।

**[ भो कञ्चुइआ ! ]** भोः कञ्चुकिन् ! । भोस् इत्यव्ययं स्लुपि सिद्धम् । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । अनेन न्० → आ० । 'अन्त्यव्य०' (१।११) स्लुक् **भो कञ्चुइआ !** ।

**[ भो सुहिआ ! ]** भोः सुखिन् ! । अनेन न्० → आ० । 'ख-घ-थ-ध-भाम्' (१।१८७) खि० → हि० **सुहिआ !** ।

**[ भो तवस्सि ! ]** भोः तपस्विन् ! । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'पो वः' (१।२३१) प० → व० । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । **भो तवस्सि !** ।

**[ भो मणस्सि ! ]** भो मनस्विन् ! । 'अन्त्यव्य०' (१।११) न्लुक् । 'नो णः' (१।२२८) न० → ण० । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । **भो मणस्सि !** ॥२६३॥

## मो वा ॥ ८।४।२६४ ॥

शौरसेन्यामामन्त्र्ये सौ परे नकारस्य मो वा भवति ॥

भो रायं ! । भो विअयवम्मं ! । भो सुकम्मं ! । भयवं[1] ! कुसुमाउह ! । भयवं[2] ! तित्थं पवत्तेह । पक्षे-सयल-लोअ-अन्तेआरि ! भयव ! हुदवह ! ॥

**[ मो वा ]** म प्रथमा सि । वा प्रथमा सि ।

**[ भो रायं ! ]** भो राजन् ! । प्रथमा सि । अनेन वा न्० → म्० । 'अन्त्यव्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'मोऽनु०' (१।२३) अनुस्वारः **भो रायं !** ।

**[ भो विअयवम्मं ! ]** भो विगतवर्त्मन् ! । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) ग-तयोर्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । अनेन वा न्० → म्० । 'अन्त्यव्य०' (१।११) स्लुक् । 'मोऽनु०' (१।२३) अनुस्वारः **भो विअयवम्मं !** ।

**[ भो सुकम्मं ! ]** भोः सुकर्मन् ! । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । अनेन वा न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । 'अन्त्यव्य०' (२।८९) स्लुक् **भो सुकम्मं !** ।

---

१. [अभि० शा० तृतीयेऽङ्के]

२. जय जय नंदा ! जय जय भद्दा ! भद्दं ते जय जय खत्तियवरवसहा ! बुज्झाहि **भगवं !** लोगनाहा ! सयलजगज्जीवहियं **पवत्तेहि धम्मतित्थं** हिअसुहनिस्सेयसकरं सव्वलोए सव्वजीवाणं भविस्सइ त्ति कट्टु जय जय सद्दं पउंजंति ॥१११॥ [कल्पसूत्रे पञ्चमे क्षणे]
एए देवनिकाया भयवं बोहेंति जिणवरिंदं तु । भद्द ! जगज्जीवहियं **भयवं ! तित्थं पवत्तेह** ॥ [अनु० अङ्कः -६६]
एते देवनिकाया भगवन्तं बोधयन्ति जिनवरेन्द्रं तु । भद्र ! जगज्जीवहितं भगवन् ! तीर्थं प्रवर्तय ॥

**[ भयवं ! कुसुमाउह ! ]** भगवन् ! कुसुमायुध ! । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'अवर्णो०' (१।१८०) अ० → य० । अनेन वा न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भयवं** ! ।

'क-ग-च-ज०' (१।१७७) य्लुक् । 'ख-घ-थ०' (१।१८७) ध० → ह० **कुसुमाउह** ! ।

**[ भयवं ! तित्थं पवत्तेह ] भयवं** पूर्ववत् । तीर्थम् । 'ह्रस्वः संयोगे' (१।८४) ती० → ति० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - थ्थ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः **तित्थं** ।

'वृतूङ् वर्त्तने' (९५५) वृत्, प्रपूर्व० । प्रवर्त्तमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । पञ्चमी त । 'ऋतोऽत्' (१।१२६) वृ० → व० । 'णेरदेदावावे' (३।१४९) णिग्० → ए० । 'बहुषु न्तु-ह-मो' (३।१७६) त० → ह० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ते० → त्ते० **पवत्तेह** । पक्षे-

**[ सयल-लोअ-अन्तेआरि ! भयव ! हुदवह ! ]** सकललोकान्तर्चारिन् ! । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अन्त्यव्य०' (१।११) र्लुक् । 'तोऽन्तरि' (१।६०) न्त० → न्ते० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अन्त्यव्य०' (१।११) न्लुक् **सयललोअअन्तेआरि** ! । हे भगवन् ! । 'अन्त्यव्य०' (१।११) न्लुक् **भयव** ! । हुतवह ! । 'तो दोऽनादौ०' (४।२६०) त० → द० **हुदवह** ! ॥२६४॥

## भवद्भगवतोः ॥ ८।४।२६५ ॥

आमन्त्र्य इति निवृत्तम् ॥

शौरसेन्यामनयोः सौ परे नस्य मो भवति ॥

किं एत्थभवं हिदएण चिन्तेदि ? । [1]एदु भवं । [2]समणे भगवं महावीरे । पज्जलिदो भयवं हुदासणो ॥

क्वचिदन्यत्रापि - मघवं पागसासणे । संपाइअवं सीसो । कयवं करेमि काहं च ॥

**[ भवद्भगवतोः ]** भवद्भगवत् षष्ठी ओस् ।

**[ किं एत्थभवं हिदएण चिन्तेदि ? ]** एतद् । सप्तमी ङि । 'ङेः स्सि-म्मि-त्थाः' (३।५९) ङि० → त्थ० । 'त्थे च तस्य लुक्' (३।८३) तलुक् । 'अन्त्यव्य०' (१।११) द्लुक् **एत्थ** । भवान् । प्रथमा सि । अनेन न्० → म्० । 'वाऽव्ययोत्खातादावदातः' (१।६७) वा० → व० । 'मोऽनु०' (१।२३) अनुस्वारः । 'अन्त्यव्य०' (१।११) स्लुक् **भवं** ।

'चितुण स्मृत्याम्' (१६४५) चित् । वर्त्त० तिव् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । 'वर्त्तमाना-पञ्चमी०' (३।१५८) एत्वम् **चिन्तेदि** । भवानत्र हृदयेन किं चिन्तयतीत्यर्थः ।

**[ एदु भवं ]** 'इंण्क् गतौ' (१०७५) इ । पञ्चमी तुव् । 'तो दोऽनादौ०' (४।२६०) तु० → दु० । 'युवर्णस्य गुणः' (४।२३७) इ० → ए० **एदु** । **भवं** पूर्ववत् । भवान् एतु इत्यर्थः ।

**[ समणे भगवं महावीरे ]** श्रमण । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अत एत्सौ पुंसि मागध्याम्' (४।२८७) ण० → णे० । 'अन्त्यव्य०' (१।११) स्लुक् **समणे** । **भवं** अनेन सिद्धम् । महावीरं । 'अत एत्सौ पुंसि०' (४।२८७) र० → रे० **महावीरे** ।

---

१. विदूषकः - **एदु भवं** । एतु भवान् । [अभि० शा० द्वितीयेऽङ्के]

२. तेणं कालेणं तेणं समएणं **समणे भगवं महावीरे** । [कल्पसूत्रे प्रथमे क्षणे]
तस्मिन् काले तस्मिन् समये श्रमणो भगवान् महावीरः ।

**[ पज्जलिदो भयवं हुदासणो ]** भगवान् पूज्यो हुताशनः प्रज्वलित इत्यर्थः । **भयवं** अनेन सिद्धम् ।

**[ मघवं पागसासणे ]** मघवा(व)न् । अनेन न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मघवं** ।

पाकशासन । प्रथमा सि । 'अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः' (४।२९६) कस्य गः । 'श-षोः सः' (१।२६०) शा० → सा० । 'अत एत्सौ पुंसि०' (४।२८७) न० → ने० । 'अन्त्यव्य०' (१।११) स्लुक् **पागसासणे** ।

**[ संपाइअवं सीसो ]** संपादितवान् । अनेन न्० → म्० । शेषं सुगमम् । **संपाइअवं** ।

**[ कयवं करेमि काहं च ]** कृतवान् । अनेन न्० → म्० । 'वाऽव्ययोत्खाता०' (१।६७) वा० → व० **कयवं** ।

'डुकृंग् करणे' (८८८) कृ । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) करमि । 'वर्तमाना-पञ्चमी-शतृषु वा' (३।१५८) र० → रे० **करेमि** ।

'डुकृंग् करणे' (८८८) कृ । भविष्यन्ती स्यामि । 'तृतीयस्य मिः' (३।१४१) स्यामि० → मि० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'कृ-दो हं' (३।१७०) हिना सह मिस्थाने हं । 'आः कृगो भूत-भवि०' (४।२१४) कृ० → का० **काहं** । अकार्षमित्यर्थः ॥२६५॥

## नवा र्यो य्यः ॥ ८।४।२६६ ॥

शौरसेन्यां र्यस्य स्थाने य्यो वा भवति ॥

अय्यउत्त ! पय्याकुलीकदम्हि । सुय्यो । पक्षे-अज्जो । पज्जाउलो । कज्जपरवसो ॥

**[ नवा र्यो य्यः ]** नवा प्रथमा सि । र्य् षष्ठी ङस् । य्य प्रथमा सि ।

**[ अय्यउत्त ! पय्याकुलीकदम्हि ]** आर्यपुत्र ! पर्याकुलीकृतास्मि । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । अनेन र्यस्य य्यः । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) स्मि० → म्हि० । शेषं सुगमम् । **अय्यउत्त ! पय्याकुलीकदम्हि** ।

**[ सुय्यो ]** सूर्य । अनेन र्यस्य य्यः । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० **सुय्यो** । पक्षे-

**[ अज्जो ]** आर्य । प्रथमा सि । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) द्वित्वं - ज० → ज्ज० । शेषं सुगमम् । **अज्जो** ।

**[ पज्जाउलो ]** पर्याकुल । प्रथमा सि । 'द्य-य्य-र्यां जः' (२।२४) र्यस्य जः । 'अनादौ०' (२।८९) द्वित्वं - ज० → ज्ज० । शेषं सुगमम् । **पज्जाउलो** ।

**[ कज्जपरवसो ]** कार्यपरवश । प्रथमा सि । अनेन र्यस्य जः । 'अनादौ०' (२।८९) द्वित्वं - ज० → ज्ज० । 'ह्रस्वः संयोगे' (१।८४) का० → क० । 'श-षोः सः' (१।२६०) श० → स० **कज्जपरवसो** ॥२६६॥

## थो धः ॥ ८।४।२६७ ॥

शौरसेन्यां थस्य धो वा भवति ॥

कधेहि कहेदि । णाधो णाहो । कधं कहं । राजपधो राजपहो ॥ अपदादावित्येव - थामं । थेओ ॥

**[ थो धः ]** थ् षष्ठी ङस् । ध प्रथमा सि ।

**[ कधेदि कहेदि ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ (२) । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कथदि । 'वर्तमाना-पञ्चमी०' (३।१५८) थ० → थे० । अनेन वा थस्य धः । पक्षे- 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः **कधेदि कहेदि** ।

**[ णाधो णाहो ]** नाथ (२) । अनेन वा थस्य धः । पक्षे-'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । शेषं सुगमम् । **णाधो णाहो** ।

**[ कधं कहं ]** कथम् (२) । अनेन वा थस्य धः । पक्षे- 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । शेषं सुगमम् । **कधं कहं** ।

**[ राजपधो राजपहो ]** राजपथ (२) । अनेन वा थस्य धः । पक्षे- 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । शेषं सुगमम् । **राजपधो राजपहो** ।

**[ थामं ]** स्थामन् । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'भवद्भगवतोः' (४।२६५) न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **थामं** ।

**[ थेओ ]** स्थित । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'युवर्णस्य गुणः' (४।२३७) थि० → थे० । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **थेओ** ॥२६७॥

## इह - हचोर्हस्य ॥ ८।४।२६८ ॥

इहशब्दसम्बन्धिनो 'मध्यमस्येत्था-हचौ' (३।१४३) इति विहितस्य हचश्च हकारस्य शौरसेन्यां धो वा भवति ॥

इध । होध । परित्तायध । पक्षे- इह । होह । परित्तायह ॥

**[ इह-हचोर्हस्य ]** इह-हच् षष्ठी ओस् । ह षष्ठी ङस् ।

**[ इध इह ]** इह । अनेन वा हस्य धः **इध** । पक्षे-**इह** ।

**[ होध होह ]** 'भू सत्तायाम् (१) भू । पञ्चमी त । 'मध्यमस्येत्था-हचौ' (३।१४३) त० → हच्० → ह० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । अनेन वा हस्य धः **होध** । पक्षे- **होह** ।

**[ परित्तायध परित्तायह ]** परित्राय-पञ्चमी ध्वम् । 'मध्यमस्येत्था-हचौ' (३।१४३) ध्वम्० → हच्० → ह० । अनेन वा हस्य धः । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं- ता० → त्ता० **परित्तायध** । पक्षे- **परित्तायह** ॥२६८॥

## भुवो भः ॥ ८।४।२६९ ॥

भवतेर्हकारस्य शौरसेन्यां भो वा भवति ॥ भोदि होदि । भुवदि हुवदि । भवदि हवदि ॥

**[ भुवो भः ]** भू षष्ठी ङस् । भ प्रथमा सि ।

**[ भोदि होदि ]** 'भू सत्तायाम् (१) । भू (२) । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । अनेन वा हो० → भो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० **भोदि होदि** ।

**[ भुवदि हुवदि ]** भू (२) । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हुव० । अनेन वा हुव० → भुव० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० **भुवदि हुवदि** ।

**[ भवदि हवदि ]** भू (२) । वर्त्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हव० । अनेन वा हव० → भव० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० **भवदि हवदि** ॥२६९॥

## पूर्वस्य पुरवः ॥ ८।४।२७० ॥

शौरसेन्यां पूर्वशब्दस्य पुरव इत्यादेशो वा भवति ॥

[1]अपुरवं नाडयं । अपुरवागदं । पक्षे-अपुव्वं पदं । अपुव्वागदं ॥

**[ पूर्वस्य पुरवः ]** पूर्व षष्ठी ङस् । पुरव प्रथमा सि ।

**[ अपुरवं नाडयं ]** अपूर्व । अनेन पूर्वस्य पुरव इति । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **अपुरवं** ।

नाटकम् । 'टो डः' (१।१९५) ट० → ड० **नाडयं** ।

**[ अपुरवागदं ]** अपूर्वागतम् । अनेन पूर्वस्य पुरवः । 'तो दोऽनादौ०' (४।२६०) त० → द० **अपुरवागदं** । पक्षे-

**[ अपुव्वं पदं ]** अपूर्वं पदम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व० → व्व० **अपुव्वं पदं** ।

**[ अपुव्वागदं ]** अपूर्वागतम् । 'तो दोऽनादौ०' (४।२६०) त० → द० । शेषं सुगमम् । **अपुव्वागदं** ॥२७०॥

## क्त्व इय-दूणौ ॥ ८।४।२७१ ॥

शौरसेन्यां क्त्वाप्रत्ययस्य इय-दूण इत्यादेशौ वा भवतः ॥

भविय भोदूण । हविय होदूण । पढिय पढिदूण । रमिय रंदूण । पक्षे- भोत्ता । होत्ता । पढित्ता । रंता ॥

**[ क्त्व इय-दूणौ ]** क्त्वा षष्ठी ङस् । इय-दूण प्रथमा औ ।

**[ भविय भोदूण हविय होदूण ]** 'भू सत्तायाम्' (१) भू (४) । क्त्वाप्र० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हव०-हो० । 'भुवो भः' (४।२६९) वा हस्य भः । अनेन वा क्त्वास्थाने इय-दूण । 'लुक्' (१।१०) अलुक् । **भविय भोदूण हविय होदूण** ।

**[ पढिय पढिदूण ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् (२) । क्त्वाप्र० । अनेन वा क्त्वास्थाने इय० । 'लोकात्' (१।१।३) पठिय । 'ठो ढः' (१।१९९) ठि० → ढि० **पढिय** ।

पठ् । क्त्वाप्र० । अनेन क्त्वास्थाने दूण । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पठदूण । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) पठिदूण । 'ठो ढः' (१।१९९) ठि० → ढि० **पढिदूण** ।

**[ रमिय रंदूण ]** 'रमि क्रीडायाम्' (९८९) रम् (२) । क्त्वाप्र० । अनेन वा क्त्वास्थाने इय-दूण **रमिय रंदूण** । रंदूण इत्यत्र 'मोऽनु०' (१।२३) बाहुलकादनन्तस्याऽप्यनुस्वारः । पक्षे-

---

१. णं पढमं ज्जेव अज्जेण आणत्तं अहिण्णाणसउंतलं णाम **अउव्वं णाडअं** अहिणीअदुत्ति । [अभि० शा० प्रथमेऽङ्के]
ननु प्रथममेव आर्येण आज्ञप्तमभिज्ञानशाकुन्तलं नाम अपूर्वं नाटकमभिनीयतामिति ।

**[ भोत्ता होत्ता ]** भू (२) । क्त्वाप्र० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'भुवो भः' (४।२६९) प्रथमे हो० → भो० । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वं ता० → त्ता० **भोत्ता होत्ता** ।

**[ पढित्ता ]** पठ् । क्त्वाप्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पठ-क्त्वा । 'ठो ढः' (१।१९९) ठ० → ढ० । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) पढि-क्त्वा । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ता० → त्ता० **पढित्ता** ।

**[ रंता ]** रम् । क्त्वाप्र० । 'मोऽनु०' (१।२३) अनुस्वारः । शेषं पूर्ववत् । **रंता** ॥२७१॥

## कृ-गमो डडुअः ॥ ८।४।२७२ ॥

आभ्यां परस्य क्त्वाप्रत्ययस्य डिद् अडुअ इत्यादेशो वा भवति ॥

कडुअ । गडुअ । पक्षे- करिय । करिदूण । गच्छिय । गच्छिदूण ॥

**[ कृ-गमो डडुअः ]** कृ-गम् पञ्चमी ङसि । डडुअ प्रथमा सि ।

**[ कडुअ ]** डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन वा क्त्वाप्रत्ययस्य डडुअ० → अडुअ० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'लोकात्' (१।१।३) **कडुअ** ।

**[ गडुअ ]** 'गम्लृं गतौ' (३९६) गम् । गमनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन वा क्त्वाप्रत्ययस्य डडुअ० → अडुअ० इति । 'डित्यन्त्य' (२।१।११४) अम्लुक् । 'लोकात्' (१।१।३) **गडुअ** । पक्षे-

**[ करिय करिदूण ]** कृ (२) । क्त्वाप्र० । 'क्त्व इय-दूणौ' (४।२७१) क्त्वास्थाने इय-दूण । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'लोकात्' (१।१।३) **करिय** । द्वितीये 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) कर० → करि० **करिदूण** ।

**[ गच्छिय गच्छिदूण ]** गम् (२) । क्त्वाप्र० । 'गमिष्यमासां छः' (४।२१५) म० → छ० । शेषं पूर्ववत् । **गच्छिय गच्छिदूण** ॥२७२॥

## दिरिचेचोः ॥ ८।४।२७३ ॥

'त्यादीनामाद्यत्रयस्याऽऽद्यस्येचेचौ' (३।१३९) इति विहितयोरिचेचोः स्थाने दिर्भवति ॥

वेति निवृत्तम् ॥ नेदि । देदि । भोदि । होदि ॥

**[ दिरिचेचोः ]** दि प्रथमा सि । इचेच् षष्ठी ओस् ।

**[ नेदि ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादे०' (२।३।९७) णी० → नी० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → दि० । 'युवर्णस्य गुणः' (४।२३७) नी० → ने० **नेदि** ।

**[ देदि ]** 'डुदांग्क् दाने' (११३८) दा । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → दि० । 'स्वराणां स्वराः' (४।२३८) दा० → दे० **देदि** ।

**[ भोदि होदि ]** 'भू सत्तायाम्' (१) भू (२) । वर्त्त० तिव् । 'भुवेर्हो-हुव०' (४।६०) भू० → हो० । प्रथमे 'भुवो भः' (४।२६९) हो० → भो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → दि० **भोदि होदि** ॥२७३॥

## अतो देश्च ॥ ८।४।२७४ ॥

अकारात्परयोरिचेचोः स्थाने देश्चकाराद् दिश्च भवति ॥

अच्छदे अच्छदि । गच्छदे गच्छदि । रमदे रमदि । किज्जदे किज्जदि ॥ अत इति किम् ? वसुआदि । नेदि । भोदि ॥

**[ अतो देश्च ]** अत् पञ्चमी ङसि । दे प्रथमा सि । च प्रथमा सि ।

**[ अच्छदे अच्छदि ]** 'आसिक् उपवेशने' (१११९) आस् (२) । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) आसते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । अनेन इच्० → दे० - दि० । 'गमिष्यमासां छः' (४।२१५) स० → छ० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० **अच्छदे अच्छदि** ।

**[ गच्छदे गच्छदि ]** 'गम्लृं गतौ' (३९६) गम् (२) । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गमति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → दे०-दि० । 'गमिष्यमासां छः' (४।२१५) म० → छ० **गच्छदे गच्छदि** ।

**[ रमदे रमदि ]** 'रमिं क्रीडायाम्' (९८९) रम् (२) । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रमते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । अनेन इच्० → दे० - दि० **रमदे रमदि** ।

**[ किज्जदे किज्जदि ]** 'डुकृंग् करणे' (८८८) कृ (२) । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'लुक्' (१।१०) ऋलुक् । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । अनेन इच्० → दे० - दि० । 'लोकात्' (१।१।३) **किज्जदे किज्जदि** ।

**[ वसुआदि ]** उत्पूर्व० 'वांक् गति-गन्धनयोः' (१०६३) वा । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'उद्वाकेरोरुम्मा-वसुआ' (४।११) उद्वा० → वसुआ० । 'दिरिचेचोः' (४।२७३) इच्० → दि० **वसुआदि** ।

**[ नेदि ]** (४।२७३) सूत्रवत् ।

**[ भोदि ]** (४।२७३) सूत्रवत् ॥२७४॥

## भविष्यति स्सिः ॥ ८।४।२७५ ॥

शौरसेन्यां भविष्यदर्थे विहिते प्रत्यये परे स्सिर्भवति ॥

हि-स्सा-हामपवादः ॥ भविस्सिदि । करिस्सिदि । गच्छिस्सिदि ॥

**[ भविष्यति स्सिः ]** भविष्यत् सप्तमी ङि । स्सि प्रथमा सि ।

**[ भविस्सिदि ]** 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । अनेन स्सि आगमः । 'उवर्ण०' (४।२३३) भू० → भव० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) भवस्सिदि । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) व० → वि० **भविस्सिदि** ।

**[ करिस्सिदि ]** 'डुकृंग् करणे' (८८८) कृ । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । अनेन स्सि आगमः । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) करस्सिदि । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) र० → रि० **करिस्सिदि** ।

**[ गच्छिस्सिदि ]** 'गम्लृं गतौ' (३९६) गम् । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । अनेन स्सि आगमः । 'गमिष्यमासां छः' (४।२१५) म० → छ० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गच्छस्सिदि । 'एच्च क्त्वा-तुम्०' (३।१५७) च्छ० → च्छि० **गच्छिस्सिदि** ॥२७५॥

## अतो ङसेर्डादो-डादू ॥ ८।४।२७६ ॥

अतः परस्य ङसेः शौरसेन्यां आदो-आदु इत्यादेशौ डितौ भवतः ॥ दूरादो य्येव । दूरादु ॥

**[ अतो ङसेर्डादो-डादू ]** अत् पञ्चमी ङसि । ङसि षष्ठी ङस् । डादो-डादु प्रथमा औ ।

**[ दूरादो य्येव, दूरादु ]** दूर । पञ्चमी ङसि । अनेन ङसिस्थाने डादो० → आदो० - डादु० → आदु० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **दूरादो दूरादू** । 'एवार्थे य्येव' (४।२८०) **य्येव** निपातः । दूरत एवेत्यर्थः ॥२७६॥

## इदानीमो दाणिं ॥ ८।४।२७७ ॥

शौरसेन्यामिदानीमः स्थाने दाणिं इत्यादेशो भवति ॥

[१]अनन्तरकरणीयं दाणिं आणवेदु अय्यो ॥ व्यत्ययात् प्राकृतेऽपि अन्नं दाणिं बोहिं ॥

**[ इदानीमो दाणिं ]** इदानीम् षष्ठी ङस् । दाणि प्रथमा सि ।

**[ अनन्तरकरणीयं दाणिं आणवेदु अय्यो ]** अनन्तरकरणीयं इदानीम् । अनेन दाणिम् । 'मोऽनु०' (१।२३) अनुस्वारः **दाणिं** ।

आज्ञापि । 'स्वराणां स्वराः' (४।२३८) ज्ञा० → ज्ञ० । पञ्चमी तुव् । 'णेरदेदावावे' (३।१४९) पि० → पे० । 'पो वः' (१।२३१) पे० → वे० । 'म्न-ज्ञोर्णः' (२।४२) ज्ञ० → ण० । 'तो दोऽनादौ०' (४।२६०) तु० → दु० **आणवेदु**। आज्ञापयतु इत्यर्थः ।

आर्य । 'नवा र्यो य्यः' (४।२६६) र्य० → य्य० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अय्यो** ।

**[ अन्नं दाणिं बोहिं ]** अन्या । द्वितीया अम् । 'ह्रस्वोऽमि' (३।३६) अन्या० → अन्य० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं - न० → न्न० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **अन्नं** ।

इदानीम् । अनेन दाणिम् । 'मोऽनु०' (१।२३) अनुस्वारः **दाणिं** ।

बोधि । द्वितीया अम् । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **बोहिं** ॥२७७॥

## तस्मात्ताः ॥ ८।४।२७८ ॥

शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशो भवति ॥

---

१. नटी-अज्ज ! एवं णेदम् । **अणन्तरकरणिज्जं दाणिं** आणवेदु अज्जो । [अभि० शा० प्रथमेऽङ्के]
आर्य ! एवमेतत् । अनन्तरकरणीयमिदानीमाज्ञापयतु आर्यः ।

[1]ता जाव पविसामि । ता अलं एदिणा माणेण ॥

**[ तस्मात्ताः ]** तस्मात् षष्ठी ङस् । ता प्रथमा सि ।

**[ ता जाव पविसामि ]** तस्मात् । अनेन **ता०** । यावत् । 'अन्त्यव्य०' (१।११) त्लुक् । 'आदेर्यो जः' (१।२४५) या० → जा० **जाव** ।

'विशंत् प्रवेशने' (१४१५) विश्, प्रपूर्व० । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रविशमि । 'मौ वा' (३।१५४) दीर्घः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शा० → सा० **पविसामि** ।

**[ ता अलं एदिणा माणेण ]** तस्मात् । अनेन **ता०** । एतद् । तृतीया टा । 'इदमेतत्कि-यत्तद्भ्यष्टो डिणा' (३।६९) टा० → डिणा० → इणा० इति । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) एतिणा । 'तो दोऽनादौ०' (४।२६०) ति० → दि० **एदिणा** । मानेन । 'नो णः' (१।२२८) न० → ण० **माणेण** ॥२७८॥

## मोऽन्त्याण्णो वेदेतोः ॥ ८।४।२७९ ॥

शौरसेन्यामन्त्यान्मकारात्पर इदेतोः परयोर्णकारागमो वा भवति ॥

इकारे - जुत्तं णिमं, जुत्तमिणं । सरिसं णिमं, सरिसमिणं ।

एकारे - किं णेदं, किमेदं । एवं णेदं, एवमेदं ॥

**[ मोऽन्त्याण्णो वेदेतोः ]** म् पञ्चमी ङसि । अन्त्य पञ्चमी ङसि । ण प्रथमा सि । वा प्रथमा सि । इदेत् सप्तमी ओस् ।

**[ जुत्तं णिमं, जुत्तमिणं ]** युक्तं इति प्रकृतिः । इदम् । प्रथमा सि । 'इदम इमः' (३।७२) इदम्० → इम० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । अनेन वा ण आगमः । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) णिमं । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त० → त्त० **जुत्तं णिमं** । पक्षे- इदम् । प्रथमा सि । 'क्लीबे स्यमेदमिणमो च' (३।७९) इदम्० → इणम्० आदेशः । जुत्तं पूर्ववत् । **जुत्तमिणं** ।

**[ सरिसं णिमं, सरिसमिणं ]** सदृशं इमं । अनेन वा ण आगमः । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । 'श-षोः सः' (१।२६०) श० → स० **सरिसं णिमं** । पक्षे- इदम् । प्रथमा सि । 'क्लीबे स्यमेदमिणमो च' (३।७९) इदम्० → इणम्० आदेशः । शेषं पूर्ववत् । **सरिसमिणं** ।

**[ किं णेदं, किमेदं ]** किम् । प्रथमा सि । 'किमः किं' (३।८०) किम्० → किं० । एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः । 'तो दोनादौ०' (४।२६०) तस्य दः । अनेन वा ण आगमः । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) णेदं **किं णेदं** । पक्षे- एदं पूर्ववत् । **किमेदं** ।

**[ एवं णेदं, एवमेदं ]** एवम् । णेदं - एदं पूर्ववत् । **एवं णेदं, एवमेदं** ॥२७९॥

## एवार्थे य्येव ॥ ८।४।२८० ॥

एवार्थे य्येव इति निपातः शौरसेन्यां प्रयोक्तव्यः ॥

---

१. वसन्तसेना - मम अब्भुववत्तिणिमित्तं विअ अवावुदं पक्खदुआरअम् । **ता जाव पविसामि** । [मृ० क० प्रथमे - नवमेऽङ्के] ममाभ्युपपत्तिनिमित्तमिवापावृतं पक्षद्वारकम् । तद् यावत् प्रविशामि ।

मम य्येव बम्हणस्स । सो य्येव एसो ॥

**[ एवार्थे य्येव ]** एवार्थ सप्तमी ङि । य्येव प्रथमा सि ।

**[ मम य्येव बम्हणस्स ]** अस्मद् । षष्ठी ङस् । 'मे-मइ-मम-मह-महं०' (३।११३) ङसा सह अस्मद्० → **मम** आदेशः । एव । अनेन एवस्थाने **य्येव** । ब्राह्मण । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ह्म० → म्ह० । 'ह्रस्वः संयोगे' (१।८४) ब्रा० → ब्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **बम्हणस्स** ।

**[ सो य्येव एसो ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'वैतत्तदः' (३।३) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः **सो** ।

एव । अनेन एवस्थाने **य्येव** । एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च०' (३।८६) त० → स० । 'वैतत्तदः' (३।३) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः **एसो** ॥२८०॥

## हञ्जे चेट्याह्वाने ॥ ८।४।२८१ ॥

शौरसेन्यां चेट्याह्वाने हञ्जे इति निपातः प्रयोक्तव्यः ॥ हञ्जे चदुरिके ! ॥

**[ हञ्जे चेट्याह्वाने ]** हञ्जे प्रथमा सि । चेट्याह्वान सप्तमी ङि ।

**[ हञ्जे चदुरिके ! ]** **हञ्जे** अनेन सिद्धम् । चदुरिका । आमन्त्र्ये सि । 'वाप ए' (३।४१) का० → के० । 'अन्त्यव्य०' (१।११) स्लुक् **चदुरिके !** ॥२८१॥

## हीमाणहे विस्मय-निर्वेदे ॥ ८।४।२८२ ॥

शौरसेन्यां हीमाणहे इत्ययं निपातो विस्मये निर्वेदे च प्रयोक्तव्यः ॥

विस्मये - हीमाणहे जीवन्त-वश्चा मे जणणी ॥

निर्वेदे - हीमाणहे पलिस्सन्ता हगे एदेण नियविधिणो दुव्ववसिदेण ॥

**[ हीमाणहे विस्मय-निर्वेदे ]** **हीमाणहे** प्रथमा सि । विस्मय-निर्वेद सप्तमी ङि ।

**[ हीमाणहे जीवन्त-वश्चा मे जणणी ]** हीमाणहे अनेन । जीवद्वत्सा । 'शत्रानशः' (३।१८१) अत्० → न्त० **जीवन्त** । 'ह्रस्वात् थ्य-श्च-त्स०' (२।२१) त्सा० → छा० । 'छस्य श्चोऽनादौ' (४।२९५) छा० → श्चा० **वश्चा** ।

अस्मद् । षष्ठी ङस् । 'मे-मइ-मम-मह-महं०' (३।११३) ङसा सह अस्मद्० → **मे** आदेशः ।

**[ हीमाणहे पलिस्सन्ता हगे एदेण निअविधिणो दुव्ववसिदेण ]** परिश्रान्ता । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शा० → सा० । 'अनादौ०' (२।८९) द्वित्वं-सा० → स्सा० । 'ह्रस्वः संयोगे' (१।८४) स्सा० → स्स० । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **पलिस्सन्ता** ।

वयम् । 'अहं-वयमोर्हगे' (४।३०१) वयम्० → **हगे०** ।

एतेन । 'तो दोऽनादौ०' (४।२६०) ते० → दे० । 'नो णः' (१।२२८) न० → ण० **एदेण** ।

निजविधि । षष्ठी ङस् । 'ङसि-ङसोः पुं-क्लीबे वा' (३।२३) ङसि० → णो० । 'क-ग-च-ज०' (१।१७७) ज्लुक् **निअविधिणो** ।

दुर्व्यवसितेन । 'अधो म-न-याम्' (२।७८) य्लुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - व० → व्व० । 'तो दोऽनादौ०' (४।२६०) ते० → दे० । 'नो णः' (१।२२८) न० → ण० **दुव्ववसिदेण** ।

वयं निजविधेर्निजकर्मणः एतेन दुर्व्यवसितेन - दुष्टविलसितेन परिश्रान्ता इत्यर्थः ॥२८२॥

## णं नन्वर्थे ॥ ८।४।२८३ ॥

शौरसेन्यां नन्वर्थे णमिति निपातः प्रयोक्तव्यः ॥

णं अफलोदया । णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं । णं[१] भवं मे अग्गदो चलदि ॥

आर्षे वाक्यालङ्कारेऽपि दृश्यते - नमोत्थु णं । जया णं । तया णं ॥

**[ णं नन्वर्थे ]** णं प्रथमा सि । नन्वर्थ सप्तमी ङि ।

**[ णं अफलोदया ] णं** सूत्रेण सिद्धम् । अफल उदयो यस्याः सा = **अफलोदया** स्त्री ।

**[ णं अय्यमिस्सेहिं पुढमं य्येव आणत्तं ]** आर्यमिश्र । तृतीया भिस् । 'भिसो हि-हिँ-हिं' (३।७) भिस्० → हिं । 'भिस्-भ्यस्-सुपि' (३।१५) श्र० → श्रे० । 'नवा र्यो य्यः' (४।२६६) र्य० → य्य० । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - शे० → श्शे० । 'श-षोः सः' (१।२६०) श्शे० → स्से० **अय्यमिस्सेहिं** ।

प्रथम । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'प्रथमे प-थोर्वा' (१।५५) प० → पु० । 'मेथी-शिथिर-शिथिल-प्रथमे थस्य ढः' (१।२१५) थ० → ढ० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **पुढमं** ।

एव । 'एवार्थे य्येव' (४।२८०) **य्येव** निपातः ।

आज्ञप्तम् । 'म्न-ज्ञोर्णः' (२।४२) ज्ञस्य णः । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) द्वित्वं - तं० → त्तं० **आणत्तं** ।

**[ णं भवं मे अग्गदो चलदि ]** भवान् । 'स्वराणां स्वराः' (४।२३८) वा० → व० । 'भवद्-भगवतोः' (४।२६५) न्० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **भवं** ।

अग्रतः । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ग० → ग्ग० । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'अतो डो विसर्गस्य' (१।३७) विसर्गस्य डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) **अग्गदो** ।

'चल कम्पने' (९७२) चल् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) चलति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० **चलदि** ।

---

१. विदूषकः - **णं** भवं अग्गदो मे वट्टदि । [अभि० शा० द्वितीयेऽङ्के]
ननु भवानग्रतो मे वर्त्तते ।

**[ नमोत्थु णं ]** नमोऽस्तु । 'स्तस्य थोऽसमस्त-स्तम्बे' (२।४५) स्तु० → थु० । 'अनादौ०' (२।८९) द्वित्वं - थु० → थ्थु० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः **नमोत्थु णं** ।

**[ जया णं ]** यदा । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० । 'आदेर्यो जः' (१।२४५) य० → ज० **जया णं** ।

**[ तया णं ]** तदा । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० **तया णं** ॥२८३॥

## अम्महे हर्षे ॥ ८।४।२८४ ॥

शौरसेन्यां अम्महे इति निपातो हर्षे प्रयोक्तव्यः ॥

अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ॥

**[ अम्महे हर्षे ]** अम्महे प्रथमा सि । हर्ष सप्तमी ङि ।

**[ अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ]** एतद् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ० । 'टा-ङस्-ङेरदादिदेद्वा०' (३।२९) ङि० → ए० । 'क-ग-च-ज०' (१।१७७) त्लुक् **एआए** ।

सुम्मिला । सप्तमी ङि । 'टा-ङस्-ङे०' (३।२९) ङि० → ए० **सुम्मिलाए** ।

परिघटित । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'घटेर्गढः' (४।११२) घटि० → गढि० । 'तो दोऽनादौ०' (४।२६०) तस्य दः **पलिगढिदो** । भवान् । **भवं** (४।२६५) सूत्रवत् ॥२८४॥

## हीही विदूषकस्य ॥ ८।४।२८५ ॥

शौरसेन्यां हीही इति निपातो विदूषकाणां हर्षे द्योत्ये प्रयोक्तव्यः ॥

हीही भो ! संपन्ना मणोरधा पियवयस्सस्स ॥

**[ हीही विदूषकस्य ]** हीही प्रथमा सि । विदूषक षष्ठी ङस् ।

**[ हीही भो ! संपन्ना मणोरधा पियवयस्सस्स ]** भोस् इत्यव्ययं सिलुकि सिद्धम् **भो !** । संपन्न । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसो०' (३।४) जस्लुक् **संपन्ना** । मनोरथ । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् । 'थो धः' (४।२६७) था० → धा० । 'नो णः' (१।२२८) नो० → णो० **मणोरधा** । प्रियवयस्य । षष्ठी ङस् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वं-स० → स्स० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **पियवयस्सस्स** । प्रियवयस्यस्य मनोरथाः संपन्ना इत्यर्थः ॥२८५॥

## शेषं प्राकृतवत् ॥ ८।४।२८६ ॥

शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं ततोऽन्यच्छौरसेन्यां प्राकृतवदेव भवति ॥

'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) इत्यारभ्य 'तो दोऽनादौ शौरसेन्यामयुक्तस्य' (४।२६०) एतस्मात्सूत्रात्प्राग् यानि सूत्राणि एषु यान्युदाहरणानि तेषु मध्ये अमूनि तदवस्थान्येव शौरसेन्यां भवन्ति, अमूनि पुनरेवंविधानि भवन्तीति विभागः प्रतिसूत्रं स्वयमभ्यूह्य दर्शनीयः ॥ यथा- अन्दावेदी । जुवदिजणो । मणसिला इत्यादि ॥

**[ अन्दावेदी ]** अन्तर्-वेदि । प्रथमा सि । 'अन्त्य०' (१।११) र्लुक् । 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) दीर्घः- त० → ता० । 'अक्लीबे सौ' (३।१९) दीर्घः- दि० → दी० । 'तो दोऽनादौ०' (४।२६०) ता० → दा० । 'अन्त्यव्य०' (१।११) स्लुक् **अन्दावेदी** ।

**[ जुवदिजणो ]** युवतिजन । प्रथमा सि । 'आदेर्यो जः' (१।२४५) यु० → जु० । 'तो दोऽनादौ०' (४।२६०) ति० → दि० । 'नो णः' (१।२२८) न० → ण० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **जुवदिजणो** ।

**[ मणसिला ]** मनश्शिला । प्रथमा सि । 'अन्त्यव्य०' (१।११) श्लुक् । 'नो णः' (१।२२८) न० → ण० । 'श-षोः सः' (१।२६०) शि० → सि० । 'अन्त्यव्य०' (१।११) स्लुक् **मणसिला** ॥२८६॥

**॥ इति शौरसेनी समाप्ता ॥**

● ● ●

**॥ अथ मागधी भाषा ॥**

## अत एत्सौ पुंसि मागध्याम् ॥ ८।४।२८७ ॥

मागध्यां भाषायां सौ परे अकारस्य एकारो भवति, पुंसि-पुल्लिङ्गे ॥

एषः मेषः → एशे मेशे । एशे पुलिशे । [1]करोमि भदन्त ! → करेमि भंते ! ॥ अत इति किम् ? णिही । कली । गिली ॥ पुंसीति किम् ? जलं ॥

यदपि "पोराणमद्धमागहभासानिययं हवइ सुत्तं" इत्यादिनार्षस्य अर्धमागधभाषानियतत्वमाम्नायि वृद्धैस्तदपि प्रायोऽस्यैव विधानान्न वक्ष्यमाणलक्षणस्य ॥ [2]कयरे आगच्छइ ॥ [3]से तारिसे दुक्खसहे जिइंदिए इत्यादि ॥

**[अत एत्सौ पुंसि मागध्याम्]** अत् षष्ठी ङस् । एत् प्रथमा सि । सि सप्तमी ङि । पुम्स् सप्तमी ङि । मागधी सप्तमी ङि ।

**[एशे मेशे]** एतद् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) तस्य सः । 'र-सोर्ल-शौ' (४।२८८) सस्य शः । एतेन एत्वं-श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् । **एशे** । एष इत्यर्थः ।

मेष । प्रथमा सि । 'श-षोः सः' (१।२६०) षस्य सः । 'र-सोर्ल-शौ' (४।२८८) सस्य शः । अनेन एत्वं - श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **मेशे** ।

**[एशे पुलिशे] एशे** पूर्ववत् । पुरुष । प्रथमा सि । 'पुरुषे रोः' (१।१११) रु० → रि० । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'श-षोः सः' (१।२६०) ष० → स० । 'र-सोर्ल-शौ' (४।२८८) स० → श० । एतेन एत्वं - श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **पुलिशे** ।

**[करेमि भंते !]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० मिव् । 'तृतीयस्य मिः' (३।१४१) मिव्० → मि० । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) करमि । 'वर्त्तमाना-पञ्चमी०' (३।१५८) र० → रे० **करेमि** ।

भदन्त । प्रथमा सि । गोणादित्वाद् आर्षत्वाद्वा दलोपः । अनेन एत्वं - त० → ते० **भंते !** ।

---

१. **करेमि भंते** ! सामाइयं सावज्जं जोगं पच्चक्खामि । [आवश्यकसूत्रे सामायिकसूत्रे]
करोमि भदन्त ! सामायिकं सावद्यं योगं प्रत्याख्यामि ।

२. **कयरे आगच्छइ** दित्तरूवे, काले विगराले फोक्कनासे ।
ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिअ कंठे ॥ [उत्तरा० द्वादशे हरिकेशीयाध्ययने गा० ६]

कतर आगच्छति दीप्तरूपः, कालो विकरालो फोक्कनासः । अवमचेलकः पांशुपिशाचभूतः, सङ्करदूष्यं परिधृत्य कण्ठे ॥
३. **से तारिसे दुक्खसहे जिइंदिए,** सुएण जुत्ते अममे अकिंचणे । विरायई कम्मघणंमि अवगए, कसिणब्भपुडावगमे व चंदिमे ॥
॥ त्ति बेमि ॥

[दश० वै० अष्टमे आचारप्रणिध्यध्ययने गाथा-६३]
स तादृशो दुःखसहो जितेन्द्रियः श्रुतेन युक्तोऽममोऽकिञ्चनः । विराजते कर्मघनेऽपगते, कृत्स्नाभ्रपुटावगमे इव चन्द्रमाः ॥
॥ इति ब्रवीमि ॥

**[ णिही ]** निधि । प्रथमा सि । 'वाऽऽदौ' (१।२२९) नि० → णि० । 'ख-घ-थ-ध-भाम्' (१।१८७) धि० → हि० । 'अक्लीबे सौ' (३।१९) दीर्घः-हि० → ही० । 'अन्त्यव्य०' (१।११) स्लुक् **णिही** ।

**[ कली ]** करिन् । प्रथमा सि । 'अन्त्यव्य०' (१।११) न्लुक् । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'अक्लीबे सौ' (३।१९) दीर्घः-लि० → ली० । 'अन्त्यव्य०' (१।११) स्लुक् **कली** ।

**[ गिली ]** गिरि । प्रथमा सि । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'अक्लीबे सौ' (३।१९) दीर्घः-लि० → ली० । 'अन्त्यव्य०' (१।११) स्लुक् **गिली** ।

यद् वृद्धैरार्षस्य सूत्रमर्द्धमागधीभाषया सहितं कथितं तत्प्रायोऽस्यैव सूत्रस्य विधानान्न तु वक्ष्यमाणलक्षणस्य सूत्रस्य ।

**[ कयरे आगच्छइ ]** कतर । प्रथमा सि । अनेन एत्त्वं- र० → रे० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'अन्त्यव्य०' (१।११) स्लुक् **कयरे** ।

आङ्पूर्व० 'गम्लृं गतौ' (३९६) गम् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आगमति । 'गमिष्यमासां छः' (४।२१५) म० → छ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **आगच्छइ** ।

**[ से तारिसे दुक्खसहे जिइंदिए ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । अनेन एत्त्वं-स० → से० । 'अन्त्यव्य०' (१।११) स्लुक् **से** ।

तादृश । प्रथमा सि । 'दृशः क्विप्-टक्-सकः' (१।१४२) रिः । 'क-ग-ट-ड०' (२।७७) द्लुक् । 'श-षोः सः' (१।२६०) श० → स० । अनेन एत्त्वं-स० → से० । 'अन्त्यव्य०' (१।११) स्लुक् **तारिसे** ।

दुःखसह । 'निर्दुरोर्वा' (१।१३) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन एत्त्वं - ह० → हे० । 'अन्त्यव्य०' (१।११) स्लुक् **दुक्खसहे** ।

जितेन्द्रिय । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ते० → ति० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'सर्वत्र०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) य्लुक् । अनेन एत्त्वं - अ० → ए० । 'अन्त्यव्य०' (१।११) स्लुक् **जिइंदिए** ॥२८७॥

## र-सोर्ल-शौ ॥ ८।४।२८८ ॥

मागध्यां रेफस्य दन्त्यसकारस्य च स्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति ॥

र - नले । कले ॥ स-हंशे । शुदं । शोभणं ॥ उभयोः-शालसे । **पुलिशे** ॥

> लहश-वश-नमिल-शुल-शिल-विअलिद-मन्दाल-लायिदंहि-युगे ।
> वील-यिणे पक्खालदु मम शयलमवय्य-यम्बालं ॥१॥

**[ र-सोर्ल-शौ ]** र-स् षष्ठी ओस् । ल-श प्रथमा औ ।

**[ नले ]** नर । प्रथमा सि । अनेन रस्य लः । 'अत एत्सौ पुंसि मागध्याम्' (४।२८७) एत्त्वं - ल० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **नले** ।

**[ कले ]** कर । प्रथमा सि । अनेन रस्य लः । 'अत एत्सौ०' (४।२८७) एत्त्वं-ल० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **कले** ।

[1] **[ गले ]** गर । प्रथमा सि । अनेन रस्य लः । 'अत एत्सौ०' (४।२८७) एत्त्वं - ल० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **गले** ।

**[ हंशे ]** हंस । प्रथमा सि । अनेन स० → श० । 'अत एत्सौ पुंसि०' (४।२८७) श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **हंशे** ।

**[ शुदं ]** श्रुत । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'श-षोः सः' (१।२६०) शु० → सु० । अनेन सु० → शु० । 'शेषं शौरसेनीवत्' (४।३२३) इति न्यायात् 'तो दोऽनादौ०' (४।२६०) तस्य दः । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **शुदं** ।

**[ शोभणं ]** शोभन । प्रथमा सि । 'श-षोः सः' (१।२६०) शो० → सो० । अनेन सस्य शः । 'नो णः' (१।२२८) न० → ण० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **शोभणं** ।

**[ शालशे ]** सारस । प्रथमा सि । अनेन सा-स० → शा-श०- र० → ल० च । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **शालशे** ।

**[ पुलिशे ]** पुरुष । प्रथमा सि । 'पुरुषे रोः' (१।१११) रु० → रि० । अनेन रि० → लि० । 'श-षोः सः' (१।२६०) षस्य सः । अनेन सस्य शः । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **पुलिशे** ।

**[ लहश-वश-नमिल-शुल-शिल-विअलिद......... ]**

अस्यार्थः- रभस- वश-नम्र-सुर-शिरः-विगलित-मन्दार-राजितांह्रियुगः ।
वीरजिनः प्रक्षालयतु मम सकलमवद्य-जम्बालम् ॥

अथ व्युत्पत्तिः- **[ लहश ]** रभस । अनेन रस्य लः- सस्य शः । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः **लहश** ।

**[ वश ]** वश । 'श-षोः सः' (१।२६०) श० → स० । अनेन स० → श० **वश** ।

**[ नमिल ]** नम्र । 'लात्' (२।१०६) रपूर्व० इ० । 'लोकात्' (१।१।३) नमिर । अनेन रस्य लः **नमिल** ।

**[ शुल ]** सुर । अनेन रस्य लः - सस्य शः **शुल** ।

**[ शिल ]** शिरस् । 'अन्त्यव्य०' (१।११) स्लुक् । 'श-षोः सः' (१।२६०) शि० → सि० । अनेन र० → ल० - सि० → शि० **शिल** ।

**[ विअलिद ]** विगलित । 'क-ग-च-ज०' (१।१७७) ग्लुक् । 'शेषं शौरसेनीवत्' (४।३२३) इति न्यायात् 'तो दोऽनादौ०' (४।२६०) त० → द० **विअलिद** ।

**[ मन्दाल ]** मन्दार । अनेन रस्य लः **मन्दाल** ।

**[ लायिदंहियुगे ]** राजितांह्रियुग । अनेन रा० → ला० । 'ज-द्य-यां यः' (४।२९२) जि० → यि० । 'ह्रस्वः संयोगे' (१।८४) ता० → त० । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - ग० → गे० । 'अन्त्यव्य०' (१।११) स्लुक् **लायिदंहियुगे** ।

**[ वीलयिणे ]** वीरजिन । प्रथमा सि । अनेन रस्य लः । 'ज-द्य-यां यः' (४।२९२) जि० → यि० । 'नो णः' (१।२२८) न० → ण० । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं- ण० → णे० । 'अन्त्यव्य०' (१।११) स्लुक् **वीलयिणे** ।

१. A. गले उदाहरणम् ।

**[ पक्खालदु ]** प्रपूर्वं० 'क्षलण् शौचे' (१६८८) क्षल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः-क्ष० → क्षा० । पञ्चमी तुव् । 'दु-सु-मु विध्यादि०' (३।१७३) तु० → दु० । 'णेरदेदावावे' (३।१४९) णिच्० → अत्० । 'लोकात्' (१।१।३) प्रक्षालदु । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क्षः खः क्वचित्तु०' (२।३) क्षा० → खा० । 'अनादौ०' (२।८९) द्वित्वं - ख्खा० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः **पक्खालदु** ।

**[ शयलमवय्ययम्बालं ]** सकलम् । अनेन स० → श० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **शयलं** । अवद्यजम्बाल । प्रथमा सि । 'ज-द्य-यां यः' (४।२९२) द्यस्य यः । 'अनादौ०' (२।८९) द्वित्वं- य० → य्य० । 'ज-द्य-यां यः' (४।२९२) ज० → य० **अवय्ययम्बालं** ॥२८८॥

## स-षोः संयोगे सोऽग्रीष्मे ॥ ८।४।२८९ ॥

मागध्यां सकार-षकारयोः संयोगे वर्तमानयोः सो भवति, ग्रीष्मशब्दे तु न भवति ॥ ऊर्ध्वलोपाद्यपवादः ॥

स- पस्खलदि हस्ती । बुहस्पदी । मस्कली । विस्मये । ष-शुस्क-दालुं । कस्टं । विस्नुं । शस्प-कवले । उस्मा । निस्फलं । धनुस्खण्डं ॥ अग्रीष्म इति किम् ? गिम्ह-वाशले ॥

**[ स-षोः संयोगे सोऽग्रीष्मे ]** स-ष् षष्ठी ओस् । संयोग सप्तमी ङि । स प्रथमा सि । अग्रीष्म सप्तमी ङि ।

**[ पस्खलदि हस्ती ]** 'स्खल चलने' (४४८) स्खल्, प्रपूर्व० । वर्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रस्खलति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन स्० → स्० । **पस्खलदि** । प्रचलतीत्यर्थः ।

हस्तिन् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'अक्लीबे सौ' (३।१९) दीर्घ-स्ती० । अनेन स्० → स्० । 'अन्त्यव्य०' (१।११) स्लुक् **हस्ती** ।

**[ बुहस्पदी ]** बृहस्पति । प्रथमा सि । 'वा बृहस्पतौ' (१।१३८) बृ० → बु० । 'अक्लीबे सौ' (३।१९) दीर्घः- ति० → ती० । 'अन्त्यव्य०' (१।११) स्लुक् । 'तो दोऽनादौ शौर०' (४।२६०) त० → द० । अनेन सस्य सः **बुहस्पदी** ।

**[ मस्कली ]** मस्करिन् । प्रथमा सि । 'अन्त्यव्य०' (१।११) न्लुक् । अनेन सस्य सः । 'अक्लीबे सौ' (३।१९) दीर्घः- रि० → री० । 'र-सोर्ल-शौ' (४।२८८) री० → ली० । 'अन्त्यव्य०' (१।११) स्लुक् **मस्कली** संन्यासी ।

**[ विस्मये ]** विस्मय । प्रथमा सि । अनेन सस्य सः । 'अतः एत्सौ०' (४।२८७) एत्वं - य० → ये० । 'अन्त्यव्य०' (१।११) स्लुक् **विस्मये** ।

**[ शुस्क-दालुं ]** शुष्क-दारु । प्रथमा सि । अनेन षस्य सः । 'श-षोः सः' (१।२६०) शु० → सु० । 'र-सोर्ल-शौ' (४।२८८) रु० → लु० - सु० → शु० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **शुस्क-दालुं** ।

**[ कस्टं ]** कष्ट । प्रथमा सि । अनेन षस्य सः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **कस्टं** ।

**[ विस्नुं ]** विष्णु । प्रथमा सि । अनेन षस्य सः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **विस्नुं** ।

**[ शस्प-कवले ]** शष्प-कवल । प्रथमा सि । 'श-षोः सः' (१।२६०) श० → स० । 'र-सोर्ल-शौ' (४।२८८) स० → श० । अनेन षस्य सः । 'अत एत्सौ०' (४।२८७) एत्वं - ल० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **शस्प-कवले** ।

**[ उस्मा ]** ऊष्मन् । प्रथमा सि । 'अन्त्यव्य०' (१।११) स्लुक्-न्लुक् च । 'पुंस्यन०' (३।५६) इत्यतिदेशात् 'राज्ञः' (३।४९) आ० । 'ह्रस्वः संयोगे' (१।८४) ऊ० → उ० । अनेन षस्य सः **उस्मा** ।

**[ निस्फलं ]** निष्फल । प्रथमा सि । अनेन षस्य सः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **निस्फलं** ।

**[ धनुस्खण्डं ]** धनुष्खण्ड । प्रथमा सि । अनेन षस्य सः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **धनुस्खण्डं** ।

**[ गिम्हवाशले ]** ग्रीष्मवासर । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ग्री० → ग्रि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्म० → म्ह० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं - र० → रे० । 'र-सोर्ल-शौ' (४।२८८) स० → श० - रे० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **गिम्हवाशले** ॥२८९॥

## ट्ट-ष्ठयोः स्टः ॥ ८।४।२९० ॥

द्विरुक्तस्य टस्य षकाराक्रान्तस्य च ठकारस्य मागध्यां सकाराक्रान्तः टकारो भवति ॥

ट्ट - पस्टे । भस्टालिका । भस्टिणी ॥ ष्ठ-शुस्टु कदं । कोस्टागालं ॥

**[ ट्ट-ष्ठयोः स्टः ]** ट्ट-ष्ठ षष्ठी ओस् । स्ट प्रथमा सि ।

**[ पस्टे ]** पट्ट । प्रथमा सि । अनेन ट्ट० → स्ट० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं-स्ट० → स्टे० । 'अन्त्यव्य०' (१।११) स्लुक् **पस्टे** ।

**[ भस्टालिका ]** भट्टारिका । प्रथमा सि । अनेन ट्टा० → स्टा० । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'अन्त्यव्य०' (१।११) स्लुक् **भस्टालिका** ।

**[ भस्टिणी ]** भट्टिनी । प्रथमा सि । अनेन ट्टि० → स्टि० । 'नो णः' (१।२२८) नी० → णी० । 'अन्त्यव्य०' (१।११) स्लुक् **भस्टिणी** ।

**[ शुस्टु कदं ]** सुष्ठु कृतम् । 'र-सोर्ल-शौ' (४।२८८) सु० → शु० । अनेन ष्ठु० → स्टु० । 'ऋतोऽत्' (१।१२६) कृ० → क० । 'तो दोऽनादौ०' (४।२६०) तस्य दः **शुस्टु कदं** ।

**[ कोस्टागालं ]** कोष्ठागारम् । अनेन ष्ठा० → स्टा० । 'र-सोर्ल-शौ' (४।२८८) रं० → लं० **कोस्टागालं** ॥२९०॥

## स्थ-र्थयोस्तः ॥ ८।४।२९१ ॥

स्थ-र्थ इत्येतयोः स्थाने मागध्यां सकाराक्रान्तः तो भवति ॥

स्थ - उवस्तिदे । शुस्तिदे ॥ र्थ - अस्तवदी । शस्तवाहे ॥

**[ स्थर्थयोस्तः ]** स्थ-र्थ षष्ठी ओस् । स्त प्रथमा सि ।

**[ उवस्तिदे ]** उपस्थित । प्रथमा सि । 'पो वः' (१।२३१) प० → व० । अनेन स्थि० → स्ति० । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'अत एत्सौ पुंसि०' (४।२८७) द० → दे० । 'अन्त्यव्य०' (१।११) स्लुक् **उवस्तिदे** ।

**[ शुस्तिदे ]** सुस्थित । प्रथमा सि । 'र-सोर्ल-शौ' (४।२८८) सु० → शु० । अनेन स्थि० → स्ति० । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'अत एत्सौ पुंसि०' (४।२८७) द० → दे० । 'अन्त्यव्य०' (१।११) स्लुक् **शुस्तिदे** ।

**[ अस्तवदी ]** अर्थपति । प्रथमा सि । अनेन र्थ० → स्त० । 'पो वः' (१।२३१) प० → व० । 'तो दोऽनादौ०' (४।२६०) ति० → दि० । 'अक्लीबे सौ' (३।१९) दीर्घः - दि० → दी० । 'अन्त्यव्य०' (१।११) स्लुक् **अस्तवदी** ।

**[ शस्तवाहे ]** सार्थवाह । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) सा० → स० । 'र-सोर्ल-शौ' (४।२८८) स० → श० । अनेन र्थ० → स्त० । 'अत एत्सौ पुंसि०' (४।२८७) ह० → हे० । 'अन्त्यव्य०' (१।११) स्लुक् **शस्तवाहे** ॥२९१॥

## ज-द्य-यां यः ॥ ८।४।२९२ ॥

मागध्यां ज-द्य-यां स्थाने यो भवति ॥

ज - याणदि । यणवदे । अय्युणे । दुय्यणे । गय्यदि । गुणवय्यिदे ॥ द्य - मय्यं । अय्य किल विय्याहले आगदे ॥ य- यादि । यधाशलूवं । याणवत्तं । यदि ॥ यस्य यत्वविधानं 'आदेर्यो जः' (१।२४५) इति बाधनार्थम् ॥

**[ ज-द्य-यां यः ]** ज-द्य-य् षष्ठी आम् । य प्रथमा सि ।

**[ याणदि ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त० तिव् । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । अनेन जा० → या० **याणदि** ।

**[ यणवदे ]** जनपद । प्रथमा सि । अनेन ज० → य० । 'नो णः' (१।२२८) न० → ण० । 'पो वः' (१।२३१) प० → व० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं - द० → दे० । 'अन्त्यव्य०' (१।११) स्लुक् **यणवदे** ।

**[ अय्युणे ]** अर्जुन । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन जु० → यु० । 'अनादौ०' (२।८९) द्वित्वं० यु० → य्यु० । 'नो णः' (१।२२८) न० → ण० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं - ण० → णे० । 'अन्त्यव्य०' (१।११) स्लुक् **अय्युणे** ।

**[ दुय्यणे ]** दुर्जन । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज० → य० । 'अनादौ०' (२।८९) द्वित्वं- य० → य्य० । 'नो णः' (१।२२८) न० → ण० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं-ण० → णे० । 'अन्त्यव्य०' (१।११) स्लुक् **दुय्यणे** ।

**[ गय्यदि ]** गर्जति । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज० → य० । 'अनादौ०' (२।८९) द्वित्वं - य० → य्य० । 'तो दोऽनादौ०' (४।२६०) ('अतो देश्च' (४।२७४)) ति० → दि० **गय्यदि** ।

**[ गुणवय्यिदे ]** गुणवर्जित । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन जि० → यि० । 'अनादौ०' (२।८९) द्वित्वं - यि० → य्यि० । 'तो दोऽनादौ०' (४।२६०) त० → द० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं- द० → दे० । 'अन्त्यव्य०' (१।११) स्लुक् **गुणवय्यिदे** ।

**[ मय्यं ]** मद्य । प्रथमा सि । अनेन द्य० → य० । 'अनादौ०' (१।११) द्वित्वं - य० → य्य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **मय्यं** ।

**[ अय्य किल विय्याहले आगदे ]** अद्य किल विद्याधर आगतः । प्रथमा सि । अनेन द्य० → य० । 'अनादौ०' (२।८९) द्वित्वं - य० → य्य० । 'ख-घ-थ-ध-भाम्' (१।१८७) धस्य हः । 'र-सोर्ल-शौ' (४।२८८) र० → ल० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वम् । 'तो दोऽनादौ०' (४।२६०) तस्य दः **अय्य किल विय्याहले आगदे** ।

**[ यादि ]** 'यांक् प्रापणे' (१०६२) या । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) इच्० → दि० । अनेन यस्य यः **यादि** ।

**[ यधाशलूवं ]** यथास्वरूपम् । अनेन यस्य यः । 'थो धः' (४।२६७) था० → धा० । 'सर्वत्र ल-व०' (२।७९) वलुक् । 'र-सोर्ल-शौ' (४।२८८) स० → श० - रू० → लू० । 'पो वः' (१।२३१) प० → व० **यधाशलूवं** ।

**[ याणवत्तं ]** यानपात्र । अनेन यस्य यः । 'नो णः' (१।२२८) न० → ण० । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'पो वः' (१।२३१) प० → व० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त० → त्त० । प्रथमा सि । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **याणवत्तं** ।

**[ यदि ]** यदि । अनेन यस्य यः **यदि** ॥२९२॥

## न्य-ण्य-ज्ञ-ञ्जां ञ्ञः ॥ ८।४।२९३ ॥

मागध्यां न्य-ण्य-ज्ञ-ञ्ज इत्येतेषां द्विरुक्तो ञो भवति ॥

न्य-अहिमञ्ञु-कुमाले । अञ्ञ-दिशं । शामञ्ञ-गुणे । कञ्ञका-वलणं ॥ ण्य-पुञ्ञवन्ते । अबम्हञ्ञं । पुञ्ञाहं । पुञ्ञं ॥ ज्ञ - पञ्ञा-विशाले । शव्वञ्ञे । अवञ्ञा ॥ ञ्ज-अञ्ञली । धणञ्ञए । पञ्ञले ॥

**[ न्य-ण्य-ज्ञ-ञ्जां ञ्ञः ]** न्य-ण्य-ज्ञ-ञ्ज् षष्ठी आम् । ञ्ञ प्रथमा सि ।

**[ अहिमञ्ञु-कुमाले ]** अभिमन्यु-कुमार । प्रथमा सि । 'ख-घ-थ-घ-भाम्' (१।१८७) भि० → हि० । अनेन न्यु० → ञ्ञु० । 'र-सोर्ल-शौ' (४।२८८) र० → ल० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं-ल० → ले० । 'अन्त्य०' (१।११) स्लुक् **अहिमञ्ञु-कुमाले** ।

**[ अञ्ञ-दिशं ]** अन्य-दिशम् । अनेन न्य० → ञ्ञ० **अञ्ञ-दिशं** ।

**[ शामञ्ञ-गुणे ]** सामान्य-गुण । प्रथमा सि । 'र-सोर्ल-शौ' (४।२८८) सा० → शा० । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । अनेन न्य० → ञ्ञ० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं - ण० → णे० । 'अन्त्यव्य०' (१।११) स्लुक् **शामञ्ञ-गुणे** ।

**[ कञ्ञका-वलणं ]** कन्यका-वरणम् । अनेन न्य० → ञ्ञ० । 'र-सोर्ल-शौ' (४।२८८) र० → ल० **कञ्ञका - वलणं** ।

**[ पुञ्ञवन्ते ]** पुण्यवत् । प्रथमा सि । 'आल्विल्लोल्लाल-वन्त-मन्तेत्तेर०' (२।१५९) वन्त० । अनेन ण्य० → ञ्ञ० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं - वन्त० → वन्ते० **पुञ्ञवन्ते** ।

**[ अबम्हञ्ञं ]** अब्राह्मण्यम् । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) ब्रा० → ब्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक्-ब्र० → ब० । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ह्म० → म्ह० । अनेन ण्य० → ञ्ञ० **अबम्हञ्ञं** ।

**[ पुञ्ञाहं ]** पुण्याहम् । अनेन ण्या० → ञ्ञा० **पुञ्ञाहं** ।

**[ पुञ्ञं ]** पुण्यम् । अनेन ण्य० → ञ्ञ० **पुञ्ञं** ।

**[ पञ्ञा-विशाले ]** प्रज्ञा-विशाल । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज्ञा० → ञ्ञा० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं-ल० → ले० **पञ्ञा-विशाले** ।

**[ शव्वञ्ञे ]** सर्वज्ञ । प्रथमा सि । 'र-सोर्ल-शौ' (४।२८८) स० → श० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज्ञ० → ञ्ञ० । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - ञ्ञ० → ञ्ञे० **शव्वञ्ञे** ।

**[ अवञ्ञा ]** अवज्ञा । अनेन ज्ञा० → ञ्ञा० **अवञ्ञा** ।

**[ अञ्ञली ]** अञ्जली । अनेन ञ्ज० → ञ्ञ० **अञ्ञली** ।

**[ धणञ्ञए ]** धनञ्जय । प्रथमा सि । 'नो णः' (१।२२८) न० → ण० । अनेन ञ्ज० → ञ्ञ० । 'क-ग-च-ज०' (१।१७७) य्लुक् । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - अ० → ए० **धणञ्ञए** ।

**[ पञ्ञले ]** प्राञ्जल । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) प्रा० → प्र० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ञ्ज० → ञ्ञ० । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - ल० → ले० **पञ्ञले** ॥२९३॥

## व्रजो जः ॥ ८।४।२९४ ॥

मागध्यां व्रजेर्जकारस्य ञ्ञो भवति ॥ यापवादः ॥ वञ्ञदि ॥

**[ व्रजो जः ]** व्रज् षष्ठी ङस् । ज् षष्ठी ङस् ।

**[ वञ्ञदि ]** 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज० → ञ्ञ० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) वञ्ञति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'दिरिचेचोः' (४।२७३) ('अतो देश्च' (४।२७४) ) इच्० → दि० **वञ्ञदि** । व्रजतीत्यर्थः ॥२९४॥

## छस्य श्चोऽनादौ ॥ ८।४।२९५ ॥

मागध्यामनादौ वर्तमानस्य छस्य तालव्यशकाराक्रान्तश्चो भवति ॥

गश्चदि । उच्छलदि । पिश्चिले । पुश्चदि ॥ लाक्षणिकस्यापि-आपन्नवत्सलः → आपन्नवश्चले । तिर्यक् प्रेक्षते → तिरिच्छि पेच्छइ । तिरिश्चि पेस्कदि ॥ अनादाविति किम् ? छाले ॥

**[ छस्य श्चोऽनादौ ]** छ षष्ठी ङस् । श्च प्रथमा सि । अनादि सप्तमी ङि ।

**[ गश्चदि ]** गच्छति । अनेन छस्य श्च० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **गश्चदि** ।

**[ उश्चलदि ]** उच्छलति । अनेन छस्य श्च० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **उश्चलदि** ।

**[ पिश्चिले ]** पिच्छिल । प्रथमा सि । अनेन छस्य श्च० । 'अत एत्सौ पुंसि०' (४।२८७) एत्वं- ल० → ले० । 'अन्त्यव्य०' (१।११) स्लुक् **पिश्चिले** ।

**[ पुश्चदि ]** 'प्रछंत् ज्ञीप्यायाम्' (१३४७) प्रछ् । वर्त्त० तिव् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रछति । 'प्रच्छः पुच्छः' (४।९७) पुच्छ० । अनेन छस्य श्च० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **पुश्चदि** ।

**[ छाले ]** छाग । प्रथमा सि । 'छागे लः' (१।१९१) गस्य लः । 'अत एत्सौ पुंसि०' (४।२८७) एत्त्वं - ल० → ले० **छाले** ॥२९५॥

## क्षस्य ᳲकः ॥ ८।४।२९६ ॥

मागध्यामनादौ वर्तमानस्य क्षस्य ᳲको जिह्वामूलीयो भवति ॥

यᳲके । लᳲकशे ॥ अनादावित्येव - खयजलहला । क्षयजलधरा इत्यर्थः ॥

**[ क्षस्य ᳲकः ]** क्ष षष्ठी ङस् । ᳲक प्रथमा सि ।

**[ यᳲके ]** यक्ष । प्रथमा सि । अनेन क्षस्य ᳲक० । 'अत एत्सौ पुंसि मागध्याम्' (४।२८७) ᳲके । 'अन्त्यव्य०' (१।११) स्लुक् **यᳲके** ।

**[ लᳲकशे ]** राक्षस । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'र-सोर्ल-शौ' (४।२८८) र० → ल० । अनेन क्षस्य ᳲक० । 'र-सोर्ल-शौ' (४।२८८) स० → श० । 'अत एत्सौ पुंसि०' (४।२८७) श० → शे० । 'अन्त्यव्य०' (१।११) स्लुक् **लᳲकशे** ।

**[ खयजलहला ]** क्षयजलधर । प्रथमा जस् । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्ष० → ख० । 'ख-घ-थ-ध-भाम्' (१।१८७) ध० → ह० । 'र-सोर्ल-शौ' (४।२८८) र० → ल० । 'जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः' (३।१२) दीर्घः- ल० → ला० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **खयजलहला** ॥२९६॥

## स्कः प्रेक्षा-ऽऽचक्षोः ॥ ८।४।२९७ ॥

मागध्यां प्रेक्षेराचक्षेश्च क्षस्य सकाराक्रान्तः को भवति ॥ जिह्वामूलीयापवादः ॥ पेस्कदि । आचस्कदि ॥

**[ स्कः प्रेक्षा-ऽऽचक्षोः ]** स्क प्रथमा सि । प्रेक्षा-ऽऽचक्ष् षष्ठी ओस् ।

**[ पेस्कदि ]** प्रपूर्व० 'ईक्षि दर्शने' (८८२) ईक्ष् । वर्त्त० ते । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पेक्षते । अनेन क्षस्य स्क० । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **पेस्कदि** ।

**[ आचस्कदि ]** आङ्पूर्व० 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष् । वर्त्त० ते । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) आचक्षते । अनेन क्षस्य स्क० । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **आचस्कदि** ॥२९७॥

## तिष्ठश्चिष्ठः ॥ ८।४।२९८ ॥

मागध्यां स्थाधातोर्यस्तिष्ठ इत्यादेशस्तस्य चिष्ठ इत्यादेशो भवति ॥ चिष्ठदि ॥

**[ तिष्ठश्चिष्ठः ]** तिष्ठ् षष्ठी ङस् । चिष्ठ प्रथमा सि ।

**[ चिष्ठदि ]** स्था । वर्त्त० तिव् । 'श्रोति-कृवु-धिवु०' (४।२।१०८) इत्यादिना तिष्ठ । अनेन तिष्ठ० → चिष्ठ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० **चिष्ठदि** ॥२९८॥

## अवर्णाद्वा ङसो डाहः ॥ ८।४।२९९ ॥

मागध्यामवर्णात्परस्य ङसो डिद् आह इत्यादेशो वा भवति ॥

[1]हगे न एलिशाह कम्माह काली । [2]भगदत्त-शोणिदाह कुम्भे । पक्षे- भीमशेणस्स पश्चादो हिण्डीअदि । [3]हिडिम्बाए घडुक्कय-शोकेण उवशमदि ॥

**[ अवर्णाद्वा ङसो डाहः ]** अवर्ण पञ्चमी ङसि । वा प्रथमा सि । ङस् षष्ठी ङस् । डाह प्रथमा सि ।

**[ हगे न एलिशाह कम्माह काली ]** अहम् । 'अहं-वयमोर्हगे' (४।३०१) इत्यनेन हगे आदेशः **हगे** ।

ईदृश । 'दृशः क्विप्-टक्-सकः' (१।१४२) रि० । 'एत्पीयूषा-ऽऽपीड-बिभीतक-कीदृशेदृशे' (१।१०५) ई० → ए० । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । अनेन वा ङस्स्थाने डाह० → आह० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **एलिशाह** ।

कर्मन् । षष्ठी ङस् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - म० → म्म० । अनेन वा ङस्स्थाने डाह० → आह० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः **कम्माह** ।

कारी । 'र-सोर्ल-शौ' (४।२८८) री० → ली० **काली** ।

अहं न ईदृशस्य कर्मणः कारी ।

**[ भगदत्तशोणिदाह कुम्भे ]** **भगदत्त**शब्दो निर्ग्रन्थेषु सांख्येषु च । शोणित । षष्ठी ङस् । अस्य कार्यम् । 'तो दोऽनादौ०' (४।२६०) त० → द० **शोणिदाह** ।

कुम्भ । प्रथमा सि । 'अत एत्सौ पुंसि०' (४।२८७) भ० → भे० **कुम्भे** । पक्षे-

**[ भीमशेणस्स पश्चादो हिण्डीअदि ]** भीमसेन । षष्ठी ङस् । 'र-सोर्ल-शौ' (४।२८८) से० → शे० । 'नो णः' (१।२२८) न० → ण० । 'ङसः स्सः' (३।१०) ङस्० → स्स० **भीमशेणस्स** ।

पश्चात् । षष्ठी ङस्(पञ्चमी ङसि) । 'अन्त्यव्य०' (१।११) त्लुक् **पश्चादो** ।

'हिडुङ् गतौ च' (७०४) हिड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → ईअ० । 'अतो देश्च' (४।२७४) इच्० → दि० **हिण्डीअदि** । भीमसेनस्य पश्चात् हिण्ड्यते इत्यर्थः ।

**[ हिडिम्बाए घडुक्कय-शोकेण उवशमदि ]** हिडिम्बा । षष्ठी ङस् । 'टा-ङस्-ङेर०' (३।२९) ङस्० → ए० **हिडिम्बाए** ।

---

१. पुरुषः - पशीदन्तु भावमिश्शे । **हगे ण ईदिशकम्मकाली** । [अभि० शा० षष्ठेऽङ्के]
प्रसीदन्तु भावमिश्राः । अहं नेदृशकर्मकारी ।

२. राक्षसी - अले लुहिलप्पिआ ! पूव्वशञ्चिअं तुमं वि जाणाशि जेव्व । णवशञ्चिअं शिणु दाव । **भअदत्तशोणिएहिं कुम्भे** शिन्धुलाअवशाहिं कुम्भे दुवे दुवदमच्छाहिवभूलिश्शवशोमदत्तबह्लिअप्पमुहाणं णलिन्दाणं अण्णाणं वि पाकिदपुलिशाणं लुहिलमंशेहिं पुलिदाइं घडशदाइं अशंक्खाइ शन्ति मे गेहे । [वे० सं० तृतीयेऽङ्के]
अरे रुधिरप्रिय ! पूर्वसञ्चितं त्वमपि जानास्येव । नवसञ्चितं शृणु तावत् । भगदत्तशोणितौ कुम्भः सिन्धुराजवसाभिः कुम्भौ द्वौ द्रुपदमत्स्याधिपभूरिश्रवःसोमदत्तबाह्लीकप्रमुखाणां नरेन्द्राणामन्येषामपि प्राकृतपुरुषाणां रुधिरमांसौ पूरितानि घटशतान्यसंख्यानि सन्ति मे गेहे ।

३. राक्षसी - लुहिलप्पिआ ! अज्जवि शामिणीए **हिडिम्बादेवीए घडुक्कअशोए ण उपशमइ** । [वे० सं० तृतीयेऽङ्के]
रुधिरप्रिय ! अद्यापि स्वामिन्या हिडिम्बादेव्या घटोत्कचशोको नोपशाम्यति ।

घटोत्कचशोक । तृतीया टा । 'ह्रस्वः संयोगे' (१।८४) टो० → टु० । 'टो डः' (१।१९५) टु० → डु० । 'क-ग-ट-ड०' (२।७७) त्लुक् । 'अनादौ०' (२।८९) द्वित्वं - क० → क्क० । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) एत्त्वं-क० → के० **घडुक्कय-शोकेण** ।

उपपूर्व० 'शमू उपशमे' (१२३०) शम् । वर्त्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) उपशमति । 'पो वः' (१।२३१) प० → व० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'अतो देश्च' (४।२७४) इच्० → दि० । 'वर्तमाना-पञ्चमी०' (३।१५८) एत्त्वं - म० → मे० **उवशमेदि** । हिडिम्बाया घटोत्कचशोकेन उपशमतीत्यर्थः ॥२९९॥

## आमो डाहँ वा ॥ ८।४।३०० ॥

मागध्यामवर्णात्परस्य आमोऽनुनासिकान्तो डित् आहादेशो वा भवति ॥

शयणाहँ मु(सु)हं । पक्षे - नलिन्दाणं ॥ व्यत्ययात् प्राकृतेऽपि-ताहँ । तुम्हाहँ । अम्हाहँ । सरिआहँ । कम्माहँ ॥

**[ आमो डाहँ वा ]** आम् षष्ठी ङस् । डाहँ प्रथमा सि । वा प्रथमा सि ।

**[ शयणाहँ सुहं ]** स्वजन । षष्ठी आम् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । 'र-सोर्ल-शौ' (४।२८८) स० → श० । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन वा आम्० → डाहँ० → आहँ० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'नो णः' (१।२२८) ना० → णा० **शयणाहँ** । सुखं → **सुहं** ।

**[ नलिन्दाणं ]** नरेन्द्र । षष्ठी आम् । 'ह्रस्वः संयोगे' (१।८४) रे० → रि० । 'र-सोर्ल-शौ' (४।२८८) रि० → लि० । 'सर्वत्र ल-व०' (२।७९) ('द्रे रो नवा' (२।८०) ) र्लुक् । 'टा-आमोर्णः' (३।६) आम्० → ण० । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः - **नलिन्दाणं** ।

**[ ताहँ ]** तद् । षष्ठी आम् । अनेन आम्० → डाहँ० → आहँ० । शेषं सुगमम् । **ताहँ** ।

**[ तुम्हाहँ ]** युष्मद् । षष्ठी आम् । अनेन आम्० → डाहँ० → आहँ० । 'युष्मद्यर्थपरे तः' (१।२४६) यु० → तु० । शेषं सुगमम् । **तुम्हाहँ** ।

**[ अम्हाहँ ]** अस्मद् । षष्ठी आम् । अनेन आम्० → डाहँ० → आहँ० । शेषं सुगमम् । **अम्हाहँ** ।

**[ सरिआहँ ]** सरित् । षष्ठी आम् । अनेन आम्० → डाहँ० → आहँ० । शेषं सुगमम् । **सरिआहँ** ।

**[ कम्माहँ ]** कर्मन् । षष्ठी आम् । अनेन आम्० → डाहँ० → आहँ० । शेषं सुगमम् । **कम्माहँ** ॥३००॥

## अहं-वयमोर्हगे ॥ ८।४।३०१ ॥

मागध्यामहं-वयमोः स्थाने हगे इत्यादेशो भवति ॥

[१]हगे शक्कावदालतित्थ(स्त)णिवाशी धीवले । हगे शंपत्ता ॥

**[ अहं-वयमोर्हगे ]** अहं-वयम् षष्ठी ओस् । हगे प्रथमा सि ।

---

१. पुरुषः- सुणध दाणिं । **हगे शक्कावदालब्भन्तरालवाशी धीवले** । [अभि० शा० षष्ठेऽङ्के]
शृणुत इदानीम् । अहं शक्रावताराभ्यन्तरालवासी धीवरः ।

**[हगे शक्कावदालतित्थ(स्त)णिवाशी धीवले]** अहम् । अनेन **हगे** इति । शक्रावतारतीर्थनिवासिन् । प्रथमा सि । 'अन्त्य०' (१।११) नूलुक् । 'अक्लीबे सौ' (३।१९) दीर्घः । 'अन्त्य०' (१।११) सूलुक् । **शेषं स्पष्टम्** । **शक्कावदालतित्थ(स्त)णिवासी** । धीवरः-**धीवले** ॥३०१॥

**शेषं शौरसेनीवत् ॥ ८।४।३०२ ॥**

मागध्यां यदुक्तं ततोऽन्यच्छौरसेनीवद् द्रष्टव्यम् ॥

तत्र 'तो दोऽनादौ शौरसेन्यामयुक्तस्य' (४।२६०) [1]पविशदु आयुत्ते शामि-पशादाय ॥

'अधः क्वचित्' (४।२६१) अले ! किं एशे महन्दे कलयले ॥

'वादेस्तावति' (४।२६२) [2]मालेध वा धलेध वा, अयं दाव शे आगमे ॥

'आ आमन्त्र्ये सौ वेनो नः' (४।२६३) भो कञ्चुइआ ! ॥

'मो वा' (४।२६४) भो रायं ! ॥

'भवद्-भगवतोः' (४।२६५) एदु भवं शमणे भयवं महावीले ॥

भयवं कदन्ते ये अप्पणो पॅक्कं उज्झिय पलस्स पॅक्कं पमाणीकलेशि ॥

'नवा र्यो य्यः' (४।२६६) अय्य ! एशे खु कुमाले मलयकेदू ॥

'थो धः' (४।२६७) [3]अले कुम्भिला ! कधेहि ॥

'इह-हचोर्हस्य' (४।२६८) [4]ऊशलध अय्या ! ऊशलध ॥

'भुवो भः' (४।२६९) भोदि ॥

'पूर्वस्य पुरवः' (४।२७०) अपुरवे ॥

'क्त्व इय-दूणौ' (४।२७१) [5]किं खु शोभणे बम्हणे शि त्ति कलिय लञ्ञा पलिग्गहे दिण्णे ॥

'कृ-गमो डडुअः' (४।२७२) कडुअ गडुअ ॥

'दिरिचेचोः' (४।२७३) अमच्च-लॅकशं पेक्खिदुं इदो य्येव आगश्चदि ॥

---

१. उभौ- **पविशदु आवुत्ते शामि-पशादश्श** । [अभि० शा० षष्ठेऽङ्के]
प्रविशतु आवुत्तः स्वामिप्रसादाय ॥

२. पुरुषः - **मालेध वा धलेध वा अयं दाव से आगमे** । [अभि० शा० षष्ठेऽङ्के]
मारयत वा धरत वा अयं तावत् तस्य आगमः ।

३. रक्षिणौ- **अले कुम्भीलआ ! कहेहि** कहिं तुए एशे मणिबन्धणुक्किण्णणामहेए लाअकीए अङ्गुलीअए शमाशादिए । [अभि० शा० षष्ठेऽङ्के]
अरे कुम्भीरक ! कथय कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम् ।

४. चण्डा - **ओसलध अज्जा ! ओसलध**, अवेध माणहे ! अवेध । [मु० रा० चतुर्थे-सप्तमेऽङ्के]
अपसरत आर्याः ! अपसरत, अपेत मान्याः ! अपेत ।

५. प्रथमः - **किं सोहणे बह्मणेत्ति कलिअ रज्जा पडिग्गहे दिण्णे** । [अभि० शा० षष्ठेऽङ्के]
किं शोभनो ब्राह्मण इति कलयित्वा राज्ञा प्रतिग्रहो दत्तः ।

'अतो देश्च' (४।२७४) [१]अले ! किं एशे महन्दे कलयणे शुणीअदे ॥

'भविष्यति स्सिः' (४।२७५) ता कहिं नु गदे लुहिलप्पिए भविस्सिदि ॥

'अतो ङसेर्डादो-डादू' (४।२७६) [२]अहं पि भागुलायणादो मुद्दं पावेमि ॥

'इदानीमो दाणिं' (४।२७७) शुणध दाणिं हगे शक्कावयालतित्थ(स्त)णिवाशी धीवले ॥

'तस्मात्ताः' (४।२७८) ता याव पविशामि ॥

'मोऽन्त्याण्णो वेदेतोः' (४।२७९) युत्तं णिमं । शलिशं णिमं ॥

'एवार्थे य्येव' (४।२८०) मम य्येव ॥

'हञ्जे चेट्याह्वाने' (४।२८१) हञ्जे चदुलिके ! ॥

'हीमाणहे विस्मय-निर्वेदे' (४।२८२) विस्मये-यथा उदात्तराघवे - राक्षसः ॥

हीमाणहे जीवन्त-वश्चा मे जणणी ॥

निर्वेदे - यथा विक्रान्तमीमे - राक्षसः । [३]हीमाणहे पलिस्सन्ता हगे एदेण नियविधिणो दुव्ववशिदेण ॥

'णं नन्वर्थे' (४।२८३)[४]णं अवशलोपशप्पणीया लायाणो ॥

'अम्महे हर्षे' (४।२८४) अम्महे एआए शुम्मिलाए शुपलिगढिदे भवं ॥

'हीही विदूषकस्य' (४।२८५) हीही संपन्ना मे मणोलधा पियवयस्सस्स ॥

'शेषं प्राकृतवत्' (४।२८६) मागध्यामपि 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' (१।४) इत्यारभ्य 'तो दोनादौ शौरसेन्यामयुक्तस्य' (४।२६०) इत्यस्मात् प्राग् यानि सूत्राणि तेषु यान्युदाहरणानि सन्ति तेषु मध्ये अमूनि तदवस्थान्येव, मागध्याममूनि पुनरेवंविधानि भवन्तीति विभागः स्वयमभ्यूह्य दर्शनीयः ॥

**[ पविशदु आवुत्ते शामि-पशादाय ]** प्रविशतु आयुक्तः । स्वामिप्रसाद । चतुर्थी ङे । 'तादर्थ्यङेर्वा' (३।१३२) अस्य सूत्रबलात् संस्कृतसिद्धिः ।

**[ मालेध वा धलेध वा, अयं दाव शे आगमे ]** 'मृत् प्राणत्यागे' (१३३३) मृ । णिग्प्र० । मारि । पञ्चमी ध्वम् । 'णेरदेदावावे' (३।१४९) णिग्० → ए० । 'मध्यमस्येत्था-हचौ' (३।१४३) ध्वम्० → हच्० । 'इह-हचोर्हस्य' (४।२६८) हच्० → ध० **मालेध** । 'धृंग् धारणे' (८८७) धृ । पञ्चमी त । 'ऋवर्णस्याऽरः' (४।२३४) धृ० → धर० ।

---

१. राक्षसी - **अले** लुहिलप्पिआ ! **किं णु क्खु एशे महन्ते कलअले शुणीअदि** । [वे० सं० तृतीयेऽङ्के]
अरे रुधिरप्रिय ! किं नु खल्वेष महान् कलकलः श्रूयते ।

२. क्षप । सावका ! गच्छ, होदु दे कज्जसिद्धी । **अहंपि भागुराअणादो पाडलिउत्तं गन्तुं मुद्दं पडिच्छेमि** । [मु० रा० पञ्चमेऽङ्के]
उपासक ! गच्छ, भवतु ते कार्यसिद्धिः । अहमपि भागुरायणात् पाडलिपुत्तं गन्तुं मुद्रां प्रतीच्छामि ।

३. **हीमाणहे पलिस्सन्ता हगे एदेण नियविधिणो दुव्ववशिदेण** । [विक्रान्तभीमे]
विस्मयः परिश्रान्ता वयमेतेन निजविधेः दुर्व्यवसितेन ।

४. द्वितीयः - **णं अवशलोवशप्पणीआ लाआणो** । [अभि० शा० षष्ठेऽङ्के]
नन्ववसरोपसर्पणीया राजानः ।

'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) धरत । वर्त्तमाना-पञ्चमी-शतृषु वा' (३।१५८) र० → रे० । 'मध्यमस्येत्था- हचौ' (३।१४३) त० → हच्० । 'इह-हचोर्हस्य' (४।२६८) हच्० → ध० **धलेध** ।

**[ अले कुम्भिला ! कधेहि ]** कुम्भो विद्यते यस्याऽसौ कुम्भिर ! । आमन्त्र्ये सि । 'डो दीर्घो वा' (३।३८) र० ! → रा० ! **कुम्भिला !** । 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । पञ्चमी हि । 'दु-सु-मु०' (३।१७३) हि० → सु० । 'सोर्हिर्वा' (३।१७४) सु० → हि० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कथहि । 'वर्त्तमाना-पञ्चमी०' (३।१५८) थ० → थे० । 'थो धः' (४।२६७) थे० → धे० **कधेहि** । अरे कुम्भिरा ! कथयेत्यर्थः ।

**[ ऊशलध अय्या ! ऊशलध ]** उपपूर्व० । 'सृं गतौ' (२५) सृ । 'ऊच्चोपे' (१।१७३) उ० → ऊ० । पञ्चमी त । 'मध्यमस्ये०' (३।१४३) त० → हच्० । 'ऋवर्णस्याऽरः' (४।२३४) सृ० → सर० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'इह-हचोर्हस्य' (४।२६८) हच्० → ध० **ऊशलध** ।

शेषं सर्वत्र पूर्ववत् ॥३०२॥

## ज्ञो ञ्ञः पैशाच्याम् ॥ ८।४।३०३ ॥

पैशाच्यां भाषायां ज्ञस्य स्थाने ञ्ञो भवति ॥

पञ्ञा । सञ्ञा । सव्वञ्ञो । ञ्ञानं । विञ्ञानं ॥

**[ ज्ञो ञ्ञः पैशाच्याम् ]** ज्ञ्-ज्ञा षष्ठी ङस् । ञ्ञ प्रथमा सि । पैशाची सप्तमी ङि ।

**[ पञ्ञा ]** प्रज्ञा । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन ज्ञा० → ञ्ञा० **पञ्ञा** ।

**[ सञ्ञा ]** संज्ञा । 'मांसादेर्वा' (१।२९) अनुस्वारलुक् । अनेन ज्ञा० → ञ्ञा० **सञ्ञा** ।

**[ सव्वञ्ञो ]** सर्वज्ञ । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व० → व्व० । अनेन ज्ञ० → ञ्ञ० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **सव्वञ्ञो** ।

**[ ञ्ञानं ]** ज्ञानम् । अनेन ज्ञा० → ञ्ञा० **ञ्ञानं** ।

**[ विञ्ञानं ]** विज्ञानम् । अनेन ज्ञा० → ञ्ञा० **विञ्ञानं** ॥२०३॥

## राज्ञो वा चिञ् ॥ ८।४।३०४ ॥

पैशाच्यां राज्ञ इति शब्दे यो ज्ञकारस्तस्य चिञ् आदेशो वा भवति ॥

राचिञा लपितं । रञ्ञा लपितं ॥ राचिञो धनं । रञ्ञो धनं ॥ ज्ञ इत्येव - राया ॥

**[ राज्ञो वा चिञ् ]** राजन् षष्ठी ङस् । वा प्रथमा सि । चिञ् प्रथमा सि ।

**[ राचिञा लपितं, रञ्ञा लपितं ]** राज्ञा । अनेन वा ज्ञा० → चिञा० **राचिञा लपितं** । पक्षे- राज्ञा । 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'ज्ञो ञ्ञः पैशाच्याम्' (४।३०३) ज्ञा० → ञ्ञा० **रञ्ञा लपितं** ।

**[ राचिञो धनं, रञ्ञो धनं ]** राज्ञो धनम् (२) । अनेन वा ञः → चिञः **राचिञो धनं** । पक्षे- 'ह्रस्वः संयोगे' (१।८४) रा० → र० । 'ज्ञो ञ्ञः पैशाच्याम्' (४।३०३) ज्ञः → ञः **रञ्ञो धनं** ।

**[ राया ]** राजन् । प्रथमा सि । 'अन्त्य०' (१।११) न्लुक् । 'पुंस्यन आणो राजवच्च' (३।५६) इति न्यायात् 'राज्ञः' (३।४९) इति आ । 'अन्त्यव्य०' (१।११) स्लुक् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) आ० → या० **राया** ॥३०४॥

## न्य-ण्योर्ञ्ञः ॥ ८।४।३०५ ॥

पैशाच्यां न्य-ण्योः स्थाने ञ्ञो भवति ॥

कञ्ञका । अभिमञ्ञू । पुञ्ञ-कम्मो । पुञ्ञाहं ॥

[ **न्य-ण्योर्ञ्ञः** ] न्य-ण्य् षष्ठी ओस् । ञ्ञ प्रथमा सि ।

[ **कञ्ञका** ] कन्यका । अनेन न्य० → ञ्ञ० **कञ्ञका** ।

[ **अभिमञ्ञू** ] अभिमन्यु । अनेन न्यु० → ञ्ञु० **अभिमञ्ञू** ।

[ **पुञ्ञ-कम्मे** ] पुण्य-कर्मा । अनेन ण्य० → ञ्ञ० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-मा० → म्मा० । वाऽऽप ए' (३।४१) म्मा० → म्मे० **पुञ्ञ-कम्मे** ।

[ **पुञ्ञाहं** ] पुण्याहम् । अनेन ण्या० → ञ्ञा० **पुञ्ञाहं** ॥३०५॥

## णो नः ॥ ८।४।३०६ ॥

पैशाच्यां णकारस्य नो भवति ॥ गुन-गन-युत्तो । गुनेन ॥

[ **णो नः** ] ण् षष्ठी ङस् । न प्रथमा सि ।

[ **गुन-गन-युत्तो** ] गुण-गण-युक्त । प्रथमा सि । अनेन ण० → न० । 'क-ग-ट-ड०' (२।७७) क्लुक् । 'अनादौ०' (२।८९) द्वित्वं-त० → त्त० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **गुन-गन-युत्तो** ।

[ **गुनेन** ] गुण । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ण० → णे० । अनेन णे० → ने० - ण० → न० **गुनेन** ॥३०६॥

## त-दोस्तः ॥ ८।४।३०७ ॥

पैशाच्यां तकार-दकारयोस्तो भवति ॥

तस्य - भगवती । पव्वती । सतं ॥ दस्य - मतन-परवसो । सतनं । तामोतरो । पत्तेसो । वतनकं । होतु । रमतु ॥ तकारस्यापि तकारविधानमादेशान्तरबाधनार्थम् - तेन पताका । वेतिसो इत्याद्यपि सिद्धं भवति ॥

[ **त-दोस्तः** ] त-द् षष्ठी ओस् । त प्रथमा सि ।

[ **भगवती** ] भगवती । अनेन तस्य तः - **भगवती** ।

[ **पव्वती** ] पार्वती । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं- व० → व्व० । अनेन तस्य तः - **पव्वती** ।

[ **सतं** ] शत । प्रथमा सि । 'श-षोः सः' (४।३०९) श० → स० । अनेन तस्य तः । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **सतं** ।

[ **मतन-परवसो** ] मदन-परवश । प्रथमा सि । अनेन द० → त० । 'श-षोः सः' (४।३०९) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मतन-परवसो** ।

[ **सतनं** ] सदनम् । अनेन द० → त० **सतनं** ।

**[ तामोतरो ]** दामोदर । प्रथमा सि । अनेन दा० → ता०- द० → त० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तामोतरो** ।

**[ पतेसो ]** प्रदेश । प्रथमा सि । ' सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन द० → त० । 'श-षोः सः' (४।३०९) श० → स० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **पतेसो** ।

**[ वतनकं ]** वदनकम् । अनेन द० → त० **वतनकं** ।

**[ होतु ]** 'भू सत्तायाम्' (१) भू । पञ्चमी तुव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० । 'दु-सु-मु०' (३।१७३) तु० → दु० । अनेन दु० → तु० **होतु** ।

**[ रमतु ]** 'रमि क्रीडायाम्' (९८९) रम् । पञ्चमी ताम् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रमताम् । 'दु-सु-मु०' (३।१७३) ताम्० → दु० । अनेन दु० → तु० **रमतु** ।

**[ पताका ]** पताका । अनेन तस्य तः **पताका** । तकारकरणात् 'प्रत्यादौ डः' (१।२०६) इति डकारप्राप्तो निषेधः ।

**[ वेतिसो ]** वेतस । अनेन तस्य तः । 'इः स्वप्नादौ' (१।४६) त० → ति० **वेतिसो** ॥३०७॥

## लो लः ॥ ८।४।३०८ ॥

पैशाच्यां लकारस्य लकारो भवति ॥ सीलं । कुलं । जलं । सलिलं । कमलं ॥

**[ लो लः ]** ल् षष्ठी ङस् । ल प्रथमा सि ॥३०८॥

## श-षोः सः ॥ ८।४।३०९ ॥

पैशाच्यां श-षोः सो भवति ॥

श- सोभति । सोभनं । ससी । सक्को । सङ्खो ॥ ष- विसमो । विसानो ॥

'न क-ग-च-जादि-षट्-शम्यन्तसूत्रोक्तम्' (४।३२४) इत्यस्य बाधकस्य बाधनार्थोऽयं योगः ॥

**[ श-षोः सः ]** श-ष् षष्ठी ओस् । स प्रथमा सि ।

**[ सोभति ]** 'शुभत् शोभार्थे' (१३८७) शुभ् । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) शुभइ । 'युवर्णस्य गुणः' (४।२३७) शु० → शो० । अनेन शो० → सो० । 'आत्तेश्च' (४।३१९) इच्० → ति० **सोभति** ।

**[ सोभनं ]** शोभनम् । अनेन शो० → सो० **सोभनं** ।

**[ ससी ]** शशी । अनेन **ससी** ।

**[ सक्को ]** शक्र । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-क० → क्क० । अनेन श० → स० **सक्को** ।

**[ सङ्खो ]** शङ्ख । अनेन श० → स० **सङ्खो** ।

**[ विसमो ]** विषम । अनेन ष० → स० **विसमो** ।

**[ विसानो ]** विषाण । अनेन षा० → सा० । 'णो नः' (४।३०६) ण० → न० **विसानो** ॥३०९॥

## हृदये यस्य पः ॥ ८।४।३१० ॥

पैशाच्यां हृदयशब्दे यस्य पो भवति ॥

हितपकं । किं पि किं पि हितपके अत्थं चिन्तयमानी ॥

**[ हृदये यस्य पः ]** हृदय सप्तमी ङि । य षष्ठी ङस् । प प्रथमा सि ।

**[ हितपकं ]** हृदय । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'त-दोस्तः' (४।३०७) द० → त० । अनेन य० → प० **हितपकं** ।

**[ किं पि किं पि हितपके अत्थं चिन्तयमानी ]** किम्-अपि । 'पदादपेर्वा' (१।४१) अलुक् **किं पि किं पि** ।

हितपक पूर्ववत् । सप्तमी ङि । 'ङे-म्मि ङेः' (३।११) ङि० → डे० → ए० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् **हितपके** ।

अर्थ । द्वितीया अम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-थ० → थ्थ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वथस्य तः । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **अत्थं** ।

'चितुण् स्मृत्याम्' (१६४५) चित् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'चुरादि०' (३।४।१७) णिच्प्र० । चिन्तयतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत्० । 'शत्रानशः' (३।१८१) अत्० → माण० आदेशः । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) गुणः । क्वचिदेकपदेऽपि सन्धिस्तेन एकारस्य अय् । 'लोकात्' (१।१।३) चिन्तयमाण । 'णो नः' (४।३०६) ण० → न० । 'अजातेः पुंसः' (३।३२) ङीप्र० **चिन्तयमानी** ॥३१०॥

## टोस्तुर्वा ॥ ८।४।३११ ॥

पैशाच्यां टोः स्थाने तुर्वा भवति ॥ कुतुम्बकं । कुटुम्बकं ॥

**[ टोस्तुर्वा ]** टु षष्ठी ङस् । तु प्रथमा सि । वा प्रथमा सि ।

**[ कुतुम्बकं कुटुम्बकं ]** कुटुम्ब । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । अनेन टु० → तु० । पक्षे- यथास्थिति **कुतुम्बकं कुटुम्बकं** ॥३११॥

## क्त्वस्तूनः ॥ ८।४।३१२ ॥

पैशाच्यां क्त्वाप्रत्ययस्य स्थाने तून इत्यादेशो भवति ॥

गंतून । रंतून । हसितून । पठितून । कधितून ॥

**[ क्त्वस्तूनः ]** क्त्वा षष्ठी ङस् । तून प्रथमा सि ।

**[ गंतून ]** 'गम्लृं गतौ' (३९६) गम् । क्त्वाप्र० । अनेन क्त्वा० → तून० । 'मोऽनु०' (१।२३) अनुस्वारः **गंतून** ।

**[ रंतून ]** 'रमिं क्रीडायाम्' (९८९) रम् । क्त्वाप्र० । अनेन क्त्वा० → तून० । 'मोऽनु०' (१।२३) अनुस्वारः **रंतून** ।

**[ हसितून ]** 'हसे हसने' (५४५) हस् । क्त्वाप्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) हस-क्त्वा । 'एच्च क्त्वा-तुम्०' (३।१५७) स० → सि० । अनेन क्त्वा० → तून० **हसितून** ।

**[ पठितून ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । अनेन क्त्वाप्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) पठ-क्त्वा । 'एच्च क्त्वा-तुम्०' (३।१५७) ठ० → ठि० । अनेन क्त्वा० → तून० **पठितून** ।

**[ कधितून ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । विकल्पेन ण्यन्ताश्चुरादयः साध्यत्वाद्वा णिजभावः । क्त्वाप्र० । अनेन क्त्वा० → तून० इति । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) कथ-तून । 'एच्च क्त्वा-तुम्०' (३।१५७) थ० → थि० । 'थो धः' (४।२६७) थि० → धि० **कधितून** ॥३१२॥

## द्धून-त्थूनौ ष्ट्वः ॥ ८।४।३१३ ॥

पैशाच्यां ष्ट्वा इत्यस्य स्थाने द्धून-त्थून इत्यादेशौ भवतः ॥ पूर्वस्याऽपवादः ॥

नद्धून नत्थून । तद्धून तत्थून ॥

**[ द्धून-त्थूनौ ष्ट्वः ]** द्धून-त्थून प्रथमा औ । ष्ट्वा षष्ठी ङस् ।

**[ नद्धून नत्थून ]** नंष्ट्वा (२) । 'विंशत्यादेर्लुक्' (१।२८) अनुस्वारस्य लुक् । अनेन ष्ट्वा० → द्धून०-त्थून० **नद्धून नत्थून** ।

**[ तद्धून तत्थून ]** दृष्ट्वा (२) । 'ऋतोऽत्' (१।१२६) दृ० → द० । 'त-दोस्तः' (४।३०७) द० → त० । अनेन ष्ट्वा० → द्धून०-त्थून० **तद्धून तत्थून** ॥३१३॥

## र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित् ॥ ८।४।३१४ ॥

पैशाच्यां र्य-स्न-ष्टां स्थाने यथासंख्यं रिय-सिन-सट इत्यादेशाः क्वचिद् भवन्ति ॥

भार्या → भारिआ । स्नातम् → सिनातं । कष्टम् → कसटं ॥ क्वचिदिति किम् ? सुज्जो । सुनुसा । तिट्ठो ॥

**[ र्य-स्न-ष्टाम् ]** र्य-स्न-ष्ट् षष्ठी आम् ।

**[ रिय-सिन-सटाः क्वचित् ]** रिय-सिन-सट प्रथमा जस् । क्वचित् प्रथमा सि ।

**[ भारिआ ]** भार्या । अनेन र्यस्य रिअ० **भारिआ** ।

**[ सिनातं ]** स्नातम् । अनेन स्नस्य सिन० **सिनातं** ।

**[ कसटं ]** कष्टम् । अनेन ष्टस्य सट० **कसटं** ।

**[ सुज्जो ]** सूर्य । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) सू० → सु० । 'द्य-य्य-र्यां जः' (२।२४) र्य० → ज० । 'अनादौ०' (२।८९) जस्य द्वित्वम् । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० । 'डित्यन्त्य०' (२।१।११४) अलुक् **सुज्जो** ।

**[ सुनुसा ]** स्नुषा । प्रथमा सि । 'गोणादयः' (२।१७४) नात् प्राग् उ० । 'श-षोः सः' (४।३०९) षा० → सा० । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **सुनुसा** ।

**[ तिट्ठो ]** दृष्ट । प्रथमा सि । 'इत्कृपादौ' (१।१२८) दृ० → दि० । 'ष्टस्याऽनुष्ट्रेष्टा०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) द्वित्वं-ठ्ठ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'त-दोस्तः' (४।३०७) दस्य तः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तिट्ठो** ॥३१४॥

## क्यस्येय्यः ॥ ८।४।३१५ ॥

पैशाच्यां क्यप्रत्ययस्य इय्य इत्यादेशो भवति ॥ गिय्यते । दिय्यते । रमिय्यते । पठिय्यते ॥

**[ क्यस्येय्यः ]** क्य षष्ठी ङस् । इय्य प्रथमा सि ।

[1] **[ किय्यते ]** 'कैं शब्दे' (३६) कै । 'स्वराणां स्वराः' (४।२३८) कै० → का० । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन क्यस्य इय्य इति । 'लुक्' (१।१०) आलुक्। 'आत्तेश्च' (४।३१९) इच्० → ते० **किय्यते** ।

**[ गिय्यते ]** 'गैं शब्दे' (३७) गै । 'स्वराणां०' (४।२३८) गै० → गा० । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन क्यस्य इय्य इति । 'लुक्' (१।१०) आलुक्। 'आत्तेश्च' (४।३१९) इच्० → ते० **गिय्यते** ।

[2] **[ रिय्यते ]** 'रैं शब्दे' (३८) रै । 'स्वराणां०' (४।२३८) रै० → रा० । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन क्यस्य इय्य इति । 'लुक्' (१।१०) आलुक् । 'आत्तेश्च' (४।३१९) इच्० → ते० **रिय्यते** ।

**[ दिय्यते ]** दा । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन क्यस्य इय्य इति । 'स्वराणां स्वराः' (४।२३८) दा० → दि० । 'लुक्' (१।१०) इलुक् । 'आत्तेश्च' (४।३१९) इच्० → ते० **दिय्यते** ।

**[ रमिय्यते ]** 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'त्यादी०' (३।१३९) ते० → इच्० । अनेन क्यस्य इय्य इति । 'आत्तेश्च' (४।३१९) इच्० → ते० **रमिय्यते** ।

**[ पठिय्यते ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । वर्त्त० ते० । 'क्यः शिति' (३।४।७०) क्यप्र० → य । शेषं 'रमिय्यते' वत् । **पठिय्यते** ॥३१५॥

## कृगो डीरः ॥ ८।४।३१६ ॥

पैशाच्यां कृगः परस्य क्यस्य स्थाने डीर इत्यादेशो भवति ॥

पुधुमतंसने सव्वस्स य्येव संमानं कीरते ॥

**[ कृगो डीरः ]** कृग् पञ्चमी ङसि । डीर प्रथमा सि ।

**[ पुधुमतंसने सव्वस्स य्येव संमानं कीरते ]** प्रथमदर्शने । 'प्रथमे प-थोर्वा' (१।५५) प्र० → प्रु० - थ० → थु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् - प्रु० → पु० । 'थो धः' (४।२६७) थस्य धः । 'वक्रादावन्तः' (१।२६) अनुस्वारः द० → दं० । 'त-दोस्तः' (४।३०७) । दं० → तं० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पुधुमतंसने** । सर्वस्यैव सम्मानं । **सव्वस्स य्येव संमानं** । 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । अनेन क्यस्य डीर० → ईर० इति । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'लोकात्' (१।१।३) कीरते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'आत्तेश्च' (४।३१९) इच्० → ते० **कीरते** । प्रथमदर्शने सर्वस्यैव सम्मानं करोतीत्यर्थः ॥३१६॥

## यादृशादेर्दुस्तिः ॥ ८।४।३१७ ॥

पैशाच्यां यादृश इत्येवमादीनां दृ इत्यस्य स्थाने तिरादेशो भवति ॥

यातिसो । तातिसो । केतिसो । एतिसो । भवातिसो । अञ्ञातिसो । तुम्हातिसो । अम्हातिसो ॥

**[ यादृशादेर्दुस्तिः ]** यादृशादि षष्ठी ङस् । दृ षष्ठी ङस् । ति प्रथमा सि ।

---

१. A. किय्यते उदाहरणम् । २. A. रिय्यते उदाहरणम् ।

**[ यातिसो ]** यादृश । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **यातिसो** ।

**[ तातिसो ]** तादृश । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तातिसो** ।

**[ केतिसो ]** कीदृश । 'एत्पीयूषा-ऽऽपीड-बिभीतक-कीदृशेदृशे' (१।१०५) की० → के० । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **केतिसो** ।

**[ एतिसो ]** ईदृश । 'एत्पीयूषा-ऽऽपीड०' (१।१०५) ई० → ए० । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **एतिसो** ।

**[ भवातिसो ]** भवादृश । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **भवातिसो** ।

**[ अञ्ञातिसो ]** अन्यादृश । 'न्य-ण्योर्ञ्ञः' (४।३०५) न्या० → ञ्ञा० । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अञ्ञातिसो** ।

**[ तुम्हातिसो ]** युष्मादृश । 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) ष्मा० → म्हा० । 'युष्मद्यर्थपरे तः' (१।२४६) यु० → तु० । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तुम्हातिसो** ।

**[ अम्हातिसो ]** अस्मादृश । 'पक्ष्म-श्म-ष्म-स्म०' (२।७४) स्मा० → म्हा० । अनेन दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० । प्रथमा सि । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **अम्हातिसो** ॥३१७॥

## इचेचः ॥ ८।४।३१८ ॥

पैशाच्यामिचेचोः स्थाने तिरादेशो भवति ॥ वसुआति । भोति । नेति । तेति ॥

**[ इचेचः ]** इचेच् षष्ठी ङस् ।

**[ वसुआति ]** 'वांक् गति-गन्धनयोः' (१०६२) वा, उद्पूर्व० । 'उद्वाकेरोरुम्मा-वसुआ' (४।११) उद्वा० → वसुआ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ति० **वसुआति** ।

**[ भोति ]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) भू० → भो० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ति० **भोति** ।

**[ नेति ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) णी० → नी० । वर्त्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) नी० → ने० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ति० **नेति** ।

**[ तेति ]** 'डुदांग्क् दाने' (११३८) दा । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ति० । 'स्वराणां स्वराः' (४।२३८) दा० → दे० । 'त-दोस्तः' (४।३०७) दे० → ते० **तेति** । ददातीत्यर्थः ॥३१८॥

## आत्तेश्च ॥ ८।४।३१९ ॥

पैशाच्यामकारात्परयोः इचेचोः स्थाने तेश्चकारात् तिश्चादेशो भवति ॥

लपते लपति । अच्छते अच्छति । गच्छते गच्छति । रमते रमति ॥ आदिति किम् ? होति । नेति ॥

**[ आत्तेश्च ]** अ पञ्चमी ङसि । ते प्रथमा सि । च प्रथमा सि ।

**[ लपते लपति ]** 'लप व्यक्ते वचने' (३३६) लप् (२) । वर्त० तिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) लपति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ते० - चकारात् ति० **लपते लपति** ।

**[ अच्छते अच्छति ]** 'आसिक् उपवेशने' (१११९) आस् । वर्त० ते । 'गमिष्यमासां छः' (४।२१५) स० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययोरुपरि पूर्वः' (२।९०) पूर्वछस्य चः । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) आच्छते । 'ह्रस्वः संयोगे' (१।८४) आ० → अ० । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । अनेन इच्० → ते० - चकारात् ति० **अच्छते अच्छति** ।

**[ गच्छते गच्छति ]** 'गम्लृं गतौ' (३९६) गम् । वर्त० तिव् । 'गमिष्यमासां छः' (४।२१५) म० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गच्छति । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । अनेन इच्० → ते० - चकारात् ति० **गच्छते गच्छति** ।

**[ रमते रमति ]** 'रमिं क्रीडायाम्' (९८९) रम् (२) । वर्त० ते । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) रमते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० - एच्० । अनेन इच्० - एच्० → ते-चकारात् ति- **रमते रमति** ।

**[ होति ]** भू । वर्त० तिव् । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होति** ।

**[ नेति ]** नी । वर्त० तिव् । 'युवर्णस्य गुणः' (४।२३७) नी० → ने० **नेति** ॥३१९॥

### भविष्यत्येय्य एव ॥ ८।४।३२० ॥

पैशाच्यामिचेचोः स्थाने भविष्यति एय्य एव भवति, न तु स्सिः ॥

तं तद्धून चिन्तितं रञ्ञा का एसा हुवेय्य ॥

**[ भविष्यत्येय्य एव ]** भविष्यत् सप्तमी ङि । एय्य प्रथमा सि । एव प्रथमा सि ।

**[ तं तद्धून चिन्तितं रञ्ञा का एसा हुवेय्य ]** ताम् । 'ह्रस्वोऽमि' (३।३६) ता० → त० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **तं** ।

दृष्ट्वा । 'द्धून-त्थूनौ ष्ट्वः' (४।३१३) ष्ट्वा० → द्धून० । 'ऋतोऽत्' (१।१२६) दृ० → द० । 'त-दोस्तः' (४।३०७) द० → त० **तद्धून** ।

**चिन्तितं** । राज्ञा । 'ज्ञो ञ्ञः पैशाच्याम्' (४।३०३) ज्ञा० → ञ्ञा० । 'ह्रस्वः संयोगे' (१।८४) रा० → र० **रञ्ञा** ।

किम् । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । 'आत्' (२।४।१८) आप्प्र० → आ० **का** ।

एतद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अन्त्यव्य०' (१।११) स्लुक् **एसा** ।

'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० - एच्० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हुव० । अनेन इच्० - एच्० → एय्य० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **हुवेय्य** ।

तां दृष्ट्वा राज्ञा चिन्तितं का एसा भविष्यतीत्यर्थः ॥३२०॥

## अतो ङसेर्डातो-डातू ॥ ८।४।३२१ ॥

पैशाच्यामकारात्परस्य ङसेर्डितौ आतो-आतु इत्यादेशौ भवतः ॥

ताव च तीए दूरातो य्येव तिट्ठो दूरातु । तुमातो तुमातु । ममातो ममातु ॥

**[ अतो ङसेर्डातो-डातू ]** अत् पञ्चमी ङसि । ङसि षष्ठी ङस् । डातो-डातु प्रथमा औ ।

**[ ताव च तीए दूरातो य्येव तिट्ठो दूरातु ]** दूर (२) । पञ्चमी ङसि । अनेन ङसिस्थाने डातो० → आतो० - डातु० → आतु० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **दूरातो दूरातु** । तावच्च तया दूरत एव दृष्ट इत्यर्थः ।

**[ तुमातो तुमातु ]** युष्मद् (२) । पञ्चमी ङसि । 'तइ-तुव-तुम-तुह-तुब्भा ङसौ' (३।९६) युष्मद्० → तुम० । अनेन ङसिस्थाने डातो० → आतो०- डातु० → आतु० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तुमातो तुमातु** ।

**[ ममातो ममातु ]** अस्मद् (२) । पञ्चमी ङसि । 'मइ-मम-मह-मज्झा ङसौ' (३।१११) अस्मद्० → मम० । अनेन ङसिस्थाने डातो० → आतो० - डातु० → आतु० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **ममातो ममातु** ॥३२१॥

## तदिदमोष्टा नेन स्त्रियां तु नाए ॥ ८।४।३२२ ॥

पैशाच्यां तदिदमोः स्थाने टाप्रत्ययेन सह नेन इत्यादेशो भवति, स्त्रीलिङ्गे तु नाए इत्यादेशो भवति ॥

तत्थ च नेन कतसिनानेन ॥ स्त्रियाम्-पूजितो च नाए पातग्ग-कुसुम-प्पतानेन ॥ टेति किम् ? एवं चिन्तयन्तो गतो सो ताए समीपं ॥

**[ तदिदमोष्टा नेन स्त्रियां तु नाए ]** तदिदम् षष्ठी ओस् । टा-नेन प्रथमा सि । स्त्री सप्तमी ङि । तु प्रथमा सि । नाए प्रथमा सि ।

**[ तत्थ च नेन कतसिनानेन ]** तत्र । 'त्रपो हि-ह-त्थाः' (२।१६१) त्रस्य त्थ० **तत्थ** । तद्-इदम् । तृतीया टा । अनेन **नेन** । कृतस्नान । तृतीया टा । 'र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित्' (४।३१४) स्ना० → सिना० । **'टा-आमोर्णः'** (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) न० → ने० । 'णो नः' (४।३०६) ण० → न० । 'ऋतोऽत्' (१।१२६) कृ० → क० **कतसिनानेन** ।

**[ पूजितो च नाए पातग्ग-कुसुम-प्पतानेन ]** पादाग्रकुसुमप्रदानेन । सुगमम् । **पातग्ग-कुसुम-प्पतानेन** ।

**[ एवं चिन्तयन्तो गतो सो ताए समीपं ]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ० । 'टा-ङस्-ङे०' (३।२९) ङस्० → ए० **ताए** ॥३२२॥

## शेषं शौरसेनीवत् ॥ ८।४।३२३ ॥

पैशाच्यां यदुक्तं ततोऽन्यच्छेषं पैशाच्यां शौरसेनीवद् भवति ॥

अध ससरीरो भगवं मकरधओ एत्थ परिब्भमन्तो हुवेय्य । एवंविधाए भगवतीए कधं ताप(व)स-वेस-गहनं कतं ? । एतिसं अतिट्ठ-पुरवं महाधनं तद्धून । भगवं यदि मं वरं पयच्छसि । रायं च दाव लोक । ताव च तीए दूरातो य्येव तिट्ठो सो आगच्छमानो राजा ॥

**[ शेषं शौरसेनीवत् ]** शेष प्रथमा सि । शौरसेनीवत् प्रथमा सि ।

**[ अध ससरीरो भगवं मकरधओ एत्थ परिब्भमन्तो हुवेय्य ]** अथ । 'थो धः' (४।२६७) थ० → ध० **अध** ।

भगवान् । 'वाऽव्ययोत्खातादावदातः' (१।६७) वा० → व० । 'भवद्-भगवतोः' (४।२६५) न० → म० **भगवं** ।

अत्र । 'त्रपो हि-ह-त्थाः' (२।१६१) त्र० → त्थ० । 'एच्छय्यादौ' (१।५७) अ० → ए० **एत्थ** ।

'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हुव० । 'त्यादीनामाद्य०' (३।१३९) स्यति० → इच्० । 'भविष्यत्येय्य एव' (४।३२०) इच्० → एय्य० । 'लोकात्' (१।१।३) **हुवेय्य** ।

**[ एवंविधाए भगवतीए कधं ताप( व )स-वेस-गहनं कतं ? ]** एवंविधा । तृतीया टा । 'टा-ङस्-ङेरदा०' (३।२९) टा० → ए० **एवंविधाए** ।

भगवती । तृतीया टा । 'टा-ङस्-ङेरदादिदेद्वा०' (३।२९) टा० → ए० **भगवतीए** ।

तापसवेषग्रहणं कृतम् । सुगमम् । **तावसवेसगहनं कतं** ।

**[ एतिसं अतिट्ठ-पुरवं महाधनं तद्धून ]** ईदृशम् । 'एत्पीयूषा-ऽऽपीड०' (१।१०५) ई० → ए० । 'यादृशादेर्दुस्तिः' (४।३१७) दृ० → ति० । 'श-षोः सः' (४।३०९) श० → स० **एतिसं** । अदृष्टपूर्वम् । 'पूर्वस्य पुरवः' (४।२७०) पूर्व० → पुरव० । 'इत्कृपादौ' (१।१२८) दृ० → दि० । 'त-दोस्तः' (४।३०७) दि० → ति० । 'ष्टस्याऽनु०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) द्वित्वं-ठ्ठ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः **अतिट्ठपुरवं** । महाधन । द्वितीया अम् । **महाधनं** । दृष्ट्वा । 'द्धून-त्थूनौ ष्ट्वः' (४।३१३) ष्ट्वा० → द्धून० । 'ऋतोऽत्' (१।१२६) दृ० → द० । 'त-दोस्तः' (४।३०७) द० → त० **तद्धून** ।

**[ भगवं यदि मं वरं पयच्छसि ]** भगवान् । 'भवद्-भगवतोः' (४।२६५) न० → म० । 'मोऽनु०' (१।२३) अनुस्वारः । 'वाऽव्ययो०' (१।६७) वा० → व० **भगवं** । यदि इमं वरं । 'लुक्' (१।१०) इलोपः । अथवा 'त्यदाद्यव्ययात् तत्स्वरस्य लुक्' (१।४०) इलोपः **यदि मं वरं** । 'यमूं उपरमे' (३८६) यम्, प्रपूर्व० । वर्त्त० सिव् । 'गमिष्यमासां छः' (४।२१५) म० → छ० । 'अनादौ०' (२।८९) द्वित्वं-छ्छ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वछस्य चः । 'द्वितीयस्य सि-से' (३।१४०) सिव्० → से०(सि०) । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पयच्छसे( सि )** ।

**[ रायं ! च दाव लोक ]** राजन् । आमन्त्र्ये सि । 'मो वा' (४।२६४) न० → म० । 'मोऽनु०' (१।२३) अनुस्वारः । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **रायं !** । तावत् । प्रथमा सि । 'अन्त्यव्य०' (१।१०) त्लुक् । 'वादेस्तावति' (४।२६२) ता० → दा० **दाव** । 'लोकृङ् दर्शने' (६१२) लोक् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) लोक । पञ्चमी स्व । 'दु-सु-मु०' (३।१७३) स्व० → सु० । 'अत इज्जस्विज्ज०' (३।१७५) सुलुक् **लोक** । हे राजन् ! तावल्लोक इत्यर्थः ।

**[ ताव च तीए तूरातो य्येव तिट्ठो सो आगच्छमानो राजा ]** तावत् । 'अन्त्यव्य०' (१।११) त्लुक् **ताव** । तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'किं-यत्तदोस्यमामि' (३।३३) । ङीप्र० । 'लुक्' (१।१०) अलोपः । 'टा-ङस्-ङेर०' (३।२९) टा० → ए० **तीए** । दूर । पञ्चमी ङसि । 'अतो ङसेर्डातो - डातू' (४।३२१) ङसि० → डातो० → आतो० **दूरातो** । **य्येव** एवार्थे । दृष्ट । प्रथमा सि । 'इत्कृपादौ' (१।१२८) दृ० → दि० । 'त-दोस्तः' (४।३०७) दि० → ति० । 'ष्टस्याऽनु०' (२।३४) ष्ट० → ठ० । 'अनादौ०' (२।८९) द्वित्वं-ठ्ठ० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तिट्ठो** ॥३२३॥

## न क-ग-च-जादि-षट्-शम्यन्तसूत्रोक्तम् ॥ ८।४।३२४ ॥

पैशाच्यां 'क-ग-च-ज-त-द-प-य-वां प्रायो लुक्' (१।१७७) इत्यारभ्य 'षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः' (१।२६५) इति यावद्यानि सूत्राणि तैर्यदुक्तं कार्यं तन्न भवति ॥

मकरकेतू । सगरपुत्तवचनं । विजयसेनेन लपितं । मतनं । पापं । आयुधं । तेवरो ॥ **एवमन्यसूत्राणामप्युदाहरणानि द्रष्टव्यानि ॥**

न क-ग-च-जेति ।

**[ तेवरो ]** देवर । प्रथमा सि । 'त-दोस्तः' (४।३०७) दे० → ते० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **तेवरो** ।

शेषं सुगमम् ॥३२४॥

## चूलिकापैशाचिके तृतीय-तुर्ययोराद्य-द्वितीयौ ॥ ८।४।३२५ ॥

चूलिकापैशाचिके वर्गाणां तृतीय-तुर्ययोः स्थाने यथासंख्यमाद्य-द्वितीयौ भवतः ॥

नगरम् → नकरं । मार्गणः → मक्कनो । गिरि-तटम् → किरि-तटं । मेघः → मेखो । व्याघ्रः → वक्खो । घर्मः → खम्मो । राजा → राचा । जर्जरम् → चच्चरं । जीमूतः → चीमूतो । निर्झरः → निच्छरो । झर्झरः → छच्छरो । तडागम् → तटाकं । मण्डलम् → मण्टलं । डमरुकः → टमरुको । गाढम् → काठं । षण्ढः → सण्ठो । ढक्का → ठक्का । मदनः → मतनो । कन्दर्पः → कन्तप्पो । दामोदरः → तामोतरो । मधुरम् → मथुरं । बान्धवः → पन्थवो । धूली → थूली । बालकः → पालको । रभसः → रफसो । रम्भा → रम्फा । भगवती → फक्कवती । नियोजितम् → नियोचित्तं ॥

क्वचिल्लाक्षणिकस्यापि - पडिमा इत्यस्य स्थाने पटिमा । दाढा इत्यस्य स्थाने ताठा ॥

**[ चूलिकापैशाचिके तृतीय-तुर्ययोराद्य-द्वितीयौ ]** चूलिकापैशाचिक सप्तमी ङि । तृतीय-चतुर्थ(तुर्य) षष्ठी ओस् । आद्य-द्वितीय प्रथमा औ ।

**[ मक्कनो ]** मार्गण । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । अनेन र्ग० → र्क० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-क० → क्क० । 'णो नः' (४।३०६) ण० → न० । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **मक्कनो** ।

**[ वक्खो ]** व्याघ्र । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । 'ह्रस्वः संयोगे' (१।८४) वा० → व० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन घस्य ख० । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । 'अतः सेर्डोः' (३।२) सि० → डो० → ओ० **वक्खो** ।

**[ ताठा ]** दंष्ट्रा । 'दंष्ट्राया दाढा' (२।१३९) दंष्ट्रा० → दाढा० । अनेन दस्य त० - ढस्य ठ० **ताठा** ॥३२५॥

## रस्य लो वा ॥ ८।४।३२६ ॥

चूलिकापैशाचिके रस्य स्थाने लो वा भवति ॥

[1]पनमथ पनय-पकुप्पित-गोली-चलनग्ग-लग्ग-पतिबिंबं ।
तससु नख-तप्पनेसु एकातस-तनु-थलं लुदुदं ॥

नच्चन्तस्य य लीला-पातुक्खेवेन कम्पिता वसुथा ।
उच्छलन्ति समुद्दा सइला निपतन्ति तं हलं नमथ ॥

**[ रस्य लो वा ]** र षष्ठी ङस् । ल प्रथमा सि । वा प्रथमा सि ।

**[ पनमथ पनय-पकुप्पित-गोली................ ]**

रुद्रं प्रणमत । किंविशिष्टं रुद्रम् ? प्रणय-प्रकुपित-गौरी-चरणाग्र-लग्न-प्रतिबिम्बम् । केषु ? दशसु नखदर्पणेषु । पुनः किंविशिष्टं रुद्रम् ? एकादश-तनुधरं इत्यर्थः ।

अथ व्युत्पत्तिः- [पनमथ] प्रपूर्व० नम्० । पञ्चमी त । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रनमत। 'बहुषु न्तु-ह-मो' (३।१७६) त० → ह० । इह-हचोर्हस्य' (४।२६८) ह० → ध० । 'चूलिकापैशाचिके०' (४।३२५) धस्य थः । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पनमथ** ।

**[ गोली-चलनग्ग ]** गौरी-चरणाग्र । अनेन रस्य लः । 'ह्रस्वः संयोगे' (१।८४) णा० → ण० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'णो नः' (४।३०६) ण० → न० **गोली-चलनग्ग** ।

**[ थलं ]** धरम् । अनेन रस्य लः । 'चूलिकापैशाचिके तृतीय०' (४।३२५) धस्य थः **थलं** ।

**[ लुदुदं ]** रुद्रम् । अनेन रस्य लः **लुदुदं** ।

**[ नच्चन्तस्स य लीला-पातुक्खेवेन................. ]**

तं हरं नमत । किंविशिष्टं तं हरम् ? यस्य नृत्यतः- नृत्यं कुर्वतः लीलापादोत्क्षेपेण वसुधा कम्पिता, समुद्रा उच्छलन्ति, शैला निपतन्तीत्यर्थः ।

**[ नच्चन्तस्स ]** 'नृतैच् नर्तने' (११५२) नृत् । शतृप्र० । 'शत्रानशः' (३।१८१) शतृ० → न्त० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) नृत-न्त । 'व्रज-नृत-मदां च्चः' (४।२२५) त० → च्च० । 'ऋतोऽत्' (१।१२६) नृ० → न० । षष्ठी ङस् । 'ङसः स्सः' (३।१०) ङस्० → स्स० **नच्चन्तस्स** ।

**[ य ]** च । 'क-ग-च-ज०' (१।१७७) च्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **य** ।

**[ लीला-पातुक्खेवेन ]** लीलापादोत्क्षेपेण । 'न क-ग-च-जादि-षट्-शम्यन्तसूत्रोक्तम्' (४।३२४) इत्यनेन निषेधे सत्यपि बाहुलकात् 'पो वः' (१।२३१) पे० → वे० । शेषं स्पष्टम् । **लीला-पातुक्खेवेन** ।

**[ उच्छलन्ति ]** उच्छल् । वर्त्त० अन्ति । **उच्छलन्ति** ।

**[ समुद्दा ]** समुद्र । प्रथमा जस् । **समुद्दा** ।

**[ सइला ]** शैल । प्रथमा जस् । 'वैरादौ वा' (१।१५२) शै० → शइ० । 'श-षोः सः' (४।३०९) श० → स० **सइला** ।

---

१. पनमत पनअपकुप्पितगोलीचलनग्गलग्गपडिबिम्बम् । दससु नहदप्पनेसु एआदसतनुधलं लुद्दम् ॥
[स० क० - द्वितीयः परिच्छेदः - ४]
प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् । दशसु नखदर्पणेष्वेकादशतनुधरं रुद्रम् ॥

**[ नमथ ]** नम् । पञ्चमी त । 'मध्यमस्येत्था-हचौ' (३।१४३) त० → हच्० । 'इह-हचोर्हस्य' (४।२६८) ह० → ध० । 'चूलिकापैशाचिके तृतीय०' (४।३२५) ध० → थ० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) **नमथ** ।

शेषं स्पष्टम् ॥३२६॥

## नादि-युज्योरन्येषाम् ॥ ८।४।३२७ ॥

चूलिकापैशाचिकेऽपि अन्येषामाचार्याणां मतेन तृतीय-तुर्ययोरादौ वर्तमानयोर्युजिधातौ च आद्य-द्वितीयौ न भवतः ॥

गतिः → गती । घर्मः → घम्मो । जीमूतः → जीमूतो । झर्झरः → झच्छरो । डमरुकः → डमरुको । ढक्का → ढक्का । दामोदरः → दामोतरो । बालकः → बालको । भगवती → भकवती । नियोजितम् → नियोजितं ॥

**[ नादि-युज्योरन्येषाम् ]** न प्रथमा सि । आदि-युजि षष्ठी ओस् । अन्य षष्ठी आम् ।

सुगमम् ॥३२७॥

## शेषं प्रागवत् ॥ ८।४।३२८ ॥

चूलिकापैशाचिके तृतीय-तुर्ययोरित्यादि यदुक्तं ततोऽन्यच्छेषं प्राक्तनपैशाचिकवद् भवति ॥

नकरं । मक्कनो ॥ अनयोर्नो णत्वं न भवति, णस्य तु[1] नत्वं स्यात् ॥ एवमन्यदपि ॥

**[ शेषं प्राग्वत् ]** शेष प्रथमा सि । प्राग्वत् प्रथमा सि ।

**[ नकरं ]** नगरम् → **नकरं** ।

**[ मक्कनो ]** मार्गणः → **मक्कनो** ॥३२८॥

● ● ●

---

१. E. J. M. च ।

## ॥ अतोऽपभ्रंशभाषा प्रारभ्यते ॥

## स्वराणां स्वराः प्रायोऽपभ्रंशे ॥ ८।४।३२९ ॥

अपभ्रंशे स्वराणां स्थाने प्रायः स्वरा भवन्ति ॥

कच्चु काच्च[1] ॥ वेण वीण ॥ बाह बाहा बाहु ॥ पट्ठि पिट्ठि पुट्ठि ॥ तणु तिणु तृणु ॥ सुकिदु सुकिओ[2] सुकृदु ॥ [3]किन्नउ किलिन्नउ ॥ लिह लीह लेह ॥ गउरि[4] गोरि ॥

प्रायोग्रहणाद्यस्याऽपभ्रंशे विशेषो वक्ष्यते तस्याऽपि क्वचित् प्राकृतवत् शौरसेनीवच्च कार्यं भवति ॥

**[स्वराणां स्वराः प्रायोऽपभ्रंशे]** स्वर षष्ठी आम् । स्वर प्रथमा जस् । प्रायस् प्रथमा सि । अपभ्रंश सप्तमी ङि ।

**[कच्चु काच्च]** काँच (२) । अनेन स्वरस्थाने स्वर एव-का० → क० । 'सेवादौ वा' (२।९९) द्वित्वं - च० → च्च० । प्रथमा सि । प्रथमे 'स्यमोरस्योत्' (४।३३१) च्च० → च्चु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **कच्चु काच्च** ।

**[वेण वीण]** वीणा (२) । अनेन वी० → वे० । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) णा० → ण० । प्रथमा सि। 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **वेण वीण** ।

**[बाह बाहा बाहु]** बाहु (३) । अनेन हु० → ह-हा-हु० । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **बाह-बाहा-बाहु** ।

**[पट्ठि पिट्ठि पुट्ठि]** पृष्ठि[5] (३) । अनेन प्रथमे पृ० → प० - द्वितीये पृ० → पि० - तृतीये पृ० → पु० । 'ष्टस्याऽनु०' (२।३४) ष्ठि० → ठि० । 'अनादौ०' (२।८९) द्वित्वं- ठ्ठ० । 'द्वितीय-तुर्य०' (२।९०) पूर्वठस्य टः । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **पट्ठि पिट्ठि पुट्ठि** ।

**[तणु तिणु तृणु]** तृण (३) । अनेन प्रथमे तृ० → त० - द्वितीये तृ० → ति० - तृतीये तृ० → तृ० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ण० → णु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **तणु तिणु तृणु** ।

**[सुकिदु सुकिओ सुकृदु]** सुकृत (३) । प्रथमा सि । 'अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः' (४।३९६) तस्य दः । अनेन प्रथमे-द्वितीये कृ० → कि० । तृतीये कृकारस्य कृकार एव । प्रथमे दस्य दु० - द्वितीये दस्य दो० - तृतीये दस्य दु० । द्वितीये 'क-ग-च-ज०' (१।१७७) दलुक् । 'स्यम्-जस्०' (४।३४४) सिलुक् **सुकिदु सुकिओ सुकृदु** ।

**[किन्नउ किलिन्नउ]** क्लृन्नक (२) । प्रथमा सि । प्रथमेऽनेन क्लृ० → कि० । 'लृत-इलिः क्लृप्त-क्लृन्ने' (१।१४५) क्लृ० → किलि० । 'अ-डड-डुल्लाः स्वार्थिक०' (४।४२९) अप्र० - कलुक् च । 'स्यमोरस्योत्' (४।३३१) अ० → उ० **किन्नउ किलिन्नउ** ।

**[लिह लीह लेह]** लेखा (३) । अनेन प्रथमे ले० → लि० - द्वितीये ले० → ली० । प्रथमा सि । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) खा० → ख० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । 'स्यम्-जस्०' (४।३४४) सिलुक् **लिह लीह** । तृतीये अनेन एकारस्य एकार एव **लेह** ।

---

१. N. कच्च । २. H. I. J. M. N. सुकिउ । ३. H. I. J. M. किन्नओ किलिन्नओ । ४. N. गउरी गोरी । ५. M. N. कच्चित् । ६. G. पृष्ट । 'जातेरयान्त०' (२।४।५४) ङी । 'लुक्' (१।१०) अलुक् । अनेन ऋतः अ-इ-उ । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ह्रस्वः । M. N. पृष्ठ ।

**[ गउरि गोरि ]** गौरी (२) । 'अउः पौरादौ च' (१।१६२) प्रथमे गौ० → गउ० - द्वितीये गौ० → गो० । प्रथमा सि । 'स्यादौ दीर्घ- ह्रस्वौ' (४।३३०) री० → रि० । 'स्यम्-जस्०' (४।३४४) सिलुक् **गउरि गोरि** ॥३२९॥

**स्यादौ दीर्घ-ह्रस्वौ ॥ ८।४।३३० ॥**

अपभ्रंशे नाम्नोऽन्त्यस्वरस्य दीर्घ-ह्रस्वौ स्यादौ प्रायो भवतः ॥

॥ सौ ॥ [१]**ढोल्ला** सामला धण चंपा - वण्णी ।
णाइ **सुवण्ण-रेह** कस-वट्टइ दिण्णी ॥१॥

॥ आमन्त्र्ये ॥ **ढोल्ला**[२] मइं तुहुं वारिआ मा करु दीहा माणु ।
निद्दए गमिही रत्तडी दडवड होइ विहाणु ॥२॥

॥ स्त्रियाम् ॥ **बिट्टीए**[३] ! मइं **भणिअ** तुहुं मा करु वंकी दिट्ठि ।
**पुत्ति** ! सकण्णी **भल्लि** जिवँ मारइ हिअइ पइट्ठि ॥३॥

॥ जसि ॥ एइ ति **घोडा** एह थलि एइ ति **निसिआ खग्ग** ।
एत्थु मुणीसिम जाणिअइ जो न वि वालइ वग्ग ॥४॥

एवं विभक्त्यन्तरेष्वप्युदाहार्यम् ॥

**[ स्यादौ दीर्घ-ह्रस्वौ ]** स्यादि सप्तमी ङि । दीर्घ-ह्रस्व प्रथमा औ ।

**[ ढोल्ला सामला धण....... ]**

**[ ढोल्ला ]** नायक । प्रथमा सि । 'शीघ्रादीनां वहिल्लादयः' (४।४२२) प्रियाया नायकस्य ढोल्ल आदेशः । अनेन ल्ल० → ल्ला० आदेशः । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **ढोल्ला** ।

**[ धण ]** प्रिया । 'शीघ्रादीनां वहिल्लादयः' (४।४२२) प्रियाया धण आदेशः **धण** ।

**[ चंपा-वण्णी ]** चंपक-वर्णी । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'स्वराणां स्वराः प्रायो०' (४।३२९) इति बहुत्व-व्याप्त्यर्थत्वात् अकारस्य अकारेण सह आ । 'सर्वत्र०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-णी० → ण्णी० **चंपा-वण्णी** ।

**[ णाइ ]** इव । 'इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः' (४।४४४) इवार्थे नाइ० । 'वाऽऽदौ' (१।२२९) **णाइ०** ।

**[ सुवण्ण-रेह ]** सुवर्ण-रेखा । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ण० → ण्ण० । 'ख-घ-थ-ध-भाम्' (१।१८७) खा० → हा० । अनेन हा० → ह० **सुवण्ण-रेह** ।

---

१. मरगय-वन्नह पियह उरि पिय-चंपय-पह-देह । कसवट्टइ दिन्निय सहइ नाइ सुवन्नह रेह ॥ [कु० प्र० ]

२. अग्घाहि महुं दे गेण्ह चंदणं असुणि सुणसु मह वयणं । माणेण मा नडिज्जसु माणंसिणि ! गलइ छणराई ॥
[व० ल०-माणवज्जा-३५१/२]

आजिघ्र मधु हे गृहाण चन्दनमनाश्रवे शृणु मम वचनम् । मानेन मा नट्यस्व मनस्विनि ! गलति क्षणरात्रिः ॥

३. कस्स न भिंदइ हिययं अणंग-सर-धोरणि व्व निवडंती । बालाएँ वलिय-लोयण-फुरंत-मयणालसा दिट्ठी ॥
[व० ल०-नयणवज्जा-२९५/५]

कस्य न भिनत्ति हृदयमनङ्गशरधोरणीव निपतन्ती । बालाया वलितलोचनस्फुरन्मदनालसा दृष्टिः ॥

**[ कस-वट्टइ ]** कष-पट्टक । 'अ-डड-डुल्लाः०' (४।४२९) अप्र०- क्लुक् च । सप्तमी ङि । 'ङिनेच्च' (४।३३४) ङिना सह अस्य इ० । 'श-षोः सः' (१।२६०) ष० → स० । 'पो वः' (१।२३१) प० → व० **कसवट्टइ** ।

**[ दिण्णी ]** दत्ता । 'जातेरयान्त-नित्यस्त्री०' (२।४।५४) ङीप्र० । 'स्वराणां स्वराः प्रायो०' (४।३२९) द० → दि० । 'पञ्चाशत्-पञ्चदश-दत्ते' (२।४३) त्तस्य णः । 'अनादौ०' (२।८९) द्वित्वं-ण० → ण्ण० **दिण्णी** ।

नायकः श्यामलः । प्रिया चम्पक-वर्णी । नाइ उत्प्रेक्ष्यते । कषपट्टके सुवर्ण-रेखा दत्ता इत्यर्थः ।

**[ ढोल्ला ! मइं तुहुं वारिआ........ ]**

अस्यार्थः - हे नायक ! मया त्वं वारितः, दीर्घं मानं मा कुरु, रात्रिर्निद्रया गमिष्यति, दडवड इति शीघ्रं विभातं भविष्यतीत्यर्थः ॥

अथ व्युत्पत्तिः - **[ ढोल्ला ! ]** ढोल्ला इति सम्बोधने सौ पूर्ववत् । **ढोल्ला !** ।

**[ मइं ]** अस्मद् । तृतीया टा । 'टा-ङ्यमा मइं' (४।३७७) टाप्रत्ययेन सह अस्मद्स्थाने **मइं** ।

**[ तुहुं ]** युष्मद् । प्रथमा सि । 'युष्मदः सौ तुहुं (४।३६८) युष्मद्० → तुहुं । 'अन्त्यव्यञ्जनस्य' (१।११) स्लुक् **तुहुं**।

**[ वारिआ ]** वारित । प्रथमा सि । अनेन दीर्घः - त० → ता० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अन्त्यव्य०' (१।११) स्लुक् **वारिआ** ।

**[ मा ] मा** इति निषेधार्थः ।

**[ करु ]** 'डुकृंग् करणे' (८८८) कृ । पञ्चमी हि । 'हि-स्वयोरिदुदेत्' (४।३८७) हि० → उ० । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'लोकात्' (१।१।३) **करु** ।

**[ दीहा ]** दीर्घ । द्वितीया अम् । 'स्यम्-जस्-शसां लुक्' (४।३४४) अम्लुक् । अनेन दीर्घः - र्घ० → र्घा० । 'सर्वत्र ल-व-रामवन्द्रे' (२।७९) र्लुक् । 'ख-घ-थ-ध-भाम्' (१।१८७) घा० → हा० **दीहा** ।

**[ माणु ]** मान । द्वितीया अम् । 'स्यमोरस्योत्' (४।३३१) न० → नु० । 'स्यम्०' (४।३४४) अम्लुक् । 'नो णः' (१।२२८) नु० → णु० **माणु** ।

**[ निद्दएँ ]** निद्रा । 'वाधो रो लुक्' (४।३९८) र्लोपः । 'अनादौ०' (२।८९) द्वित्वं-दा० → द्दा० । तृतीया टा । 'ट ए' (४।३४९) टा० → ए० । अनेन ह्रस्वः-द्दा० → द्द० **निद्दए** ।

**[ गमिही ]** 'गम्लृं गतौ' (३९६) गम् । भविष्यन्ती स्यति । 'त्यादीनामा०' (३।१३९) स्यति० → इच्० । 'भविष्यति हिरादिः' (३।१६६) हि आगमः । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) गमहिइ । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) म० → मि० । एकपदेऽपि बहुलाधिकारात् 'पदयोः संधिर्वा' (१।५) इति संधिः **गमिही** ।

**[ रत्तडी ]** रात्रि[का] । 'स्वराणां स्वराः०' (४।३२९) रा० → र० । 'वाधो रो लुक्' (४।३९८) र्लुक् । 'अ-डड-डुल्लाः' (४।४२९) डडप्र० → अड०- कलुक् च । 'लुक्' (१।१०) इलोपः । 'लोकात्' (१।१।३) रतड० । 'स्त्रियां तदन्ताड्डीः' (४।४३१) डीप्र० । 'अनादौ०' (२।८९) द्वित्वं-त० → त्त० । प्रथमा सि । 'स्यम्-जस्०' (४।३४४) सिलुक् **रत्तडी** ।

**[ दडवड ]** अवस्कन्द । शीघ्रादित्वात् अवस्कन्दस्य **दडवड** इति ।

**[ विहाणु ]** विभात । शीघ्रादित्वात् विभातस्य विहाण इति । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ण० → णु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **विहाणु** ॥१॥

**[ बिट्टीए ! मइं भणिअ तुहुं....... ]**

अस्यार्थः - हे पुत्रिके ! मया त्वं भणिता, वक्रां दृष्टिं मा कुरु । हे पुत्रिके ! यथा सकर्णा भल्ली हृदये प्रविष्टा मारयति तथा त्वदीया दृष्टिभूता भल्लिः परस्य हृदये प्रविष्टा मारयिष्यतीत्यर्थः ॥

अथ व्युत्पत्तिः - **[ बिट्टीए ! ]** पुत्री । शीघ्रादित्वात् बिट्टी आदेशः । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ० । प्रथमा सि । 'वाप ए' (३।४१) आ० → ए० । 'स्यम्-जस्०' (४।३४४) सिलुक् **बिट्टीए !** ।

**[ मइं ] मइं** पूर्ववत् ।

**[ भणिअ ]** भणिता । अनेन ह्रस्वः । 'क-ग-च-ज०' (१।१७७) त्लुक् । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **भणिअ** ।

**[ तुहुं ] तुहुं** पूर्ववत् ।

**[ मा ] मा** पूर्ववत् ।

**[ करु ] करु** पूर्ववत् ।

**[ वंकी ]** वक्रा । 'अजातेः पुंसः' (३।३२) ङीप्र० । 'वक्रादावन्तः' (१।२६) अनुस्वारः । द्वितीया अम् । 'सर्वत्र ल-व०' (२।७९) ('वाधो रो लुक्' (४।३९८)) र्लुक् । 'लुक्' (१।१०) कस्य अलोपः । 'लोकात्' (१।१।३) वंकी । 'स्यम्-जस्०' (४।३४४) अम्लोपः **वंकी** ।

**[ दिट्ठि ]** दृष्टि । द्वितीया अम् । 'स्वराणां स्वराः प्रायो०' (४।३२९) दृ० → दि० । 'ष्टस्याऽनुष्ट्रेष्टासंदष्टे' (२।३४) ष्टि० → ठि० । 'अनादौ०' (२।८९) द्वित्वं - ठ्ठि० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः । 'स्यम्-जस्०' (४।३४४) अम्लोपः **दिट्ठि** ।

**[ पुत्ति ! ]** पुत्री । आमन्त्र्ये सि । अनेन त्री० → त्रि० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ति० → त्ति० । 'स्यम्-जस्०' (४।३४४) सिलोपः **पुत्ति !** ।

**[ सकण्णी ]** सकर्णा ।

**[ भल्लि ]** भल्लि । 'जातेरयान्त०' (२।४।५४) ङीप्र० । अनेन ह्रस्वः । प्रथमा सि । 'स्यस्-जस्०' (४।३४४) सिलोपः **भल्लि** ।

**[ जिवँ ]** यथा । 'कथं-यथा-तथां थादेरेमेमेहेधा डितः' (४।४०१) था० → डिम० → इम० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) यिम० । 'आदेर्यो जः' (१।२४५) यि० → जि० । 'मोऽनुनासिको वो वा' (४।३९७) मस्य वा वँ० **जिवँ** ।

**[ मारइ ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । म्रियमाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ऋवर्णस्याऽरः' (४।२३४) मृ० → मर० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'णेरदेदावावे' (३।१४९) णिग्स्थाने अत् । 'लोकात्' (१।१।३) मरइ । 'अदेल्लुक्यादे०' (३।१५३) म० → मा० **मारइ** ।

**[ हिअइ ]** हृदय । सप्तमी ङि । 'स्वराणां स्वराः' (४।३२९) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक्-य्लुक् । ङिनेच्च' (४।३३४) ङिना सह अ० → इ० **हिअइ** ।

**[ पइट्ठि ]** प्रविष्ट(ष्टा) । 'अजातेः पुंसः' (३।३३) ङीप्र० । प्रथमा सि । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) प्रविष्टी । अनेन ह्रस्वः । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-

ग-च-ज०' (१।१७७) व्लुक् । 'ष्टस्या०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।९०) ठस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वठस्य टः **पइट्ठि** ॥३॥

**[ एइ ति घोडा एह थलि............ ]**

अस्यार्थः - एते ते घोटकाः, एषा सा स्थली, एते ते निशिताः - तीक्ष्णाः खड्गाः । अत्र मनुष्यत्वं ज्ञायते । यो नापि वल्गां वालयतीत्यर्थः ॥

अथ व्युत्पत्तिः - **[ एइ ]** एतद् । प्रथमा जस् । 'एइर्जस्-शसोः' (४।३६३) एतद्० → एइ आदेशः । 'स्यम्-जस्०' (४।३४४) जस्लुक् **एइ** ।

**[ ति ]** तद् । प्रथमा जस् । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'अतः सवार्देर्डेर्जसः' (३।५८) जस्० → डे० → ए० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) ते० । अनेन ह्रस्वः - ते० → **ति०** ।

**[ घोडा ]** घोटक । प्रथमा जस् । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् । अनेन दीर्घः । ततः 'स्वराणां०' (४।३२९) इति बहुवचनव्याप्त्यर्थत्वाद् अकारेण सह टकाराकारस्य आकारः । 'टो डः' (१।१९५) टा० → डा० **घोडा** ।

**[ एह ]** एतद् । प्रथमा सि । 'एतदः स्त्री-पुं-क्लीबे एह-एहो-एहु' (४।३६२) एतद्० → एह० । 'स्यम्-जस्०' (३।३४४) सिलुक् **एह** ।

**[ थलि ]** स्थली । प्रथमा सि । 'स्यम्-जस्०' (४।३४४) सिलुक् । अनेन ली० → लि० । 'क-ग-ट-ड०' (२।७७) स्लुक् **थलि** ।

**[ एइ ]** पूर्ववत् ।

**[ ति ]** पूर्ववत् ।

**[ निसिआ ]** निशित । प्रथमा जस् । अनेन दीर्घः । स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् । शेषं सुगमम् । **निसिआ** ।

**[ खग्ग ]** खड्ग । प्रथमा जस् । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् । 'क-ग-ट-ड०' (२।७७) ड्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ग० → ग्ग० । अत्र प्रायिकत्वान्न दीर्घः । **खग्ग** ।

**[ एत्थु ]** अत्र । 'एत्थु कुत्रा-ऽत्रे' (४।४०५) **एत्थु** ।

**[ मुणीसिम ]** मनुष्यत्व । 'स्वराणां स्वराः०' (४।३२९) म० → मु० - नु० → नी० । 'नो णः' (१।२२८) नी० → णी० । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) ष० → स० । 'त्वस्य डिमा-त्तणौ वा' (२।१५४) त्वस्य डिमा० → इमा० । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् । 'डित्यन्त्य०' (२।१।११४) अलुक् । अनेन ह्रस्वः - मा० → म० **मुणीसिम** ।

**[ जाणिअइ ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० ते । 'ज्ञो जाण-मुणौ' (४।७) ज्ञा० → जाण० । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्यस्य ईअ० । 'स्वराणां स्वराः प्रायो०' (४।३२९) ह्रस्वः-ई० → इ० **जाणिअइ** ।

**[ जो ]** यद् । प्रथमा सि । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'सौ पुंस्योद्वा' (४।३३२) य० → यो० । 'आदेर्यो जः' (१।२४५) यो० → जो० । 'स्यम्-जस्०' (४।३४४) सिलुक् **जो** ।

**[ न वि ]** नापि । 'पदादपेर्वा' (१।४१) अलुक् । 'पो वः' (१।२३१) पि० → वि० **न वि** ।

**[ वालइ ]** 'वलि संवरणे' (८०७) वल् । णिग्प्र० । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इच्० । 'णेरदेदावावे' (३।१४९) णिग्० → अत्० । 'अदेल्लुक्या०' (३।१५३) व० → वा० **वालइ** ।

**[ वग्ग ]** वल्गा । द्वितीया अम् । 'स्यम्-जस्-शसां लुक्' (४।३४४) अम्लुक् । अनेन ह्रस्वः - ल्गा० → ल्ग० । 'सर्वत्र ल-व०' (२।७९) ल्लुक् । 'अनादौ०' (२।८९) द्वित्वं - ग० → ग्ग० **वग्ग** ॥३३०॥

### स्यमोरस्योत् ॥ ८।४।३३१ ॥

अपभ्रंशे अकारस्य स्यमोः परयोः उकारो भवति ॥

दहमुहु[1] भुवण-भयंकरु तोसिअ-संकरु णिग्गउ रहवरि चडिअउ ।
चउमुहु छंमुहु झाइवि एक्कहिं लाइवि णावइ दइवें घडिअउ ॥१॥

**[ स्यमोरस्योत् ]** स्यम् सप्तमी ओस् । अ षष्ठी ङस् । उत् प्रथमा सि ।

**[ दहमुहु भुवण-भयंकरु तोसिअ-संकरु.......... ]**

अस्यार्थः - दशमुखो रावणो निर्गतः, रथवरे चटितः । किंविशिष्टो रावणः ? तोषितः - पूजितः शङ्करो येन सः । पुनः किंविशिष्टो रावणः ? भुवनभयङ्करः । उत्प्रेक्ष्यते- दैवेन चतुर्मुखं ब्रह्मणां षण्मुखं स्वामिकार्तिकेयं ध्यात्वा एकस्मिन् रावणे लगित्वा घटितः । कोऽर्थः ? एतद् द्वयमपि एकीकृत्य रावणो घटितो निर्मितो दशमुखत्वादित्यर्थः ॥

अथ साधनिका - **[ दहमुहु ]** दशमुख । प्रथमा सि । 'दश-पाषाणे हः' (१।२६२) श० → ह० । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । अनेन ह० → हु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **दहमुहु** ।

**[ भुवण-भयंकरु ]** भुवन-भयङ्कर । 'नो णः' (१।२२८) न० → ण० । प्रथमा सि । अनेन र० → रु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **भुवण-भयंकरु** ।

**[ तोसिअ-संकरु ]** तोषित-शङ्कर । प्रथमा सि । 'श-षोः सः' (१।२६०) षि० → सि० - शं० → सं० । 'क-ग-च-ज०' (१।१७७) त्लुक् । अनेन र० → रु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **तोसिअ-संकरु** ।

**[ णिग्गउ ]** निर्गत । प्रथमा सि । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं- ग० → ग्ग० । अनेन त० → तु० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'वाऽऽदौ' (१।२२९) नि० → णि० **णिग्गउ** ।

**[ रहवरि ]** रथवर । सप्तमी ङि । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'ङिनेच्च' (४।३३४) ङिना सह इत्वं - र० → रि० **रहवरि** ।

**[ चडिअउ ]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । 'आरुहेश्चड-वलग्गौ' (४।२०६) आरुह० → चड० । क्तप्र० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) चडत । 'क्ते' (३।१५६) इ० । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । प्रथमा सि । अनेन अ० → उ० । 'स्यम्-जस्०' (४।३४४) सिलुक् **चडिअउ** ।

**[ चउमुहु ]** चतुर्मुख । द्वितीया अम् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'ख-घ-थ०' (१।१८७) ख० → ह० । अनेन ह० → हु० । 'स्यम्-जस्०' (४।३४४) अम्लुक् **चउमुहु** ।

---

१. जगदाह्लादकश्चण्डप्रतापोऽखण्डमण्डलः । विधिना ननु चन्द्रार्कावेकीकृत्य विनिर्मितः ॥५॥
[क० सा० - शशाङ्कवतीलम्बकः १२ - चतुर्विंशस्तरङ्गः]

**[ छंमुहु ]** षण्मुख । द्वितीया अम् । 'षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः' (१।२६५) षट्० → छ० । 'वक्रादावन्तः' (१।२६) ('ङ-ञ-ण०' (१।२५)) अनुस्वारः । 'ख-घ-थ-ध भाम्' (१।१८७) ख० → ह० । अनेन ह० → हु० । 'स्यम्-जस्०' (४।३४४) अम्लुक् **छंमुहु** ।

**[ झाइवि ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'ध्या-गोर्झा-गौ' (४।६) ध्या० → झा० । क्त्वाप्र० । 'क्त्व इ-इउ-इवि-अवयः' (४।४३९) क्त्वा० → इवि० **झाइवि** ।

**[ एक्कहिं ]** एक । सप्तमी ङि । 'ङेर्हिं' (४।३५२) ङि० → हिं० । 'सेवादौ वा' (२।९९) द्वित्वं - क० → क्क० **एक्कहिं** ।

**[ लाइवि ]** 'लगे सङ्गे' (१०२४) लग् । णिग्प्र० । 'लुगावी क्त-भाव-कर्मसु' (३।१५३) णिग्लुक् । क्त्वाप्र० । 'क्त्व इ-इउ-इवि-अवयः' (४।४३९) क्त्वा० → इवि० । 'अदेल्लुक्यादेरत आः' (३।१५३) ल० → ला० । 'क-ग-च-ज०' (१।१७७) ग्लुक् **लाइवि** ।

**[ णावइ ]** इव । 'इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः' (४।४४४) नावइ । 'वाऽऽदौ' (१।२२९) ना० → णा० **णावइ** ।

**[ दइवें ]** दैव । 'एच्च दैवे' (१।१५३) दै० → दइ० । तृतीया टा । 'एट्टि' (४।३३३) एत्त्वं-व० → वे० । 'आट्टो णा-ऽनुस्वारौ' (४।३४२) टाया अनुस्वारः **दइवें** ।

**[ घडिअउ ]** घटित । प्रथमा सि । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । अनेन अ० → उ० । 'टो डः' (१।१९५) टि० → डि० । 'क-ग-च-ज०' (१।१७७) तलुक् । 'स्यम्-जस्०' (४।३४४) सिलुक् **घडिअउ** ॥३३१॥

## सौ पुंस्योद्वा ॥ ८।४।३३२ ॥

अपभ्रंशे पुल्लिङ्गे वर्तमानस्य नाम्नोऽकारस्य सौ परे ओकारो वा भवति ॥

अगलिअ-नेह-निवट्टाहं जोअण-लक्खु वि जाउ ।
वरिस-सएण वि **जो** मिलइ सहि ! सोक्खहं **सो** ठाउ ॥१॥

पुंसीति किम् ?

अंगहिं[१] **अंगु** न मिलिउ हलि ! **अहरें** अहरु न **पत्तु** ।
पिअ जोअन्तिहें **मुह-कमलु** एवँइ **सुरउ समत्तु** ॥२॥

**[ सौ पुंस्योद्वा ]** सि सप्तमी ङि । पुम्स् सप्तमी ङि । ओत् प्रथमा सि । वा प्रथमा सि ।

**[ अगलिअ-नेह-निवट्टाहं......... ]**

अस्यार्थः- अगलितस्नेहनिवृत्तानां - अत्रुटितस्नेहचलितानामुपरि योजनलक्षमपि यातु । हे सखि ! वर्षशतेनापि यो मिलति स सौख्यानां स्थानं भवतीत्यर्थः ।

अथ साधनिका- **[ जो ]** यद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन ज० → जो० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **जो** ।

**[ सो ]** तद् । प्रथमा सि । 'अन्त्यव्य०' (१।११) द्लुक् । 'तदश्च तः सोऽक्लीबे' (३।८६) त० → स० । अनेन स० → सो० । 'स्यम्-जस्०' (४।३४४) सिलुक् **सो** ।

---

१. हउँ सगुणी पिउ णिग्गुणउ णिल्लक्खणु णीसंगु । एक्कहिं अंगि वसंताहं मिलिउ ण अंगहिं अंगु ॥ [पाहुडदोहा-१००]

**[ अंगहिं अंगु न मिलिउ............ ]**

अस्यार्थः- अङ्गैरङ्गं न मिलितम् । हे सखि ! अधरेण अधरो न प्राप्तः । प्रियस्य मुखकमलं पश्यन्त्या एव स्त्रिया एवमेव सुरतं समाप्तमित्यर्थः ।

अथ साधनिका - **[ अंगु ]** अंग । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ग० → गु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **अंगु** ।

**[ अहरु ]** अधर । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) र० → रु० । 'स्यम्-जस्०' (४।३४४) सिलुक् । 'ख-घ-थ०' (१।१८७) धस्य हः **अहरु** ।

**[ पत्तु ]** प्राप्त । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) प्त० → प्तु० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) पा० → प० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) द्वित्वं - तु० → त्तु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **पत्तु** ।

**[ मुहकमलु ]** मुखकमल । प्रथमा सि । 'ख-घ-थ-ध-भाम्' (१।१८७) ख० → ह० । 'स्यमोरस्योत्' (४।३३१) ल० → लु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **मुहकमलु** ।

**[ सुरउ ]** सुरत । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) त० → तु० । 'स्यम्-जस्०' (४।३४४) सिलुक् । 'क-ग-च-ज०' (१।१७७) त्लुक् **सुरउ** ।

**[ समत्तु ]** समाप्त । प्रथमा सि । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'क-ग-ट-ड०' (२।७७) प्लुक् । 'अनादौ०' (२।८९) द्वित्वं - त० → त्त० । 'स्यमोरस्योत्' (४।३३१) त्त० → त्तु० । 'स्यम्-जस्०' (४।३४४) सिलुक् **समत्तु** ॥३३२॥

## एट्टि ॥ ८।४।३३३ ॥

अपभ्रंशे अकारस्य टायामेकारो भवति ॥

जे[१] महु दिण्णा दिअहडा दइएं **पवसंतेण** ।
ताण गणंतिएँ अंगुलिउ जज्झरिआउ **नहेण** ॥१॥

**[ एट्टि ]** एतद् सप्तमी ङि ।

**[ जे महु दिण्णा दिअहडा............ ]**

अस्यार्थः- प्रवसता-चलता दयितेन ये मम दिवसा दत्तास्तान् दिवसान् गणयन्त्या ममाङ्गुल्यो नखेन जर्जरिता इत्यर्थः ।

**[ पवसंतेण ]** 'वसं निवासे' (९९९) वस्, प्रपूर्व० । प्रवसतीति । शतृप्र० → अत्० । 'शत्रानशः' (३।१८१) अत्० → न्त० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) प्रवसन्त । तृतीया टा । अनेन एत्वं - न्त० → न्ते० । 'आट्टो णा-ऽनु०' (४।३४२) टा० → ण० । 'सर्वत्र ल-व०' (२।७९) र्लुक् **पवसंतेण** ।

**[ नहेण ]** नख । तृतीया टा । 'ख-घ-थ०' (१।१८७) ख० → ह० । अनेन एत्वं - ह० → हे० । 'आट्टो णाऽनु०' (४।३४२) टा० → ण० **नहेण** ॥३३३॥

---

१. हत्थेसु अ पाएसु अ अङ्गुलिगणणाइ अईगआ दिअहा । एण्हि उण केण गणिज्जउ त्ति भणिउ रुअइ मुद्धा ॥ [गा० स०-४।७]
हस्तयोश्च पादयोश्चाऽङ्गुलिगणनयातिगता दिवसाः । इदानीं पुनः केन गण्यतामिति भणित्वा रोदिति मुग्धा ॥
२. पाठां० - गा० को०-तव गया [३।४६]

## ङिनेच्च ॥ ८।४।३३४ ॥

अपभ्रंशे अकारस्य ङिना सह इकार एकारश्च भवतः ॥

सायरु उप्परि तणु धरइ **तलि** घल्लइ रयणाइं ।
सामि सु-भिच्चु वि परिहरइ सम्माणेइ खलाइं ॥१॥

**तले** घल्लइ ॥

**[ ङिनेच्च ]** ङि तृतीया टा । इत् प्रथमा सि । च प्रथमा सि ।

**[ सायरु उप्परि तणु धरइ तलि............ ]**

**[ तले घल्लइ ]**

अस्यार्थः- सागर उपरि तृणानि धरति । रत्नानि तले क्षिपति । स्वामी सुभृत्यमपि परिहरति - नीचैःकरोति । खलान् सम्मानयति-उच्चैःकरोतीत्यर्थः ॥

**[ तलि तले ]** तल् (२) । सप्तमी ङि । अनेन ङिना सह प्रथमे इकारः- लि०-**तलि** । द्वितीये एकारः-ले०-**तले** ॥३३४॥

## भिस्येद्वा ॥ ८।४।३३५ ॥

अपभ्रंशे अकारस्य भिसि परे एकारो वा भवति ॥

**गुणहिं** न संपय कित्ति पर फल लिहिआ भुंजंति ।
केसरि न लहइ बोड्डिअ वि गय **लक्खेहिं** घेप्पंति ॥१॥

**[ भिस्येद्वा ]** भिस् सप्तमी ङि । एत् प्रथमा सि । वा प्रथमा सि ।

**[ गुणहिं न संपय कित्ति पर.......... ]**

अस्यार्थः- गुणैः संपदो न स्युः परं केवलं कीर्त्तिरेव भवति । जीवा लिखितानि फलानि भुञ्जते । तत्र दृष्टान्तः- केसरी कपर्दिकां[1]मपि न लभते, गजास्तु लक्षैर्गृह्यन्ते इत्यर्थः ॥

**[ गुणहिं ]** गुण । तृतीया भिस् । अनेन वा एत्त्वम् । 'भिसो हि-हिँ-हिं' (३।७) भिस्स्थाने हिं **गुणहिं** ।

**[ लक्खेहिं ]** लक्ष । तृतीया भिस् । 'क्षः खः क्वचित्तु०' (२।३) क्षस्य ख० । 'अनादौ०' (२।८९) द्वित्वं-ख्ख० । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन एत्त्वं - क्ख० → क्खे० । 'भिसो हि-हिँ-हिं' (३।७) भिस्स्थाने हिं **लक्खेहिं** ॥३३५॥

## ङसेर्हे-हू ॥ ८।४।३३६ ॥

अस्येति पञ्चम्यन्तं विपरिणम्यते ॥

अपभ्रंशे अकारात् परस्य ङसेर्हे-हु इत्यादेशौ भवतः ॥

**वच्छहे** गृण्हइ फलइँ जणु कडु-पल्लव वज्जेइ ।
तो वि महद्दुमु सुअणु जिवँ ते उच्छंगि धरेइ ॥१॥

**वच्छहु** गृण्हइ ॥

---

१. N. काकिणीमपि ।

**[ङसेर्हे-हू]** ङसि षष्ठी ङस् । हे-हु प्रथमा औ । 'स्यमोरस्योत्' (४।३३१) इत्यत्र अस्येति यत्पदं षष्ठ्यन्तं तत्पदं च पञ्चम्यन्तमत्र व्याख्यायते ।

**[वच्छहे गृण्हइ फलइँ.................]**

**[वच्छहु गृण्हइ]**

अस्यार्थः- जनो वृक्षात् फलानि गृहणाति, कटुपल्लवानि वर्जयति, ततोऽपि महाद्रुमस्तान्-कटुपल्लवान् उच्छंगे (उत्सङ्गे) धरति । क इव ? सुजन इव । यथा सुजनः कटुपल्लवप्रायानपि जनान् धरति, न तु तिरस्करोतीत्यर्थः ।

**[वच्छहे वच्छहु]** वृक्ष (२) । पञ्चमी ङसि । 'छोऽक्ष्यादौ' (२।१७) क्षस्य छः । 'अनादौ०' (२।८९) छस्य द्वित्वम् । 'द्वितीय-तुर्य०' (२।९०) पूर्वछस्य चः । 'ॠतोऽत्'[1] (१।१२६) वृ० → व० । अनेन ङसिस्थाने हे० अथवा हु० **वच्छहे वच्छहु** ॥३३६॥

## भ्यसो हुं ॥ ८।४।३३७ ॥

अपभ्रंशे अकारात् परस्य भ्यसः पञ्चमीबहुवचनस्य हुं इत्यादेशो भवति ॥

दूरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ ।
जिह **गिरि-सिंगहुं** पडिअ सिल अण्णु वि चूरु करेइ ॥१॥

**[भ्यसो हुं]** भ्यस् षष्ठी ङस् । हुं प्रथमा सि ।

**[दूरुड्डाणे पडिउ खलु...........]**

अस्यार्थः- दूरोड्डयनेन-दूरगमनेन पतितः खलो दुर्जनः आत्मानं जनं च मारयति । यथा गिरिशृङ्गेभ्यः पतिता शिला आत्मानमन्यमपि[2] चूर्णीकरोतीत्यर्थः ॥३३७॥

## ङसः सु-हो-स्सवः ॥ ८।४।३३८ ॥

अपभ्रंशे अकारात् परस्य ङसः स्थाने सु-हो-स्सु इति त्रय आदेशा भवन्ति ॥

जो गुण गोवइ अप्पणा पयडा करइ **परस्सु** ।
**तसु** हउं कलि-जुगि **दुल्लहहो** बलि किज्जउं **सुअणस्सु** ॥१॥

**[ङसः सु-हो-स्सवः]** ङस् षष्ठी ङस् । सु-हो-स्सु प्रथमा जस् ।

**[जो गुण गोवइ अप्पणा...........]**

अस्यार्थः- य आत्मीयान् गुणान् गोपयति । परस्य गुणान् प्रकटान् करोति । अहं कलियुगे तस्य दुर्लभस्य सुजनस्य बलि-पूजां क्रिये इत्यर्थः ।

**[परस्सु]** पर । षष्ठी ङस् । अनेन ङस्० → स्सु० **परस्सु** ।

**[तसु]** तद् । षष्ठी ङस् । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन ङस्० → सु० **तसु** ।

**[दुल्लहहो]** दुर्लभ । षष्ठी ङस् । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ल० → ल्ल० । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन ङस्० → हो० **दुल्लहहो** ।

---

१. G. 'स्वराणां०' (४।३२९) वृ० → व० । २. J. N. दपि ।

**[ सुअणस्सु ]** सुजन । षष्ठी ङस् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'नो णः' (१।२२८) न० → ण० । अनेन ङस्० → स्सु० **सुअणस्सु** ॥३३८॥

## आमो हं ॥ ८।४।३३९ ॥

अपभ्रंशे अकारात् परस्य आमो हमित्यादेशो भवति ॥

**तणहं** तइज्जी भंगि न वि तें अवड-यडि वसंति ।
अह जणु लग्गिवि उत्तरइ अह सह सइं मज्जंति ॥१॥

**[ आमो हं ]** आम् षष्ठी ङस् । हं प्रथमा सि ।

**[ तणहं तइज्जी भंगि............ ]**

अस्यार्थः- तृणानां तृतीया भङ्गी नापि - तृतीयः प्रकारो नाऽप्यस्ति, तेन कारणेन अवटतटे-कूपतटे वसन्ति । अथ यो जनस्तृणानि लगित्वा उत्तरति । अथ इति अथवा तृणानि जनेन सह स्वयं मज्जन्ति । अन्योऽपि यः प्रकारद्वयं कर्तुकामो भवति स विषमस्थाने वसति । प्रकारद्वयं किं ? म्रियते वा शत्रून् जयति वेति भावार्थ इत्यर्थः ॥

**[ तणहं ]** तृण । षष्ठी आम् । 'स्वराणां स्वराः०' (४।३२९) तृ० → त० । अनेन आम्० → हं० **तणहं** ॥३३९॥

## हुं चेदुद्भ्याम् ॥ ८।४।३४० ॥

अपभ्रंशे इकारोकाराभ्यां परस्यामो हुं हं चादेशौ भवतः ॥

दइवु[१] घडावइ वणि **तरुहुं सउणिहं** पक्क-फलाइं ।
सो वरि सुक्खु पइट्ठ ण वि कण्णहिं खल-वयणाइं ॥१॥

प्रायोऽधिकारात् क्वचित् सुपोऽपि हुं ।

धवलु[२] विसूरइ सामिअहो गरुआ भरु पिक्खेवि ।
हउं किं न जुत्तउ[३] दुहुं दिसिहिं खण्डइं दोण्णि करेवि ॥२॥

**[ हुं चेदुद्भ्याम् ]** हुं प्रथमा सि । च प्रथमा सि । इच्च उच्च = इदुतौ, ताभ्याम् = इदुद्भ्याम् । पञ्चमी भ्याम् ।

**[ दइवु घडावइ वणि तरुहुं सउणिहं............. ]**

अस्यार्थः- दैवो वने तरूणां पक्वफलानि शकुनीनां - पक्षिणां घटयति तत् सौख्यं, वरं कर्णयोः प्रविष्टानि खलवचनानि सौख्यं नेत्यर्थः ।

**[ तरुहुं ]** तरु । षष्ठी आम् । अनेन आम्० → हुं० **तरुहुं** ।

**[ सउणिहं ]** शकुनि । षष्ठी आम् । 'श-षोः सः' (१।२६०) श० → स० । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'नो णः' (१।२२८) नि० → णि० । अनेन आम्० → हं० **सउणिहं** ।

---

१. तं सुणिवि भणइ अहिमाणमेरु वरि खज्जइ गिरिकंदरि कसेरु । णउ दुज्जण-भउँहा-वंकियाइं दीसंतु कालुस-भावंकियाइं ॥
[म० पु० - सन्धिः १, विभागः-३, पङ्क्तिः- १२-१३]

२. अयं दोधक उपाध्यायविनयविजयविरचितायां कल्पसूत्रटीकायां सुबोधिकायामपि षष्ठे व्याख्याने शूलपाणियक्षपूर्वजन्मकथायामुद्धृतः ।

३. पाठां- क० सू० - जुत्तो दुहिं धुरिहिं खंडय दुन्नि करेवि ।

**[ कण्णहिं ]** कर्ण । सप्तमी ओस् । 'द्विवचनस्य बहुवचनम्' (३।१३०) ओस्० → सुप्० । **'भिस्सुपोर्हिं'** (४।३४७) सुप्० → हिं० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-ण० → ण्ण० **कण्णहिं** ।

**[ धवलु विसूरइ सामिअहो.......... ]**

अस्यार्थः- धवलो वृषभो धौरेयो विषीदति-विषादं करोति । **किंकृत्वा ? स्वामिनो गुरुं भारं प्रेक्ष्य ! किं** मनस्यचिन्तयत्तदाह-अहं किन्न योजितः ? क्व ? द्वयोर्दिशोः । **किंकृत्वा ? द्वौ खण्डौ कृत्वा इत्यर्थः** ।

**[ दुहुं ]** द्वि । सप्तमी ओस् । 'द्विवचनस्य बहुवचनम्' (३।१३०) ओस्० → सुप्० । **'द्विन्योरुत्'** (१।९४) द्वि० → दु० । प्रायो ग्रहणादनेन सुपोऽपि हुं **दुहुं** ।

**[ दिसिहिं ]** दिश् । सप्तमी ओस् । 'द्विवचनस्य बहुवचनम्' (३।१३०) ओस्० → सुप्० । **'दिक्-प्रावृषोः सः'** (१।१९) श० → स० । 'स्वराणां स्वराः प्रायो०' (४।३२९) स० → सि० । **'भिस्-सुपोर्हिं'** (४।३४७) सुप्० → हिं० **दिसिहिं** ॥३४०॥

## ङसि-भ्यस्-ङीनां हे-हुं-हयः ॥ ८।४।३४१ ॥

अपभ्रंशे इदुद्भ्यां परेषां ङसि-भ्यस्-ङि इत्येतेषां यथासंख्यं हे-हुं-हि इत्येते त्रय आदेशा भवन्ति ॥

॥ ङसेर्हे ॥ **गिरिहे**[1] सिलायलु **तरुहे** फलु घेप्पइ नीसावँन्नु ।
घरु मेल्लेप्पिणु माणुसहं तो वि न रुच्चइ रन्नु ॥१॥

॥ भ्यसो हुं ॥ **तरुहुं**[2] वि वक्कलु फलु मुणि वि परिहणु असणु लहंति ।
**सामिहुं** एत्तिउ अग्गलउं आयरु भिच्च गृहंति ॥२॥

॥ ङेर्हि ॥ अह विरल-पहाउ जि **कलिहि** धम्मु ॥३॥

**[ ङसि-भ्यस्-ङीनाम् ]** ङसि-भ्यस्-ङि षष्ठी आम् ।

**[ हे-हुं-हयः ]** हे-हुं-हि प्रथमा जस् ।

**[ गिरिहे सिलायलु तरुहे फलु....... ]**

अस्यार्थः- निःसामान्यं सर्वोऽपि जनो गिरेः शिलातलं गृह्णाति । तरोश्च फलं गृह्णाति । ततोऽपि मानुषाणां मनुष्येभ्यो वा गृहं मुक्त्वा अरण्यं न रोचते इत्यर्थः ।

**[ गिरिहे ]** गिरि । पञ्चमी ङसि । अनेन ङसि० → हे० **गिरिहे** ।

**[ तरुहे ]** तरु । पञ्चमी ङसि । अनेन ङसि० → हे० **तरुहे** ।

**[ तरुहुं वि वक्कलु फलु............. ]**

अस्यार्थः- मुनयोऽपि तरुभ्योऽपि वल्कलं परिधानं फलमशनं क्रमेण लभन्ते, परं स्वामिभ्य इयदर्गलमधिकं यद् भृत्या आदरं गृह्णन्तीत्यर्थः ।

---

१. वत्थाइं वक्कलाइं वित्थिन्न-सिलायलाइं सयणीयं । असणं जत्थ फलाइं तं रन्नं कह न रमणीयं ॥ [ना० क० - ६।५१]

२. अडवीसु वरं वासो, समयं हरिणेसु जत्थ सच्छन्दो । न य एरिसाणि सामिय !, सुव्वंति जहिं दुव्वयणाइं ॥
[पउमचरिये कविलोवक्खाणो नाम पंचतीसइमा उद्देसो-गा० -११]

**[ तरुहुं ]** तरु । पञ्चमी भ्यस् । अनेन भ्यस्० → हुं० **तरुहुं** ।

**[ सामिहुं ]** स्वामिन् । पञ्चमी भ्यस् । 'अन्त्यव्यञ्जनस्य' (१।११) न्लुक् । 'सर्वत्र ल-व०' (२।७९) व्लुक् । अनेन भ्यस्० → हुं० **सामिहुं** ।

**[ अह विरल-पहाउ जि कलिहि धम्मु ]** एकमेव पदम् ।

अस्यार्थः- अथ विरलप्रभाव एव कलौ धर्म इत्यर्थः ।

**[ जि ]** एव । 'पश्चादेवमेवैवेदानीं - प्रत्युतेतसः पच्छइ - एम्वइ-जि०' (४।४२०) एव० → जि० **जि** ।

**[ कलिहि ]** कलि । सप्तमी ङि । अनेन ङि० → हि० **कलिहि** ॥३४१॥

## आट्टो णा-ऽनुस्वारौ ॥ ८।४।३४२ ॥

अपभ्रंशे अकारात् परस्य टावचनस्य णा-ऽनुस्वारावादेशौ भवतः ॥

दइएं **पवसंतेण** ॥

**[ आट्टो णा-ऽनुस्वारौ ]** अ पञ्चमी ङसि । टा षष्ठी ङस् । णश्च अनुस्वारश्च = णाऽनुस्वारौ । प्रथमा औ ।

**[ दइएं पवसंतेण ]** दयितेन प्रवसता । पूर्वं लिखितम् । [४।३३३] ॥३४२॥

## एं चेदुतः ॥ ८।४।३४३ ॥

अपभ्रंशे इकारोकाराभ्यां परस्य टावचनस्य एं चकारात् णा-ऽनुस्वारौ च भवन्ति ॥

॥ एं ॥ **अग्गिएं** उण्हउं होइ जगु वाएं सीअलु तेवँ ।
जो पुणु अग्गि सीअला तसु उण्हत्तणु केवँ ॥१॥

॥ णा-ऽनुस्वारौ ॥ [१]विप्पिअ-आरउ जइ वि पिउ तो वि तँ आणहि अज्जु ।
**अग्गिण** दड्ढा जइ वि घरु तो तें **अग्गिं** कज्जु ॥२॥

एवमुकारादप्युदाहार्याः ॥

**[ एं चेदुतः ]** एं प्रथमा सि । च प्रथमा सि । इदुत् पञ्चमी ङसि ।

**[ अग्गिएं उण्हउं होइ जगु.......... ]**

अस्यार्थः- अग्निना जगदुष्णं भवति, तथा वातेन शीतलं भवति । यः पुनः अग्निनाऽपि शीतलस्तस्योष्णत्वं कथम् ?। न कथमपीत्यर्थः ॥

**[ अग्गिएं ]** अग्नि । तृतीया टा । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । अनेन टा० → एं० **अग्गिएं** ।

---

१. जेण विणा ण जिविज्जइ अणुणिज्जइ सो कआवराहो वि । पत्ते वि णअरदाहे भण कस्स ण वल्लहो अग्गी ॥
[गा० स० - २।६३]
येन विना न जीव्यतेऽनुनीयते स कृताऽपराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥
२. पाठां०- व० ल० - कुट्टिणीसिक्खावज्जा-५५७-६. वलिज्जइ = स्थीयते । [गा० को० - वल्यते- ४।६४]

**[ विप्पिअ-आरउ जइ वि पिउ........ ]**

अस्यार्थः- हे आर्ये ! हे सखि ! विप्रियकारकः - अप्रियकारको यद्यपि प्रियस्ततोऽपि तं आनय । अग्निना दग्धं यद्यपि गृहं ततोऽपि तेन अग्निना सह कार्यं भवेदित्यर्थः ।

**[ अग्गिण ]** अग्नि । तृतीया टा । अनेन टा० → ण० । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) द्वित्वम् **अग्गिण** ।

**[ तें ]** तद् । तृतीया टा । 'अन्त्यव्य०' (१।११) द्लुक् । 'आट्टो णा-ऽनुस्वारौ' (४।३४२) **टाया अनुस्वारः तें** ।

**[ अग्गिं ]** अग्नि । तृतीया टा । अनेन टाया अनुस्वारः । शेषं सुगमम् । **अग्गिं** ॥३४३॥

**स्यम्-जस्-शसां लुक् ॥ ८।४।३४४ ॥**

अपभ्रंशे सि-अम्-जस्-शस् इत्येतेषां लोपो भवति ॥

**एइ ति घोडा एह थलि०** [४।३३०] इत्यादि । अत्र स्यम्-जसां लोपः ॥

जिवँ जिवँ वंकिम लोअणहं णिरु सामलि सिक्खेइ ।
तिवँ तिवँ **वम्महु निअय-सर** खर-पत्थरि तिक्खेइ ॥१॥

**[ स्यम्-जस्-शसां लुक् ]** स्यम्-जस्-शस् षष्ठी आम् । लुक् प्रथमा सि ।

**[ एइ ति घोडा एह थलि........ ]** पूर्वं लिखितम् । [४।३३०] ।

**[ जिवँ जिवँ वंकिम लोअणहं.............. ]**

अस्यार्थः- यथा यथा श्यामली स्त्री लोचनानां निश्चितं वक्रत्वं शिक्षते, तथा तथा मन्मथो निजकशरान् खरप्रस्तरे-कठोरपाषाणे तीक्ष्णान् करोतीत्यर्थः ।

**[ वंकिम ]** वक्रत्व । द्वितीया अम् । अनेन अम्लोपः । 'वक्रादावन्तः' (१।२६) अनुस्वारः । **'त्वस्य डिमा-त्तणौ वा'** (२।१५४) त्व० → डिमा० → इमा० । 'डित्यन्त्य०' (२।१।११४) क्रस्य अलुक् । **'सर्वत्र ल-व०' (२।७९) र्लुक्।** 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) मा० → म० **वंकिम** ।

**[ वम्महु ]** मन्मथ । प्रथमा सि । 'मन्मथे वः' (१।२४२) म० → व० । **'न्मो मः'** (२।६१) न्म० → म० । **'ख-**घ-थ-ध-भाम्' (१।१८७) थस्य हः । 'स्यमोरस्योत्' (४।३३१) ह० → हु० । **अनेन सिलुक् वम्महु** ।

**[ निअयसर ]** निजकशर । द्वितीया शस् । 'क-ग-च-ज०' (१।१७७) ज-कयोर्लुक् । **'अवर्णो यश्रुतिः'** (१।१८०) अ० → य० । 'श-षोः सः' (१।२६०) श० → स० । अनेन शस्लुक् **निअयसर** ॥३४४॥

**षष्ठ्याः ॥ ८।४।३४५ ॥**

अपभ्रंशे षष्ठ्या विभक्त्याः प्रायो लुग् भवति ॥

संगर-सएहिं जु वण्णिअइ देक्खु अम्हारा कंतु ।

अइमत्तहं चत्तंकुसहं **गय** कुंभइं दारंतु ॥१॥

पृथग्योगो लक्ष्यानुसारार्थः ॥

**[ षष्ठ्याः ]** षष्ठी षष्ठी ङस् ।

**[ संगर-सएहिं जु वण्णिअइ.......... ]**

**अस्यार्थः**- हे सखीति गम्यते । तं मदीयं कान्तं पश्य । यः संग्रामशतेषु वर्ण्यते । किंकुर्वन्तं ? अतिमत्तानां त्यक्ताऽङ्कुशानां गजानां कुम्भान् दारयन्तमित्यर्थः ।

**[ गय ]** गज । षष्ठी आम् । 'क-ग-च-ज०' (१।१७७) ज्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । अनेन आम्लुक् **गय** ॥३४५॥

## आमन्त्र्ये जसो होः ॥ ८।४।३४६ ॥

अपभ्रंशे आमन्त्र्येऽर्थे वर्तमानान्नाम्नः परस्य जसो हो इत्यादेशो भवति ॥ लोपाऽपवादः ॥

**तरुणहो ! तरुणिहो !** मुणिउ मइं करहु म अप्पहो घाउ ॥१॥

**[ आमन्त्र्ये जसो होः ]** आमन्त्र्य सप्तमी ङि । जस् षष्ठी ङस् । हो प्रथमा सि ।

**[ तरुणहो ! तरुणिहो ! मुणिउ मइं करहु म अप्पहो घाउ ]** ॥ द्विपदम् ॥

**अस्यार्थः**- हे तरुणाः ! हे तरुण्यः ! मया ज्ञातं, आत्मनो घातं मा कुरुत इत्यर्थः ।

**[ तरुणहो ! ]** तरुण । प्रथमा जस् । अनेन जस्० → हो० **तरुणहो !** ।

**[ तरुणिहो ! ]** तरुणी । प्रथमा जस् । अनेन जस्० → हो० **तरुणिहो !** ॥३४६॥

## भिस्सुपोर्हिं ॥ ८।४।३४७ ॥

अपभ्रंशे भिस्सुपोः स्थाने हिं इत्यादेशो भवति ॥

॥ भिस् ॥ **गुणहिं** न संपय कित्ति पर..... [४।३३५] ।

॥ सुप् ॥ भाईरहि जिवँ भारइ **मग्गेहिं तिहिं** वि पयट्टइ ॥१॥

**[ भिस्सुपोर्हिं ]** भिस्-सुप् षष्ठी ओस् । हिं प्रथमा सि ।

**[ गुणहिं न संपय कित्ति पर....... ]** पूर्वं लिखितम् । [४।३३५] ।

**[ भाईरहि जिवँ भारइ मग्गेहिं तिहिं वि पयट्टइ ]** ॥ गद्य ॥

**अस्यार्थः**- यथा भागीरथी गङ्गा त्रिषु मार्गेषु प्रवर्तते तथा भारत्यपि उत्पाद-व्यय-ध्रौव्यात्मकेषु त्रिषु मार्गेषु प्रवर्तते इत्यर्थः ।

**[ मग्गेहिं ]** मार्ग । सप्तमी सुप् । 'ह्रस्वः संयोगे' (१।८४) मा० → म० । 'सर्वत्र ल-व०' (२।७९) र्लुक् । **'अनादौ०'** (२।८९) गस्य द्वित्वम् । 'भिस्-भ्यस्-सुपि' (३।१५) एत्त्वं-ग्ग० → ग्गे० । अनेन सुप्० → हिं० **मग्गेहिं** ।

**[ तिहिं ]** त्रि । सप्तमी सुप् । 'सर्वत्र ल-व०' (२।७९) र्लुक् । अनेन सुप्० → हिं० **तिहिं** ॥३४७॥

## स्त्रियां जस्-शसोरुदोत् ॥ ८।४।३४८ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य जसः शसश्च प्रत्येकमुदोतावादेशौ भवतः ॥ लोपाऽपवादौ ॥

॥ जसः ॥ अंगुलिउ **जज्जरियाउ** नहेण ॥१॥

॥ शसः ॥ सुंदर-**सव्वंगाउ विलासिणीओ** पेच्छंताण ॥२॥

वचनभेदान्न यथासंख्यम् ॥

**[ स्त्रियां जस्-शसोरुदोत् ]** स्त्री सप्तमी ङि । जस्-शस् षष्ठी ओस् । उदोत् प्रथमा सि ।

**[ अंगुलिउ जज्जरियाउ नहेण ]** पूर्ववत् । [४।३३३-१] ।

**[ सुंदर-सव्वंगाउ विलासिणीओ पेच्छंताण ]** अस्यार्थः- सुन्दर-सर्वाङ्गा विलासिनीः पश्यतां नराणामित्यर्थः ।

**[ सुंदर-सव्वंगाउ ]** सुन्दर-सर्वाङ्ग । सुन्दराणि सर्वाङ्गानि यासां ताः । स्त्रियामाप् । द्वितीया शस् । अनेन शस्० → उ० । शेषं सुगमम् । **सुंदर-सव्वंगाउ** ।

**[ विलासिणीओ ]** विलासिनी । द्वितीया शस् । अनेन शस्० → ओ० । 'नो णः' (१।२२८) नी० → णी० **विलासिणीओ** ॥३४८॥

**ट ए ॥ ८।४।३४९ ॥**

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्याष्टायाः स्थाने ए इत्यादेशो भवति ॥

निअ-मुह-करहिँ वि मुद्ध कर[१] अंधारइ पडिपेक्खइ ।
ससि-मंडल-**चंदिमए** पुणु काइं न दूरे देक्खइ ? ॥१॥

जहिँ मरगय-**कंतिए** संवलिअं ॥२॥

**[ ट ए ]** टा षष्ठी ङस् । ए प्रथमा सि ।

**[ निअ-मुह-करहिँ वि मुद्ध............... ]**

अस्यार्थः- मुग्धा स्त्री निजमुखकरैरपि अन्धकारे करं-हस्तं प्रतिप्रेक्षते - पश्यति । शशिमण्डलचन्द्रिकया पुनः दूरे कथं न पश्यति ? इत्यर्थः ।

**[ ससि-मंडल-चंदिमए ]** शशि-मण्डल-चन्द्रिका । तृतीया टा । 'श-षोः सः' (१।२६०) शशि० → **ससि०** । 'द्रे रो नवा' (२।८०) र्लुक् । ('वाधो रो लुक्' (४।३९८) र्लुक्) । 'चन्द्रिकायां मः' (१।१८५) का० → **मा०** । '**स्वराणां** स्वराः०' (४।३२९) मा० → म० । अनेन टा → ए० **ससि-मण्डल-चंदिमए** ॥

**[ जहिँ मरगय-कंतिए संवलिअं ]** अस्यार्थः- यस्मिन् मरकत-कान्त्या संवलितं-मिश्रितम् ।

**[ मरगय-कंतिए ]** मरकत - कान्ति । तृतीया टा । 'मरकत-मदकले गः कन्दुके त्वादेः' (१।१८२) कस्य गः । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'ह्रस्वः संयोगे' (१।८४) का० → क० । अनेन टा० → ए० **मरगय-कंतिए** ॥३४९॥

**ङस्-ङस्योर्हे ॥ ८।४।३५० ॥**

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परयोर्ङस्-ङसि इत्येतयोर्हे इत्यादेशो भवति ॥

॥ ङसः ॥ तुच्छ-**मज्झहे** तुच्छ-**जंपिरहे** ।

तुच्छच्छ-**रोमावलिहे** तुच्छ-राय ! तुच्छयर-**हासहे** ।
पिय-वयणु **अलहंतिहे**[२] तुच्छ-काय-वम्मह-**निवासहे** ॥

---

१. I. N. किर = किल । G. P. मुद्धकर = मुग्धकरा । २. G. H. I. J. M. N. अलहंतिअहे ।

अन्नु जु तुच्छउं तहे धणहे तं अक्खणहं न जाइ ।
कटरि थणंतरु[1] **मुद्धडहे** जं(जें) मणु[2] विच्चि न माइ ॥१॥ युग्मम् ॥

॥ ङसेः ॥ [3]फोडेंति जे हियडउं अप्पणउं ताहं पराई कवण घण ? ।
रक्खेज्जहु लोअहो ! अप्पणा **बालहे** जाया विसम थण ॥२॥

**[ ङस्-ङस्योर्हे ]** ङस्-ङसि षष्ठी ओस् । हे प्रथमा सि ।

**[ तुच्छ-मज्झहे तुच्छ जंपिरहे......... ]**

अनयोरर्थः- तुच्छ-रागेति । दूतीकृतं नायकस्याऽऽमन्त्रणम् । हे तुच्छ-राग ! तस्या नायिकाया अन्यद् यत् तुच्छं तदाख्यातुं न याति । किम्भूताया नायिकायाः ? तुच्छ-मध्यायाः । पुनः किं० ? तुच्छ-जल्पनशीलायाः । पुनः किं० ? तुच्छाच्छ-रोमावल्याः । पुनः किं० ? तुच्छतर-हासायाः । पुनः किं० ? प्रियवचनमलभमानायाः । पुनः किं० ? तुच्छ-काय-मन्मथ-निवासायाः । तुच्छकाये मन्मथनिवासो यस्याः सा । तुच्छकायत्वं भर्तुर्विरहात् । कटरीत्याश्चर्ये । येन कारणेन मुग्धायाः स्तनान्तरं मनोवर्त्मनि न माति स्तनयोरतिपीनत्वात् । अन्तरस्य अतितुच्छत्वं वर्णितमित्यर्थः ॥

अथ व्युत्पत्तिः - **[ तुच्छ-मज्झहे ]** तुच्छ-मध्या । षष्ठी ङस् । 'साध्वस-ध्य-ह्यां झः' (२।२६) ध्यस्य झः । 'अनादौ०' (२।८९) झस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वझस्य जः । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ज्झा० → ज्झ० । अनेन ङस्० → हे० **तुच्छ-मज्झहे** ।

**[ तुच्छ-जंपिरहे ]** तुच्छपूर्व० 'कथण् वाक्यप्रबन्धे' (१८८१) कथ । 'कथेर्वज्जर-पज्जरोप्पाल-पिसुण०' (४।२) कथ० → जम्प० । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० । 'शीलाद्यर्थस्येरः' (२।१४५) तृन्० → इर० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) जंपिर । 'आत्' (२।४।१८) आप्प्र० → आ० । षष्ठी ङस् । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) रा० → र० । अनेन ङस्० → हे० **तुच्छ-जंपिरहे** ।

**[ तुच्छच्छ-रोमावलिहे ]** तुच्छाच्छ-रोमावली । षष्ठी ङस् । 'ह्रस्वः संयोगे' (१।८४) च्छा० → च्छ० । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ली० → लि० । अनेन ङस्० → हे० **तुच्छच्छ-रोमावलिहे** ।

**[ तुच्छयर-हासहे ]** तुच्छतर-हासा । षष्ठी ङस् । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) सा० → स० । अनेन ङस्० → हे० । 'क-ग-च-ज०' (१।१७७) त्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० **तुच्छयर-हासहे** ।

**[ अलहंतिहे ]** नञ्पूर्व० 'डुलभिंष् प्राप्तौ' (७८६) लभ् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) लभ० । 'शत्रानशावे०' (५।२।२०) आनश्प्र० → आन० । 'न्त-माणौ' (३।१८०) ('शत्रानशः' (३।१८१) ) आनश्० → न्त० । 'अजातेः पुंसः' (३।३२) ङीप्र० । 'लुक्' (१।१०) न्तस्य अलुक् । 'नञत्' (३।२।१२५) नञ्० → अ० । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) न्ती० → न्ति० । 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन ङस्० → हे० **अलहंतिहे** ।

**[ तुच्छ-काय-वम्मह-निवासहे ]** तुच्छ-काय-मन्मथ-निवासा । षष्ठी ङस् । 'मन्मथे वः' (१।२४२) म० → व० । 'न्मो मः' (२।६१) न्म० → म० । 'अनादौ०' (२।८९) द्वित्वं-म० → म्म० । 'ख-घ-थ-ध-भाम्' (१।१८७) थ० → ह० । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) सा० → स० । अनेन ङस्० → हे० **तुच्छ-काय-वम्मह-निवासहे** ।

---

१. G. थणंतर । २. G. मण ।

३. स्वकीयं हृदयं भित्त्वा, निर्गतौ यौ पयोधरौ । हृदयस्यान्यदीयस्य, भेदने का कृपा तयोः ॥
[सु० र० भा० - तरुणीपृथगवयववर्णनाधिकारे - २६४]

४. P. अप्पणो ।

**[ तहे ]** तद् । षष्ठी ङस् । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । अनेन ङस्० → हे० **तहे** ।

**[ धणहे ]** नायिका । षष्ठी ङस् । 'शीघ्रादीनां वहिल्लादयः' (४।४२२) नायिकायाः स्थाने धण० । अनेन ङस्० → हे० **धणहे** ।

**[ फोडेंति जे हियडउं.......... ]**

अस्यार्थः- यौ स्तनौ यं आत्मीयं हृदयं स्फोटयतः तयोः परकीया घृणा-दया किम् ? हे लोकाः ! आत्मानं रक्षत। यतः कारणात् बालाया विषमौ स्तनौ जातावित्यर्थः ।

**[ बालहे ]** बाला । पञ्चमी ङसि । अनेन ङसि० → हे० । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ला० → ल० **बालहे** ॥३५०॥

## भ्यसामोर्हुः ॥ ८।४।३५१ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य भ्यस आमश्च हु इत्यादेशो भवति ॥

भल्ला[१] हुआ जु मारिआ बहिणि ! महारा कंतु ।
लज्जेज्जंतु[२] **वयंसिअहु** जइ भग्गा घरु एंतु ॥१॥

वयस्याभ्यो वयस्यानां वेत्यर्थः ॥

**[ भ्यसामोर्हुः ]** भ्यस्-आम् षष्ठी ओस् । हु प्रथमा सि ।

**[ भल्ला हुआ जु मारिआ.......... ]**

अस्यार्थः - हे भगिनि ! इदं भव्यं भूतं, यन्मदीयः कान्तो मारितः । यदि भग्नो गृहमैष्यत् तर्हि **वयस्याभ्यो वयस्यानां** वा सखीभ्यः सखीनां वा मध्ये लज्जां प्राप्से(प्राप्स्यम्) इत्यर्थः ।

**[ वयंसिअहु ]** वयस्य । पञ्चमी भ्यस् अथवा षष्ठी आम् । 'अजातेः पुंसः' (३।३२) ङीप्र० । **'लुक्'** (१।१०) अलुक्। 'लोकात्' (१।१।३) वयस्यी । 'अधो म-न-याम्' (२।७८) य्लुक् । **'स्वराणां स्वराः प्रायोऽपभ्रंशे'** (४।३२९) सी० → सि० । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । अनेन भ्यस्-आम्० → हु० **वयंसिअहु** ॥३५१॥

## ङेर्हिः ॥ ८।४।३५२ ॥

अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य ङेः सप्तम्येकवचनस्य हि इत्यादेशो भवति ॥

---

१. अन्ना पइं नियच्छइ, जह पिट्ठिं रणमुहे न देसि तुमं । मा सहियणस्स पुरओ, ओगुट्ठिं नाह ! काहिसि मे ॥
[पउमचरिये रावणबलनिग्गमणं नाम छप्पन्ने पव्वे गा० - १५]

२. N. टि०-लज्जेज्जं को संस्कृत विध्यर्थ **एयं- ( गच्छेयम् )** प्रत्ययान्त प्रथम पुरुष एकवचन पर से आया हुआ और **तु** को वाक्योपयोगी माना है । विध्यर्थ के ऐसे रूप अपभ्रंश के लिये बडे असामान्य है । **तु** के स्थान पर **त्** होत तो **लज्जेज्जंत** पूरा एक शब्द हो जाता । इस प्रकार उसे लज्ज् के क्रियातिपत्त्यर्थ कर्मणि वर्तमान कृदन्त समझा जा सकता है।
लज्जेज्जं = अलज्जिष्यम् । तु = ततः ।
I. लज्जेज्जंतु = अलज्जिष्ये ।
M. लज्जेज्जन्तु = अलज्जिष्यत् । G. लज्जिज्जंतु ।

वायसु[1] उड्डावंतिअएँ पिउ दिट्ठउ सहस-त्ति ।
अद्धा वलया महिहि गय अद्धा फुट्ट तड-त्ति ॥१॥

**[ ङेर्हिः ]** ङि षष्ठी ङस् । हि प्रथमा सि ।

**[ वायसु उड्डावंतिअएँ............... ]**

अस्यार्थः- वायसमुड्डापयन्त्या सत्या स्त्रिया सहसेति प्रियो दृष्टः । अर्द्धानि वलयानि मह्यां गतानि-भूमौ पतितानि, अर्द्धानि [2]त्रटिति कृत्वा स्फुटितानीत्यर्थः ।

**[ महिहि ]** मही । सप्तमी ङि । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ही० → हि० । अनेन ङि० → हि० **महिहि** ॥३५२॥

## क्लीबे जस्-शसोरिं ॥ ८।४।३५३ ॥

अपभ्रंशे क्लीबे वर्तमानान्नाम्नः परयोर्जस्-शसोः इं इत्यादेशो भवति ॥

**कमलइं** मेल्लवि **अलि-उलइं करिगंडाइं** महंति ।
असुलहमेच्छण[3] जाहं भलि ते ण वि दूरं[4] गणंति[5] ॥१॥

**[ क्लीबे जस्-शसोरिं ]** क्लीब सप्तमी ङि । जस्-शस् षष्ठी ओस् । इं प्रथमा सि ।

**[ कमलइं मेल्लवि अलि-उलइं.......... ]**

अस्यार्थः- अलि-कुलानि कमलानि मुक्त्वा करि-गण्डान् काङ्क्षन्ति । येषामसुलभं - दुर्लभं एष्टुं भलिः = कदाग्रहो भवति, ते नापि दूरं गणयन्तीत्यर्थः ।

**[ कमलइं ]** कमल । द्वितीया शस् । अनेन शस्० → इं० **कमलइं** ।

**[ अलि-उलइं ]** अलि-कुल । प्रथमा जस् । अनेन जस्० → इं० । 'क-ग-च-ज०' (१।१७७) क्लुक् **अलि-उलइं** ॥३५३॥

## कान्तस्याऽत उं स्यमोः ॥ ८।४।३५४ ॥

अपभ्रंशे क्लीबे वर्तमानस्य ककारान्तस्य नाम्नो योऽकारस्तस्य स्यमोः परयोः उं इत्यादेशो भवति ॥

अन्नु जु **तुच्छउं** तहे धणहे...... ॥१॥ [४।३५०-१] ।

**भग्गउं** देक्खिवि निअय-बलु बलु **पसरिअउं** परस्सु ।
उम्मिल्लइ ससि-रेह जिवँ करि करवालु पियस्सु ॥२॥

---

१. काग उडावण धण खडी, आयो पीव भडक्क । आधी चूडी काग गल, आधी गयी तडक्क ॥१॥ [रा० दो०]
अर्थः- नायिका काग उडा रही थी । उसका शरीर प्रियतमवियोगसे बहुत दुर्बल हो गया था, पर ज्योंही प्रियतमको आया सुना, वह अचानक मोटी हो गयी और हाथ मोटा होने से हाथ की चूडी तडककर टूट गयी । हाथ उँचा किया हुआ था, इसलिए टूटी हुई चूडी का ऊपरवाला आधा हिस्सा उछलकर कौवे के गले में जा पडा ।
२. H. K. त्रटदिति । P. तड् इति यथा स्यात् । ३. G. मिच्छण । ४. N. P. दूरु । ५. P. गणेंति ।

**[ कान्तस्याऽत उं स्यमोः ]** कान्त षष्ठी ङस् । अत् षष्ठी ङस् । उं प्रथमा सि । स्यम् षष्ठी ओस् ।

**[ अन्नु जु तुच्छउं तहे धणहे.... ]** पूर्वलिखितो दूहकः ।

तुच्छक । प्रथमा सि । अनेन कस्य कुं । 'क-ग-च-ज०' (१।१७७) क्लुक् **तुच्छउं** ।

**[ भग्गउं देक्खिवि निअय-बलु.......... ]**

अस्य दूहकस्य अर्थः- हे सखीति गम्यते । हे सखि ! यथा द्वितीयादितिथौ शशिरेखा-चन्द्ररेखा प्रकटीभवति तथा प्रियस्य करे करवालं-खड्गं उन्मील्यते - प्रकटीभवति । किंकृत्वा ? निजकं बलं भग्नं दृष्ट्वा परस्य तु बलं प्रसृतकं दृष्ट्वेत्यर्थः ।

**[ भग्गउं ]** भग्नक । द्वितीया अम् । अनेन कस्य कुं । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् **भग्गउं** ॥३५४॥

## सर्वादेर्ङसेर्हां ॥ ८।४।३५५ ॥

अपभ्रंशे सर्वादेरकारान्तात् परस्य ङसेः हां इत्यादेशो भवति ॥

**जहां** होंतउ आगदो ॥ **तहां** होंतउ आगदो ॥ **कहां** होंतउ आगदो ॥

**[ सर्वादेर्ङसेर्हां ]** सर्वादि पञ्चमी ङसि । ङसि षष्ठी ङस् । हां प्रथमा सि ।

**[ जहां होंतउ आगदो ]** यतो भवान् आगतः ॥ यद् । पञ्चमी ङसि । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । 'आदेर्यो जः' (१।२४५) य० → ज० । अनेन ङसि० → हां० **जहां** ।

**[ तहां होंतउ आगदो ]** ततो भवान् आगतः ॥ तद् । पञ्चमी ङसि । 'अन्त्यव्यञ्जनस्य' (१।११) द्लुक् । अनेन ङसि० → हां० **तहां** ।

**[ कहां होंतउ आगदो ]** कुतो भवान् आगतः ॥ किम् । पञ्चमी ङसि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन ङसि० → हां० **कहां** ॥३५५॥

## किमो डिहे वा ॥ ८।४।३५६ ॥

अपभ्रंशे किमोऽकारान्तात् परस्य ङसेर्डिहे इत्यादेशो वा भवति ॥

जइ तहो तुट्टउ[1] नेहडा मइं सहुं न वि तिल-तार ! ।
तं **किहे** वंकि(के)हिं लोअणेहिं जोइज्जउं सय-वार ॥१॥

**[ किमो डिहे वा ]** किम् पञ्चमी ङसि । डिहे प्रथमा सि । वा प्रथमा सि ।

**[ जइ तहो तुट्टउ नेहडा............ ]**

अस्यार्थः - हे तिल-तार ! तिलवत् स्निग्धा तारा-कनीनिका यस्य स, तस्य सम्बोधनम् । यदि[2] तव स्नेहो मया सह नापि त्रुटितस्तत्कथमहं त्वया वक्राभ्यां लोचनाभ्यां शत-वारं विलोक्ये इत्यर्थः ॥

**[ किहे ]** किम् । पञ्चमी ङसि । अनेन ङसि० → डिहे० → इहे० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । 'लोकात्' (१।१।३) **किहे** ॥३५६॥

---

१. I. तुट्टिउ । २. N. यदि तस्याः स्नेहः त्रुटितः, यदि मया सह तिल-तारा (?) अपि न, (तर्हि) कस्मात् (अहम्) (तस्याः) वक्राभ्यां लोचनाभ्यां शतवारं दृश्ये ? ।

## ङेर्हिं ॥ ८।४।३५७ ॥

अपभ्रंशे सर्वादेरकारान्तात् परस्य ङेः सप्तम्येकवचनस्य हिं इत्यादेशो भवति ॥

**जहिं** कप्पिज्जइ सरेण सरु छिज्जइ खग्गेण खग्गु ।
**तहिं** तेहइ भंड[१]-घड-निवहि कंतु पयासइ मग्गु ॥१॥

**एक्कहिं अक्खिहिं** सावणु **अन्नहिं** भद्दवउ,
माहउ महिअल-सत्थरि गंड-त्थलि सरउ ।

अंगिहिं गिम्हु सुहच्छी-तिल-वणि मग्गसिरु,
तहे मुद्धहे मुह-पंकइ आवासिउ सिसिरु ॥२॥ युग्मम् ॥

हिअडा ! फुट्टि तड - त्ति करि कालक्खेवें काइं ।
देक्खउं हय-विहि **कहिं** ठवइ पइं विणु दुक्ख-सयाइं ॥३॥

[ **ङेर्हिं** ] ङि षष्ठी ङस् । हिं प्रथमा सि ।

**[ जहिं कप्पिज्जइ सरेण...... ]**

अस्यार्थः- यस्मिन् शरेण शरः कृत्यते-कल्प्यते, यस्मिन् खड्गेन खड्गः छिद्यते, तस्मिन् - तादृशे भट-घटा-निवहे कान्तो मार्गः(र्गं) प्रकाशयतीत्यर्थः ।

[ **जहिं** ] यद् । सप्तमी ङि । 'आदेर्यो जः' (१।२४५) यस्य जः । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन ङि० → हिं० **जहिं** ।

[ **तहिं** ] तद् । सप्तमी ङि । 'अन्त्यव्य०' (१।११) द्लुक् । अनेन ङि० → हिं० **तहिं** ।

**[ एक्कहिं अक्खिहिं सावणु........... ]**

अनयोरर्थः - तस्या मुग्धाया एकस्मिन् अक्ष्णि श्रावणः । अन्यस्मिन् अक्ष्णि भाद्रपदः । को भावः ? यथा एतौ द्वौ मासौ श्रावण-भाद्रपदौ तथा अक्षिद्वयमप्यश्रुजलश्रावित्वात् मासद्वयतुल्यं । महीतलस्रस्तरे माधवो वसन्तः पल्लवमयत्वात् । गण्डस्थले शरत् तस्याः काम(श)कुसुमादिना पाण्डुत्वात् । अङ्गेषु ग्रीष्मः तापबहुलत्वात् । सुखासिका-तिलवने मार्गशीर्षः । यथा मार्गशीर्षे तिलवनानामुच्छेदः स्यात् तथा सुखावस्थानस्योच्छेदः । मुखपङ्कजे शिशिरः आवासितः । यथा शिशिरे पङ्कजानां म्लानत्वं तथा मुखपङ्कजस्यापि स्त्रीणां वियोगावस्थायामेतानि चिह्नानि स्युः तेनेत्युक्तम् ।

[ **एक्कहिं** ] एक । सप्तमी ङि । अनेन ङि० → हिं० । 'सेवादौ वा' (२।९९) क० → क्क० **एक्कहिं** ।

[ **अक्खिहिं** ] अक्षि । सप्तमी ङि । 'क्षः खः क्वचित्तु छ-झौ' (२।३) क्षस्य खः । 'अनादौ०' (२।८९) खस्य द्वित्वम् । 'द्वितीय-तुर्ययो०' (२।९०) पूर्वखस्य कः । अनेन ङि० → हिं० **अक्खिहिं** ।

[ **अन्नहिं** ] अन्यत् । सप्तमी ङि । 'अधो म-न-याम्' (२।७८) यलुक् । 'अनादौ०' (२।८९) नस्य द्वित्वम् । 'अन्त्यव्य०' (१।११) त्लुक् । अनेन ङि० → हिं० **अन्नहिं** ।

**[ हिअडा ! फुट्टि तड-त्ति......... ]**

---

१. P. भड = भटानां, घडनिवहि = वृक्षमूलसमूहे ।

अस्यार्थः- हे हृदय ! त्वं त्रट् इति कृत्वा स्फुट । कालक्षेपेण-कालविलम्बेन किम् ? । अहं पश्यामि हतविधिस्त्वया विना दुःखशतानि कुत्र स्थापयतीत्यर्थः ।

**[ कहिं ]** किम् । सप्तमी ङि । 'किमः कस्त्र-तसोश्च' (३।७१) किम्० → क० । अनेन ङि० → हिं० **कहिं** ॥३५७॥

## यत्तत्किम्भ्यो ङसो डासुर्नवा ॥ ८।४।३५८ ॥

अपभ्रंशे यत्तत्किम् इत्येतेभ्योऽकारान्तेभ्यः परस्य ङसो डासु इत्यादेशो वा भवति ॥

कंतु महारउ हलि ! सहिए ! निच्छइं(एं) रूसइ **जासु** ।

अंत्थेहिं सत्थेहिं हत्थेहिं वि ठाउ वि फेडइ **तासु** ॥१॥

जीविउ **कासु** न वल्लहउं धणु पुणु **कासु** न इट्ठु ।

दोण्णि वि अवसरि निवडिअइ तिण-सम गणइ विसिट्ठु ॥२॥

**[ यत्तत्किम्भ्यो ङसो डासुर्नवा ]** यद्-तद्-किम् पञ्चमी भ्यस् । ङस् षष्ठी ङस् । डासु प्रथमा सि । नवा प्रथमा सि ।

**[ कंतु महारउ हलि ! सहिए !................ ]**

अस्यार्थः- हे हले ! हे सखिके ! मदीयः कान्तो निश्चयेन यस्य रुष्यति तस्य स्थानं स्फेटयति । कैः ? अंस्त्रैः शस्त्रैः हस्तैरपि ।

**[ जासु ]** यद् । षष्ठी ङस् । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन ङस्० → डासु० → आसु० इति । 'डित्यन्त्य०' (२।१।११४) अद्लुक् । 'लोकात्' (१।१।३) **जासु** ।

**[ तासु ]** तद् । षष्ठी ङस् । अनेन ङस्० → डासु० → आसु० इति । 'डित्यन्त्य०' (२।१।११४) अद्लुक् । 'लोकात्' (१।१।३) **तासु** ।

**[ जीविउ कासु न वल्लहउं.............. ]**

अस्यार्थः- जीवितं कस्य वल्लभं न स्यात् ? । धनं पुनः कस्येष्टं न स्यात् ? । विशिष्टो मनुजोऽवसरे निपतिते द्वेऽपि जीवित-धने तृण-समे गणयतीत्यर्थः ।

**[ कासु ]** किम् । षष्ठी ङस् । अनेन ङस्० → डासु० → आसु० इति । 'डित्यन्त्य०' (२।१।११४) इम्लोपः । 'लोकात्' (१।१।३) **कासु** ॥३५८॥

## स्त्रियां डहे ॥ ८।४।३५९ ॥

अपभ्रंशे स्त्रीलिङ्गे वर्तमानेभ्यो यत्तत्किम्भ्यः परस्य ङसो डहे इत्यादेशो वा भवति ॥

**जहे** केरउ ॥ **तहे** केरउ ॥ **कहे** केरउ ॥

**[ स्त्रियां डहे ]** स्त्री सप्तमी ङि । डहे प्रथमा सि ।

**[ जहे केरउ ]** यद् । षष्ठी ङस् । 'आदेर्यो जः' (१।२४५) यस्य जः । अनेन ङस्० → डहे० → अहे० इति । 'डित्यन्त्य०' (२।१।११४) अद्लोपः । 'लोकात्' (१।१।३) **जहे** । सम्बन्धिन् । शीघ्रादित्वात् केर इति । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । 'स्वराणां स्वराः प्रायोऽपभ्रंशे' (४।३२९) अ० → उ० **केरउ** । यस्याः सम्बन्धी इत्यर्थः ।

---

१. H. M. N. अत्थिहिं सत्थिहिं हत्थिहिं । I. अत्थिहि सत्थिहि हत्थिहि । २. I. अस्त्रैः-अर्थैः, शस्त्रैः-शास्त्रैः, हस्तैः-हस्तिभिः । P. अर्थैः-द्रव्यैः ।

**[ तहे केरउ ]** तद् । षष्ठी ङस् । अनेन ङस्० → डहे० → अहे० इति । 'डित्यन्त्य०' (२।१।११४) अद्लोपः । 'लोकात्' (१।१।३) **तहे** । सम्बन्धिन् । शीघ्रादित्वात् केर इति । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । 'स्वराणां स्वराः प्रायोऽपभ्रंशे' (४।३२९) अ० → उ० **केरउ** । तस्याः सम्बन्धी इत्यर्थः ।

**[ कहे केरउ ]** किम् । षष्ठी ङस् । अनेन ङस्० → डहे० → अहे० इति । 'डित्यन्त्य०' (२।१।११४) इम्लोपः । 'लोकात्' (१।१।३) **कहे** । सम्बन्धिन् । शीघ्रादित्वात् केर इति । 'अ-डड-डुल्लाः०' (४।४२९) अप्र० । 'स्वराणां स्वराः०' (४।३२९) अ० → उ० **केरउ** । कस्याः सम्बन्धी इत्यर्थः ॥३५९॥

## यत्तदः स्यमोर्ध्रुं-त्रं ॥ ८।४।३६० ॥

अपभ्रंशे यत्तदोः स्थाने स्यमोः परयोर्यथासंख्यं ध्रुं - त्रं इत्यादेशौ वा भवतः ॥

प्रङ्गणि चिट्ठदि नाहु **ध्रुं-त्रं** रणि करदि न भ्रंति ॥१॥

पक्षे- तं बोल्लिअइ जु निव्वहइ ॥२॥

**[ यत्तदः स्यमोर्ध्रुं-त्रं ]** यत्तद् षष्ठी ङस् । स्यम् षष्ठी ओस् । ध्रुं-त्रं प्रथमा सि ।

**[ प्रङ्गणि चिट्ठदि नाहु ध्रुं-त्रं रणि करदि न भ्रंति ]** ॥ द्विपदी ॥

अस्यार्थः- यद्-यस्मान्नाथः प्राङ्गणे तिष्ठति तदहमेवं जानामीति शेषः । नाथो रणे न भ्रान्तिः । संदेहनं करोतीत्यर्थः ।

**[ ध्रुं-त्रं ]** यद्-तद् । प्रथमा सि - द्वितीया अम् । अनेन यथासंख्यं यत्तत्स्थाने ध्रुं-त्रं । 'स्यम्-जस्०' (४।३४४) सि-अम्लुक् **ध्रुं-त्रं** ।

**[ तं बोल्लिअइ जु निव्वहइ ]** अस्यार्थः- तद् जल्प्यते यन्निर्वहति ।

**[ तं ]** तद् । द्वितीया अम् । 'अमोऽस्य' (३।५) अलुक् । 'अन्त्यव्य०' (१।११) द्लुक् । 'मोऽनु०' (१।२३) अनुस्वारः **तं** ।

**[ जु ]** यद् । प्रथमा सि । 'अन्त्य०' (१।११) द्लुक् । 'स्यमोरस्योत्' (४।३३१) य० → यु० । 'आदेयो जः' (१।२४५) यु० → जु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **जु** ॥३६०॥

## इदम इमुः क्लीबे ॥ ८।४।३६१ ॥

अपभ्रंशे नपुंसकलिङ्गे वर्तमानस्येदमः स्यमोः परयोः इमु इत्यादेशो भवति ॥

**इमु** कुलु तुह तणउं । **इमु** कुलु देक्खु ॥

**[ इदम इमुः क्लीबे ]** इदम् षष्ठी ङस् । इमु प्रथमा सि । क्लीब सप्तमी ङि ।

**[ इमु कुलु तुह तणउं ]** इदं कुलं तव सम्बन्धी इत्यर्थः ।

**[ इमु ]** इदम् । प्रथमा सि । अनेन इदम्० → इमु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **इमु** ।

**[ इमु कुलु देक्खु ]** इदं कुलं पश्य ।

**[ इमु ]** इदम् । द्वितीया अम् । अनेन इदम्० → इमु० । 'स्यस्-जस्-शसां लुक्' (४।३४४) अम्लुक् **इमु** ॥३६१॥

## एतदः स्त्री-पुं-क्लीबे एह एहो एहु ॥ ८।४।३६२ ॥

अपभ्रंशे स्त्रियां पुंसि नपुंसके वर्तमानस्यैतदः स्थाने स्यमोः परयोर्यथासंख्यं एह-एहो-एहु इत्यादेशा भवन्ति ॥

**एह** कुमारी **एहो** नरु **एहु** मणोरह-ठाणु ।
एहउं वढ ! चिंतंताहं पच्छइ होइ विहाणु ॥१॥

**[ एतदः स्त्री-पुं-क्लीबे ]** एतद् षष्ठी ङस् । स्त्री-पुं-क्लीब सप्तमी ङि ।

**[ एह-एहो-एहु ]** एह-एहो-एहु प्रथमा सि ।

**[ एह कुमारी ]** एषा कुमारी ।

**[ एहो नरु ]** एषो नरः ।

**[ एहु मणोरह-ठाणु ]** एतन्मनोरथस्थानम् ।

**[ एहउं वढ ! चिंतंताहं पच्छइ होइ विहाणु ]** ईदृशं चिन्तयतां वढानां-मूर्खाणां पश्चाद्विभातं भवतीत्यर्थः ।

**[ एह-एहो-एहु ]** एतद् । प्रथमा सि -द्वि० अम् । अनेन एतद्० → एह-एहो-एहु० त्रय आदेशाः । 'स्यम्-जस्-शसां लुक्' (४।३४४) सि-अम्लुक् **एह-एहो-एहु** ॥३६२॥

## एइर्जस्-शसोः ॥ ८।४।३६३ ॥

अपभ्रंशे एतदो जस्-शसोः परयोः एइ इत्यादेशो भवति ॥

**एइ** ति घोडा एह थलि० [४।३३०-४] ॥१॥ **एइ** पेच्छ ॥२॥

**[ एइर्जस्-शसोः ]** एइ प्रथमा सि । जस्-शस् सप्तमी ओस् ।

**[ एइ ति घोडा एह थलि........ ]** पूर्वं लिखितम् । [४।३३०-४] ।

**[ एइ पेच्छ ]** एतद् । द्वितीया शस् । अनेन एतद्० → एइ० । 'स्यम्-जस्०' (४।३४४) शस्लुक् **एइ पेच्छ** ॥३६३॥

## अदस ओइ ॥ ८।४।३६४ ॥

अपभ्रंशे अदसः स्थाने जस्-शसोः परयोः ओइ इत्यादेशो भवति ॥

जइ[1] पुच्छह घर वड्डाइं तो वड्डा घर ओइ ।
विहलिअ-जण-अब्भुद्धरणु कंतु कुडीरइ जोइ ॥१॥

अमूनि वर्तन्ते पृच्छ वा ॥

**[ अदस ओइ ]** अदस् षष्ठी ङस् । ओइ प्रथमा सि ।

**[ जइ पुच्छह घर वड्डाइं.......... ]**

---

१. C. पोट्टं भरन्ति सउणा वि माउआ अप्पणो अणुव्विग्गा । विहलुद्धरणसहावा हुवन्ति जइ के वि सप्पुरिसा ॥ [गा० स०-३।८५] उदरं भरन्ति शकुना अपि हे मातरात्मनोऽनुद्विग्नाः । विह्वलोद्धरणस्वभावा भवन्ति यदि केऽपि सत्पुरुषाः ॥

२. P. पृच्छथ ।

अस्यार्थः - काचित् स्त्री पथिकं प्रत्याह-यद् बृहंति गृंहाणि पृच्छत, ततो बृहंति अमूनि प्रत्यक्षोपलक्षमाणानि वर्तन्ते । अथवा दानाद्यभिलाषीति शेषः । तदा कुटीरके विह्वलितजनाभ्युद्धरणं पीडितजनाभ्युद्धरणं कान्तं पश्य इत्यर्थः ।

**[ ओइ ]** अदस् । प्रथमा जस् - द्वितीया शस् वा । अनेन अदस्० → ओइ० । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्-शसोर्लुक् **ओइ** ॥३६४॥

## इदम आयः ॥ ८।४।३६५ ॥

अपभ्रंशे इदम्शब्दस्य स्यादौ आय इत्यादेशो भवति ॥

**आयइं**[१] लोअहो लोअणइं जाई(इं) सरइं न भंति ।
अप्पिए दिट्ठइ मउलिअहिं पिए दिट्ठइ विहसंति ॥१॥

सोसउ म सोसउ च्चिअ उसही वडवानलस्स किं तेण ? ।
जं जलइ जले जलणो **आएण** वि किं न पज्जत्तं ? ॥२॥

**आयहो**[२] दड्ढ-कलेवरहो जं वाहिउ तं सारु ।
जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ॥३॥

**[ इदम आयः ]** इदम् षष्ठी ङस् । आय प्रथमा सि ।

**[ आयइं लोअहो लोअणइं.......... ]**

अस्यार्थः- [३]लोकस्य इमानि लोचनानि जातिं स्मरन्ति न भ्रान्तिर्न संदेहः । अप्रिये दृष्टे सति मुकुलन्ति । प्रिये दृष्टे सति विकसन्तीत्यर्थः ।

**[ आयइं ]** इदम् । प्रथमा जस् । अनेन इदम्० → आय० । 'जस्-शस इँ-इं-णयः सप्रा०' (३।२६) जस्० → इं० **आयइं** ।

**[ सोसउ म सोसउ च्चिअ........... ]**

अस्यार्थः- च्चिअेति निश्चये । उदधिः शुष्यतु मा शुष्यतु वा । तेन समुद्रशोषणेन वा वडवानलस्य किम् ? । यदिति क्रियाविशेषणम् । यज्जले ज्वलनो ज्वलति अनेन ज्वलनेन तस्य वडवानलस्य किं न पर्याप्तं ? - किं न सृतमित्यर्थः ।

**[ आएण ]** इदम् । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । अनेन इदम्० → आय० । 'टाण-शस्येत्' (३।१४) य० → ये० । 'क-ग-च-ज०' (१।१७७) य्लुक् **आएण** ।

**[ आयहो दड्ढ-कलेवरहो........... ]**

---

१. नयणाइं नूण जाईसराइं वियसंति वल्लहं दट्ठुं । कमला इव रवि-कर-बोहियाइं मउलेंति इयरम्मि ॥ [जु० जि० च० पद्य-३३]
जाईसराइं मन्ने इमाइं नयणाइं होंति लोयस्स । वियसंति पिए दिट्ठे अव्वो मउलंति वेसम्मि ॥ [गा० र०]
अइपसण्णु मुहु होइ संभासणु पडिवज्जइ । पुव्वभवंतरणेहु जणदिट्ठिएँ जाणिज्जइ ॥
[म० पु० भागः-१, सन्धिः-९, विभागः-५, पङ्क्तिः- १३-१४]
२. बलि किउ माणुस-जम्मडा देक्खंतहं पर सारु । जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ॥ [प० प्र० - २।१४७]
बलिः क्रियते मनुष्यजन्म पश्यतां परं सारम् । यदि अवष्टम्भते ततः कुथ(थ्य)ति अथ दह्यते तर्हि क्षारः ॥
३. । इमानि लोकाः ! लोचनानि जातिस्मराणि न भ्रान्तिः । अप्रिये दृष्टके मुकुलयन्ति प्रिये दृष्टके विहसन्ति ॥

अस्यार्थः- अस्य दग्धकलेवरस्य यद्वाहितं तदेव सारम् । मरणानन्तरमिति शेषः । यदि आच्छाद्यते-स्थाप्यते ततः कुथ्यति । अथ दह्यते ततः क्षारो भस्म स्यादित्यर्थः ।

**[ आयहो ]** इदम् । षष्ठी ङस् । अनेन इदम्० → आय० । 'ङसः सु-हो-स्सवः' (४।३३८) ङस्० → हो० **आयहो** ॥३६५॥

### सर्वस्य साहो वा ॥ ८।४।३६६ ॥

अपभ्रंशे सर्वशब्दस्य साह इत्यादेशो वा भवति ॥

**साहु** वि लोउ तडप्फडइ वड्डत्तणहो तणेण ।
वड्डप्पणु पर पाविअइ हत्थें मोक्कलडेण ॥१॥ पक्षे-**सव्वु** वि ॥

**[ सर्वस्य साहो वा ]** सर्व षष्ठी ङस् । साह प्रथमा सि । वा प्रथमा सि ।

**[ साहु वि लोउ तडप्फडइ................ ]**

अस्यार्थः- सर्वोऽपि लोक उत्ताम्यति - आकुलीभवति । किमर्थम् ? बृहत्त्वस्याऽर्थे । परं बृहत्त्वं हस्तेन मुत्कलेन - मुक्तेन प्राप्यते इत्यर्थः । को भावः ? जनैर्महत्त्वं तदा प्राप्यते यदा दानादिगुणाः स्युरिति भावः ।

**[ साहु ]** सर्व । प्रथमा सि । अनेन सर्वस्य साह० । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमोर०' (४।३३१)) ह० → हु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **साहु** पक्षे-

**[ सव्वु ]** सर्व । प्रथमा सि । 'सर्वत्र ल०' (२।७९) र्लुक् । 'अनादौ०' (२।८९) द्वित्वं-व० → व्व० । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमो०' (४।३३१)) व्व० → व्वु० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **सव्वु** ॥३६६॥

### किमः काइं-कवणौ वा ॥ ८।४।३६७ ॥

अपभ्रंशे किमः स्थाने काइं - कवण इत्यादेशौ वा भवतः ॥

जइ[४] न सु आवइ दूइ[५] ! घरु **काइं** अहोमुहु तुज्झु ? ।
वयणु जु खंडइ तउ सहिए ! सो पिउ होइ न मज्झु ॥१॥

**काइं** न दूरे देक्खइ ॥२॥ [४।३४९-१]

फोडेंति जे हियडउं अप्पणउं ताहं पराई **कवण** घण ? ॥३॥ [४।३५०-२] ।

सुपुरिस कंगुहे अणुहरहिं भण कज्जें **कवणेण** ।
जिवँ जिवँ वड्डत्तणु लहहिं तिवँ तिवँ नवहिँ सिरेण ॥४॥

---

१. I. N. उत्तभ्नाति ।
२. सयलु वि को वि तडप्फडइ सिद्धत्तणहु तणेण । सिद्धत्तणु परिपाविअइ चित्तहं णिम्मलएण ॥ [दोहापाहुड - ८८]
३. I. J. N. प्रस्पन्दते ।
४. जइ सो न एइ गेहं ता दूइ अहोमुही तुमं कीस । सो होही मज्झ पिओ जो तुज्झ न खंडए वयणं ॥
[व० ल० - दूईवज्जा-४१७।५]
यदि स नैति गेहं तद् दूति अधोमुखी त्वं कस्मात् । स भविष्यति मम प्रियो यस्तव न खण्डयति वचनं (वदनम्) ॥
५. P. दूरु - दूरम् ।

पक्षे-

जइ ससणेही तो मुइअ अह जीवइ निन्नेह ।
बिहिं वि पयारेहिं गइअ धण **किं** गज्जहि खल ! मेह ! ॥५॥

**[ किमः काइं-कवणौ वा ]** किम् षष्ठी ङस् । काइं-कवण प्रथमा औ । वा प्रथमा सि ।

**[ जइ न सु आवइ दूइ ! ........... ]**

अस्यार्थः- हे दूति ! सः यदि गृहं नायाति-नागच्छति तर्हि तव अधोमुखं कथम् ? । हे सखिके ! यस्तव वचनं खण्डयति सो मम प्रियो न भवतीत्यर्थः ।

**[ काइं ]** किम् । प्रथमा सि । अनेन किम्० → काइं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **काइं** ।

**[ काइं न दूरे देक्खइ ]** पूर्वं लिखितम् । [४।३४९-१]

**[ फोडेंति जे हियडउं............ ]** पूर्वं लिखितम् । [४।३५०-२]

**[ कवण ]** किम् । प्रथमा सिं । अनेन किम्० → **कवण०** ।

**[ सुपुरिस कंगुहे अणुहरहिं.................. ]**

अस्यार्थः- सुपुरुषाः कङ्गोर्धान्यस्य अनुहरन्ते-सदृशा भवन्ति । भण कथय । केन कार्येण ? उच्यते - यथा यथा वृद्धत्वं लभन्ते तथा तथा शिरसा नमन्तीत्यर्थः ।

**[ कवणेण ]** किम् । तृतीया टा । अनेन किम्० → कवण० । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ण० → णे० **कवणेण** ।

**[ जइ ससणेही तो मुइअ............ ]**

कस्याश्चिद् भर्ता देशान्तरं गतोऽस्ति, स मेघं प्रत्याह-सा स्त्री यदि सस्नेहा भविष्यति तर्हि मृता भविष्यति, मम विरहात्। अथ जीवति तदा निःस्नेहा । सस्नेह-निःस्नेहलक्षणप्रकाराभ्यां प्रिया गता । तर्हि हे खल ! हे दुर्जनमेघ ! त्वं किं गर्जसीत्यर्थः ।

**[ किं ]** किम् । प्रथमा सि । 'अन्त्यव्य०' (१।११) सिलुक् । 'मोऽनु०' (१।२३) अनुस्वारः **किं** ॥३६७॥

## युष्मदः सौ तुहुं ॥ ८।४।३६८ ॥

अपभ्रंशे युष्मदः सौ परे तुहुं इत्यादेशो भवति ॥

[१]भमर ! म रुणझुणि रण्णडइ सा दिसि जोइ म रोइ ।
सा मालइ देसंतरिअ जसु **तुहुं** [२]मरहि विओइ ॥१॥

**[ युष्मदः सौ तुहुं ]** युष्मद् षष्ठी ङस् । सि सप्तमी ङि । तुहुं प्रथमा सि ।

---

१. मालइविरहे रे तरुणभसल ! मा रुवसु निब्भरुक्कंठं । वल्लहविओयदुक्खं मरणेण विणा न वीसरइ ॥
[व० ल० - इंदिंदिरवज्जा-२४१-६]
मालतीविरहे रे तरुणभ्रमर ! मा रोदीर्निर्भरोत्कण्ठनम् । वल्लभवियोगदुःखं मरणेन विना न विस्मर्यते ॥
२. P. मरइ ।

**[ भमर ! म रुणझुणि रण्णडइ........... ]**

अस्यार्थः- हे भ्रमर ! त्वमरण्ये म रुणु -मा रुणझुणि - शब्दं मा कुरु । तां दिशं विलोक्य मा रुदिहि । पुनः सा मालती देशान्तरिता, यस्याः वियोगे त्वं म्रियसे इत्यर्थः ।

**[ तुहुं ]** युष्मद् । प्रथमा सि । अनेन युष्मद्० → तुहुं० । 'स्यम्-जस्०' (४।३४४) सिलुक् **तुहुं** ॥३६८॥

## जस्-शसोस्तुम्हे-तुम्हइं ॥ ८।४।३६९ ॥

अपभ्रंशे युष्मदो जसि शसि च प्रत्येकं तुम्हे तुम्हइं इत्यादेशौ भवतः ॥

**तुम्हे तुम्हइं** जाणह ॥ **तुम्हे तुम्हइं** पेच्छह ॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥

**[ जस्-शसोस्तुम्हे-तुम्हइं ]** जस्-शस् षष्ठी ओस् । तुम्हे-तुम्हइं प्रथमा सि ।

**[ तुम्हे तुम्हइं जाणह ]** यूयं जानीथ । युष्मद् । प्रथमा जस् । अनेन युष्मद्० → तुम्हे० → तुम्हइं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् **तुम्हे तुम्हइं** ।

**[ तुम्हे तुम्हइं पेच्छह[१] ]** युष्मद् । द्वितीया शस् । अनेन युष्मद्० → तुम्हे० → तुम्हइं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) शस्लुक् **तुम्हे तुम्हइं** ॥३६९॥

## टा-ङ्यमा पइं - तइं ॥ ८।४।३७० ॥

अपभ्रंशे युष्मदः टा-ङि-अम् इत्येतैः सह पइं-तइं इत्यादेशौ भवतः ॥

॥ टा ॥ **पइं** मुक्काहं वि वर-तरु ! फिट्टइ पत्तत्तणं न पत्ताणं ।
तुह पुणु छाया जइ होज्ज कह वि ता तेहिं पत्तेहिं ॥१॥

महु[२] हिअउं **तइं** ताएँ तुहुं स वि अन्नें विनडिज्जइ[३] ।
पिअ ! काइं करउं हउं काइं तुहुं मच्छें मच्छु गिलिज्जइ ॥२॥

॥ ङिना ॥ **पइं** मइं बेहिं वि रण-गयहिं को जयसिरि तक्केइ ? ।
केसहिं लेप्पिणु जम-घरिणि भण सुहु को थक्केइ ? ॥३॥

एवं तइं ॥

॥ अमा ॥ **पइं** मेल्लंतिहे महु मरणु मइं मेल्लंतहो तुज्झु ।
सारस[४] ! जसु जो वेग्गला सो वि कृदंतहो सज्झु ॥४॥

एवं तइं ॥

**[ टा-ङ्यमा पइं - तइं ]** टा-ङि-अम् तृतीया टा । पइं - तइं प्रथमा सि ।

**[ पइं मुक्काहं वि वर-तरु !........... ]**

---

१. सर्वमुद्रितेषु पेच्छइ ।
२. सा तुज्झ वल्लहा तं सि मज्झ वेसो सि तीअ तुज्झ अहं । बालअ ! फुडं भणामो पेम्मं किल बहुविआरं त्ति ॥ [गा० स० - २।२६]
३. P. वि नडिज्जइ-अपि पीड्यते । ४. P. सारसु-सालसः । सह आलसेन विद्यते यः सः ।
सा तव वल्लभा त्वमसि मम द्वेष्योऽसि तस्यास्तवाहम् । बालक ! स्फुटं भणामः प्रेम किल बहुविकारमिति ॥

अस्यार्थः- हे[१] वरतरो ! त्वया मुक्तानामपि पत्राणां पत्रत्वं न विनश्यति । तव पुनश्छाया कथमपि यदि भवेत् ततः - तर्हि तैः पत्रैरेव नान्यथेत्यर्थः ।

**[ पइं ]** युष्मद् । तृतीया टा । अनेन टा-सह युष्मद्० → **पइं**० ।

**[ महु हिअउं तइं ताएँ............. ]**

अस्यार्थः- काचिन्नायिका अन्यासक्तं पतिं वक्ति-हे प्रिय ! मम हृदयं त्वया गृहीतमिति शेषः । तया त्वं गृहीतः । [२]सापि अन्येन विभिद्यते । हे प्रिय ! अहं किं करोमि ? त्वं किं करोषि ? मत्स्येन मत्स्यो गिल्यते इत्यर्थः ।

**[ तइं ]** युष्मद् । तृतीया टा । अनेन टा-सह युष्मद्० → **तइं**० ।

**[ पइं मइं बेहिं वि रण-गयहिं.................. ]**

अस्यार्थः- त्वयि मयि द्वयोरपि रणगतयोः को जयश्रियं तर्कयति अभिलषति ? को यमगृहिणीं केशैर्गृहीत्वा सुखं यथा स्यात्तथा तिष्ठति ? त्वं भण-कथय इत्यर्थः ।

**[ पइं ]** युष्मद् । सप्तमी ङि । अनेन ङिना सह युष्मद्० → **पइं**० ।

**[ पइं मेल्लंतिहे महु मरणु............. ]**

अस्यार्थः- स्त्री कथयति । त्वां मुञ्चत्या मम मरणं, मां मुञ्चतस्तव मरणम् । दृष्टान्तः- यथा सारसः पक्षी । यस्य यो दूरे सोऽपि कृतान्तस्य साध्यो भवति - मरणं प्राप्नोतीत्यर्थः ।

**[ पइं ]** युष्मद् । द्वितीया अम् । अनेन अमा सह युष्मद्० → **पइं**० ॥३७०॥

## भिसा तुम्हेहिं ॥ ८।४।३७१ ॥

अपभ्रंशे युष्मदो भिसा सह तुम्हेहिं इत्यादेशो भवति ॥

**तुम्हेहिं** अम्हेहिं जं किअउं दिट्ठउं बहुअ-जणेण ।
तं तेवड्डउ समर-भरु निज्जिउ एक्क-खणेण ॥१॥

**[ भिसा तुम्हेहिं ]** भिस् तृतीया टा । तुम्हेहिं प्रथमा सि ।

**[ तुम्हेहिं अम्हेहिं जं किअउं.................... ]**

अस्यार्थः- युष्माभिरस्माभिर्यत् कृतं तद् बहुकजनेन दृष्टम् । यत् किं कृतं ? तदाह - तत्तावन्मानः(त्र) समरभरः एकक्षणेन निर्जित इत्यर्थः ।

**[ तुम्हेहिं ]** युष्मद् । तृतीया भिस् । अनेन भिसा सह युष्मद्० → **तुम्हेहिं**० ॥३७१॥

## ङसि-ङस्भ्यां तउ-तुज्झु-तुध्र ॥ ८।४।३७२ ॥

अपभ्रंशे युष्मदो ङसि-ङस्भ्यां सह तउ-तुज्झु-तुध्र इत्येते त्रय आदेशा भवन्ति ॥

ङसिना-**तउ** होंतउ आगदो । **तुज्झु** होंतउ आगदो । **तुध्र** होंतउ आगदो ॥

---

१. H. P. "विवरतरु" वयो विहङ्गमास्तैर्वरः विवरः, एवंविधो वृक्षः, तस्य सम्बोधने हे विवरतरो ! अथवा हे वरतरो ! ।
२. H. साऽप्यन्येनापि नट्यते । M. साप्यन्येन विनाट्यते । N. साप्यन्येन व्याकुलीक्रियते ।

ङसा - **तउ** गुण-संपइ **तुज्झु** मदि **तुध्र** अणुत्तर खंति ।
जइ उप्पत्ति अन्न जण महि-मण्डलि सिक्खंति ॥१॥

**[ ङसि-ङस्भ्यां तउ-तुज्झु-तुध्र ]** ङसि-ङस् तृतीया भ्याम् । तउ-तुज्झु-तुध्र प्रथमा सि ।

**[ तउ होंतउ आगदो । तुज्झु होंतउ आगदो । तुध्र होंतउ आगदो ]** युष्मद् ३ । पञ्चमी ङसि । अनेन ङसिना सह युष्मद्० → **तउ-तुज्झु-तुध्र**० । त्वत्-त्वत्तो भवान् आगतः ।

**[ तउ गुण-संपइ तुज्झु.................. ]**

अस्यार्थः- महीमण्डले अन्ये जना यदि उपेत्य-तव पार्श्वे समागत्य तव गुणसंपदं शिक्षयन्ति । तव मतिं शिक्षयन्ति। तव अनुत्तरां क्षान्तिं शिक्षयन्ति तदा वरमिति गम्यते इत्यर्थः ।

युष्मद् ३ । षष्ठी ङस् । अनेन ङसा सह युष्मद्० → **तउ-तुज्झु-तुध्र**० ॥३७२॥

**भ्यसाम्भ्यां तुम्हहं ॥ ८।४।३७३ ॥**

अपभ्रंशे युष्मदो भ्यस्-आम् इत्येताभ्यां सह तुम्हहं इत्यादेशो भवति ॥

**तुम्हहं** होंतउ आगदो । **तुम्हहं** केरउं धणु ॥

**[ भ्यसाम्भ्यां तुम्हहं ]** भ्यस्-आम् तृतीया भ्याम् । तुम्हहं प्रथमा सि ।

**[ तुम्हहं होंतउ आगदो ]** युष्मद् । भ्यस्प्र० । अनेन भ्यसा सह युष्मद्० → **तुम्हहं**० । युष्मत् - युष्मभ्यं भवन् आगतः ।

**[ तुम्हहं केरउं धणु ]** युष्मद् । आम्प्र० । अनेन आमा सह युष्मद्० → **तुम्हहं**० । युष्माकं सम्बन्धिनं धनमित्यर्थः ॥३७३॥

**तुम्हासु सुपा ॥ ८।४।३७४ ॥**

अपभ्रंशे युष्मदः सुपा सह तुम्हासु इत्यादेशो भवति ॥ **तुम्हासु** ठिअं ॥

**[ तुम्हासु सुपा ]** तुम्हासु प्रथमा सि । सुप् तृतीया टा ।

**[ तुम्हासु ठिअं ]** युष्मद् । सप्तमी सुप् । अनेन सुपा सह युष्मद्० → **तुम्हासु**० । **स्थितमित्यर्थः** ॥३७४॥

**सावस्मदो हउं ॥ ८।४।३७५ ॥**

अपभ्रंशे अस्मदः सौ परे हउं इत्यादेशो भवति ॥

तसु **हउं** कलि-जुगि दुल्लहहो ॥

**[ सावस्मदो हउं ]** सि सप्तमी ङि । अस्मद् षष्ठी ङस् । हउं प्रथमा सि ।

**[ तसु हउं कलि-जुगि दुल्लहहो.... ]** पूर्वं लिखितम् । [४।३३८-१] ।

अस्मद् । प्रथमा सि । अनेन अस्मद्० → हउं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **हउं** ॥३७५॥

**जस्-शसोरम्हे-अम्हइं ॥ ८।४।३७६ ॥**

अपभ्रंशे अस्मदो जसि शसि च परे प्रत्येकं अम्हे-अम्हइं इत्यादेशौ भवतः ॥

अम्हे[1] थोवा रिउ बहुअ कायर एवँ भणंति ।
मुद्धि ! निहालहि गयण-यलु कइ जण जोण्ह करंति ? ॥१॥

अम्बणु लाइवि जे गया पहिअ पराया के वि ।
अवस[2] न सुअहिं सुहच्छिअहिं जिवँ **अम्हइं** तिवँ ते वि ॥२॥

**अम्हे** देक्खइ । **अम्हइं** देक्खइ ॥३॥ वचनभेदो यथासंख्यनिवृत्त्यर्थः ॥

**[ जस्-शसोरम्हे अम्हइं ]** जस्-शस् षष्ठी ओस् । अम्हे अम्हइं प्रथमा सि ।

**[ अम्हे थोवा रिउ बहुअ............ ]**

अस्यार्थः- कातरा एवं भणन्ति - वयं स्तोकाः, रिपवस्तु बहुकाः । हे मुग्धे ! गगनतलं निभालय-पश्य, कति जना ज्योत्स्नां कुर्वन्ति ? एकश्चन्द्र एवेत्यर्थः ।

**[ अम्हे ]** अस्मद् । प्रथमा जस् । अनेन अस्मद्० → अम्हे० । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् **अम्हे** ।

**[ अम्बणु लाइवि जे गया.......... ]**

अस्यार्थः- ये केऽपि परकीयाः पथिका आम्लत्वं स्नेहं लंगयित्वा[3] गताः, तेऽपि अवश्यं-निश्चितं सुखासिकायां न स्वपन्ति, यथा वयं तथा तेऽपि इत्यर्थः ।

**[ अम्हइं ]** अस्मद् । प्रथमा जस् । अनेन अस्मद्० → अम्हइं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) जस्लुक् **अम्हइं** ।

**[ अम्हे देक्खइ, अम्हइं देक्खइ ]** अस्मद् २ । द्वितीया शस् । अनेन अस्मद्० → अम्हे० - अम्हइं० । 'स्यम्-जस्-शसां लुक्' (४।३४४) शस्लुक् **अम्हे अम्हइं** । अस्मान् पश्यतीत्यर्थः ॥३७६॥

## टा-ङ्यमा मइं ॥ ८।४।३७७ ॥

अपभ्रंशे अस्मदः टा-ङि-अम् इत्येतैः सह मइं इत्यादेशो भवति ॥

॥ टा ॥ **मइं** जाणिउं पिअ ! विरहिअहं[4] क-वि धर होइ विआलि ।
णवर मिअंकु वि तिह तवइ जिह दिणयरु खय-गालि ॥१॥

॥ ङिना ॥ पइं **मइं** बेहिं वि रण-गयहिं । [४।३७०-३] ॥२॥

॥ अमा ॥ **मइं** मेल्लंतहो तुज्झु । [४।३७०-४] ॥३॥

**[ टा-ङ्यमा मइं ]** टा-ङि-अम् तृतीया टा । मइं प्रथमा सि ।

**[ मइं जाणिउं पिअ ! विरहिअहं................ ]**

अस्यार्थः- हे प्रिय ! मया ज्ञातं, विरहितानां[2] पुरुषाणां कापि धरा अवलम्बनं भवति । कदा ? विकाले-संध्याकाले णवरं-केवलं । यदा(था) दिनकरः क्षयकाले-कल्पान्तकाले गतः- प्राप्तस्तपति तदा(था) मृगाङ्कोऽपि तपतीत्यर्थः ।

**[ मइं ]** अस्मद् । तृतीया टा । अनेन टाप्रत्ययेन सह अस्मद्० → मइं० ।

---

१. अम्हे थोडा रिउ घणा इय कायर चिंतंति । सुह ! निहालउ गयणउलु के उज्जोउ करंति ॥ [कु० प्र० -१]

२. P. अवसु । ३. M. N. लागयित्वा । ४. P. विरहितानां स्त्रीणाम् । धर-धरावत् आधारः । विआलि - विरुद्धकाले आपदि ।

**[ पइं मइं बेहिं वि............ ]** पूर्वं लिखितमेव । [४।३७०-३] ।

**[ मइं ]** अस्मद् । सप्तमी ङि । अनेन ङिना सह अस्मद्० → **मइं०** ।

**[ मइं मेल्लंतहो तुज्झु ]** पूर्वं लिखितमेव । [४।३७०-४] ।

**[ मइं ]** अस्मद् । द्वितीया अम् । अनेन अमा सह अस्मद्० → **मइं०** ॥३७७॥

**अम्हेहिं भिसा ॥ ८।४।३७८ ॥**

अपभ्रंशे अस्मदो भिसा सह अम्हेहिं इत्यादेशो भवति ॥

तुम्हेहिं **अम्हेहिं** जं किअउं.........[४।३७१-१] ।

**[ अम्हेहिं भिसा ]** अम्हेहिं प्रथमा सि । भिस् तृतीया टा ।

**[ तुम्हेहिं अम्हेहिं जं किअउं ]** पूर्वं लिखितमेव । [४।३७१-१] ।

**[ अम्हेहिं ]** अस्मद् । तृतीया भिस् । अनेन भिसा सह अस्मद्० → **अम्हेहिं०** ॥३७८॥

**महु-मज्झु ङसि ङस्भ्याम् ॥ ८।४।३७९ ॥**

अपभ्रंशे अस्मदो ङसिना ङसा च सह प्रत्येकं महु-मज्झु इत्यादेशौ भवतः ॥

**महु** होंतउ गदो । **मज्झु** होंतउ गदो ॥

**महु** कंतहो बे दोसडा हेल्लि ! म झङ्खहि आलु ।
देंतहो हउं पर उव्वरिअ जुज्झंतहो करवालु ॥१॥

जइ[१] भग्गा पारक्कडा तो सहि ! **मज्झु** पिएण ।
अह भग्गा अम्हहं तणा तो तें मारिअडेण ॥२॥

**[ महु-मज्झु ङसि-ङस्भ्याम् ]** महु-मज्झु प्रथमा औ । ङसि-ङस् तृतीया भ्याम् ।

**[ महु होंतउ गदो । मज्झु होंतउ गदो ]** अस्मद् भवन् गतः । अस्मद् (२) । पञ्चमी ङसि । अनेन ङसिना सह अस्मद्० → **महु०** - **मज्झु०** ।

**[ महु कंतहो बे दोसडा.................. ]**

अस्यार्थः- हे हल्लि ! हे सखि ! मम कान्तस्य द्वौ दोषौ स्तः । अनर्थकं मा जल्प । कौ द्वौ दोषौ ? तदाह - एकस्तावद् दानं ददतः सतः पर-केवलमहमुद्वरिता । अपरस्तावद् युध्यतः खड्गमुद्वरितमिति । निन्दा-स्तुतिरित्यर्थः ।

**[ महु ]** अस्मद् । षष्ठी ङस् । अनेन ङसा सह अस्मद्० → **महु०** ।

**[ जइ भग्गा पारक्कडा.................. ]**

अस्यार्थः- हे सखि ! यदि परकीया भग्नास्ततो मम प्रियेण । अथ अस्माकं सम्बन्धिनश्चेद्भग्नास्ततस्तेन मम भर्ता मारितेनैव इत्यर्थः ।

**[ मज्झु ]** अस्मद् । षष्ठी ङस् । अनेन ङसा सह अस्मद्० → **मज्झु०** ॥३७९॥

---

१. जइ भग्गा पारक्कडा तो सखि मुज्झ पियेण । जो भग्गा अम्हेतणा तो तिह जुञ्झयडेण ॥ [रा० दो०]

## अम्हहं भ्यसाम्भ्याम् ॥ ८।४।३८० ॥

अपभ्रंशे अस्मदो भ्यसा आमा च सह अम्हहं इत्यादेशो भवति ॥

अम्हहं होंतउ आगदो ॥ आमा-अह भग्गा **अम्हहं** तणा....... [४-३७९-२] ।

**[ अम्हहं भ्यसाम्भ्याम् ]** अम्हहं प्रथमा सि । भ्यस्-आम् तृतीया भ्याम् ।

**[ अम्हहं होंतउ आगदो ]** अस्मद् (अस्मभ्यं) भवान् आगतः । अस्मद् । भ्यस्प्र० । अनेन भ्यसा सह अस्मद्० → **अम्हहं०** ।

**[ अह भग्गा अम्हहं तणा..... ]** अस्मद् । षष्ठी आम् । अनेन आमा सह अस्मद्० → **अम्हहं०** ॥३८०॥

## सुपा अम्हासु ॥ ८।४।३८१ ॥

अपभ्रंशे अस्मदः सुपा सह अम्हासु इत्यादेशो भवति ॥ **अम्हासु** ठिअं ॥

**[ सुपा अम्हासु ]** सुप् तृतीया टा । अम्हासु प्रथमा सि ।

**[ अम्हासु ठिअं ]** अस्मासु स्थितम् । अस्मद् । सप्तमी सुप् । अनेन सुपा सह अस्मद्० → **अम्हासु०** ॥३८१॥

## त्यादेराद्यत्रयस्य बहुत्वे हिं नवा ॥ ८।४।३८२ ॥

त्यादीनामाद्यत्रयस्य सम्बन्धिनो बहुष्वर्थेषु वर्तमानस्य वचनस्याऽपभ्रंशे हिं इत्यादेशो वा भवति ॥

मुहँ[१]-कबरि-बंध तहे सोह **धरहिं**, नं मल्ल-जुज्झु ससि-राहु **करहिं** ।
तहे **सहहिं** कुरल भमर-उल-तुलिअ, नं तिमिर-डिंभ खेलंति मिलिअ ॥१॥

**[ त्यादेराद्यत्रयस्य बहुत्वे हिं नवा ]** त्यादि षष्ठी ङस् । आद्यत्रय षष्ठी ङस् । बहुत्व सप्तमी ङि । हिं प्रथमा सि । नवा प्रथमा सि ।

**[ मुह-कबरि-बंध तहे सोह धरहिं............ ]**

अस्यार्थः- तस्या मुखकबरिबन्धौ वदनवेणीबन्धौ शोभां धरतः । नं उत्प्रेक्ष्यते । शशि-राहू मल्लयुद्धं कुरुतः । तस्याः कुरलाः-केशाः शोभन्ते । किंविशिष्टाः कुरलाः ? भ्रमरकुलतुलिताः- सदृशाः । नं उत्प्रेक्ष्यते । तिमिरडिम्भाः - अन्धकारबालिका मिलिताः क्रीडन्तीत्यर्थः ।

**[ धरहिं ]** 'धृंग् धारणे' (८८७) धृ । वर्त्त० तस् । 'द्विवचनस्य बहुवचनम्' (३।१३०) तस्० → अन्ति० । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'ऋवर्णस्याऽरः' (४।२३४) धृ० → धर० । 'लोकात्' (१।१।३) धरन्ति । अनेन अन्ति० → हिं० **धरहिं** ।

**[ करहिं ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तस् । 'द्विवचनस्य०' (३।१३०) तस्० → अन्ति० । 'ऋवर्ण०' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) करन्ति । अनेन अन्ति० → हिं० **करहिं** ।

**[ सहहिं ]** 'राजृग् दीप्तौ' (८९३) राज् । वर्त्त० तस् । 'द्विवचनस्य बहुवचनम्' (३।१३०) तस्० → अन्ति० । 'राजेरग्घ-छज्ज-सह-रीर-रेहाः' (४।१००) राज्० → सह० । अनेन अन्ति० → हिं० **सहहिं** ॥३८२॥

---

१. घणसारतार-णअणाएँ गूढ-कुसुमुच्चयो चिहुर-भारो । ससि-राहु-मल्ल-जुज्झं व दंसिदमेण-णअणाएँ ॥ [क० म० २।२१]

### मध्यत्रयस्याऽऽद्यस्य हिः ॥ ८।४।३८३ ॥

त्यादीनां मध्यत्रयस्य यदाद्यं वचनं तस्याऽपभ्रंशे हि इत्यादेशो वा भवति ॥

बप्पीहा ! पिउ पिउ भणवि कित्तिउ **रुअहि** हयास ! ।
तुह जलि महु पुणु वल्लहइ बिहुं वि न पूरिअ आस ॥१॥

॥ आत्मनेपदे ॥ बप्पीहा ! [१]काइं बोल्लिएण निग्घिण ! वार इ वार ।
सायरि भरिअइ विमल-जलि **लहहि** न एक्क-इ धार ॥२॥

॥ सप्तम्याम् ॥ आयहिं [२]जम्महिं अन्नहिं वि गोरि ! सु **दिज्जहि** कंतु ।
गय मत्तहं चत्तंकुसहं जो अब्भिडइ हसंतु ॥३॥

पक्षे- **रुअसि** इत्यादि ॥

**[ मध्यत्रयस्याऽऽद्यस्य हिः ]** मध्यत्रय षष्ठी ङस् । आद्य षष्ठी ङस् । हि प्रथमा सि ।

**[ बप्पीहा ! पिउ पिउ भणवि.......... ]**

**अस्यार्थः**- हे बप्पीहा ! प्रिय ! प्रिय ! इति भणित्वा कियत् रोदिषि ? । हे हताश ! तव जलधरेण मम वल्लभेन द्वयोरपि आशा न पूरितेत्यर्थः ।

**[ रुअहि ]** 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । वर्त्त० सिव् । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) रुदसि । अनेन सिव्० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् **रुअहि** ।

**[ बप्पीहा ! काइं बोल्लिएण.......... ]**

**अस्यार्थः**- हे बप्पीहा ! किं वारं २ कथनेन ? । हे निर्घृण ! हे निर्लज्ज ! विमलजलेन सागरे भृते एकामपि धारां न लभसे इत्यर्थः ।

**[ लहहि ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० से । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लभसे । 'ख-घ-थ-ध-भाम्' (१।१८७) भ० → ह० । अनेन वा से० → हि० **लहहि** ।

**[ आयहिं जम्महिं अन्नहिं............... ]**

**अस्यार्थः**- हे गौरि ! हे पार्वति ! त्वमस्मिन् भवे अन्यस्मिन्नपि जन्मनि मम तं कान्तं दद्याः, यो हसन् मत्तानां त्यक्ताऽङ्कुशानां गजानां सङ्गच्छते-सम्मुखो भवतीत्यर्थः ।

**[ दिज्जहि ]** 'डुदांग्क् दाने' (११३८) दा । सप्तमी यास् । अनेन यास्० → हि० । 'स्वराणां स्वराः' (४।२३८) दा० → दि० । 'वर्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा' (३।१७७) ज्ज आगमः **दिज्जहि** ॥३८३॥

### बहुत्वे हुः ॥ ८।४।३८४ ॥

त्यादीनां मध्यत्रयस्य सम्बन्धि बहुष्वर्थेषु वर्तमानं यद्वचनं तस्याऽपभ्रंशे हु इत्यादेशो वा भवति ॥

बलि-अब्भत्थणि महु-महणु लहुईहूआ सो-इ ।
जइ **इच्छहु** वड्डत्तणउं देहु म **मग्गहु** को-इ ॥१॥

---

१. G. कइँ । २. G. जमि ।

पक्षे- **इच्छह** इत्यादि ॥

**[ बहुत्वे हुः ]** बहुत्व सप्तमी ङि । हु प्रथमा सि ।

**[ बलि-अब्भत्थणि महु-महणु............... ]**

अस्यार्थः- बलेरभ्यर्थने सोऽपि मधुमथनो नारायणोऽपि लघुकीभूतः । अथ यदी[1]च्छत वृद्धत्वं तर्हि द[2]दत कोऽपि मा मार्गयत इत्यर्थः ।

**[ इच्छहु ]** 'इषत् इच्छायाम्' (१४१९) इष् । पञ्चमी त । 'व्यञ्जनाददन्ते' (४।२३९) अत् । 'लोकात्' (१।१।३) इषत। 'गमिष्यमासां छः' (४।२१५) ष० → छ० । अनेन त० → हु० **इच्छहु** ॥३८४॥

## अन्त्यत्रयस्याऽऽद्यस्य उं ॥ ८।४।३८५ ॥

त्यादीनामन्त्यत्रयस्य यदाद्यं वचनं तस्याऽपभ्रंशे उं इत्यादेशो वा भवति ॥

विहि विणड[3]उ, पीडंतु गह मं धणि ! करहि विसाउ ।

संपइ **कड्ढउं** वेस जिम्व छुडु अग्घइ ववसाउ ॥१॥

बलि **किज्जउं** सुअणस्सु [४।३३८-१] पक्षे- **कड्ढामि** इत्यादि ॥

**[ अन्त्यत्रयस्याऽऽद्यस्य उं ]** अन्त्यत्रय षष्ठी ङस् । आद्य षष्ठी ङस् । उं प्रथमा सि ।

**[ विहि विणडउ, पीडंतु गह.......... ]**

अस्यार्थः- विधिर्विनटयतु । ग्रहाः पीडन्तु (पीडयन्तु) । हे प्रिये ! विषादं मा कुरु । वे[4]षमिव संपदं कर्षयामि । यदि व्यवसायो अर्घति (स्यात् ?) तदा संपदः सुलभा इत्यर्थः ।

**[ कड्ढउं ]** 'कृषं' (५०६) - 'कृषींत् विलेखने' (१३१९) कृष् । वर्त्त० मिव् । 'कृषेः कड्ढ-साअड्ढाऽ-ञ्चा-ऽणच्छा-ऽयञ्छा-ऽऽइञ्छाः' (४।१८७) कृष्० → कड्ढ० । अनेन मिव्० → उं० **कड्ढउं** ।

**[ बलि किज्जउं सुअणस्सु ]** पूर्वं लिखितमेव [४।३३८-१] ।

**[ किज्जउं ]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ए । अनेन ए० → उं० वा । 'क्यः शिति' (३।४।७०) क्यप्र० → य० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्य० → इज्ज० । 'स्वराणां स्वराः' (४।२३८) ऋकारस्य इकारेण सह कि० **किज्जउं** । पक्षे-कड्ढामि ॥३८५॥

## बहुत्वे हुं ॥ ८।४।३८६ ॥

त्यादीनामन्त्यत्रयस्य सम्बन्धि बहुष्वर्थेषु वर्तमानं यद्वचनं तस्य हुं इत्यादेशो वा भवति ॥

खग्ग-विसाहिउ जहिं **लहहुं** पिअ ! तहिं देसहिं **जाहुं** ।

रण- दुब्भिक्खें भग्गाइं विणु जुज्झें न **वलाहुं** ॥१॥

पक्षे- **लहिमु** इत्यादि ॥

**[ बहुत्वे हुं ]** बहुत्व सप्तमी ङि । हुं प्रथमा सि ।

---

१. H. M. N. P. इच्छथ । २. H. P. ददथ । M. N. दत्त । ३. P. वि णडउ - अपि नटतु । ४. I. N. P. वेश्यामिव ।

**[ खग्ग-विसाहिउ जहिं लहहुं............ ]**

अस्यार्थः- हे प्रिये ! यस्मिन् देशे खड्गेन[1] विसाधितं लभामहे तस्मिन् देशे यामः । वयं रण-दुर्भिक्षेण भग्नाः । युद्धेन विना न वलामहे - न रतिं प्राप्नुमः इत्यर्थः ।

**[ लहहुं ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० महे । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लभमहे। 'ख-घ-थ-ध-भाम्' (१।१८७) भस्य हः । अनेन महे० → हुं० **लहहुं** ।

**[ जाहुं ]** 'यांक् प्रापणे' (१०६२) या । वर्त्त० मस् । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन मस्० → हुं० **जाहुं**।

**[ वलाहुं ]** 'वलि संवरणे' (८०७) वल् । वर्त्त० महे । अनेन वा महे० → हुं० । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) वलहुं । 'स्वराणां स्वराः' (४।२३८) ल० → ला० **वलाहुं** पक्षे-

**[ लहिमु ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । वर्त्त० महे । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) लभमहे। 'तृतीयस्य मो-मु-माः' (३।१४४) महे० → मु० । 'स्वराणां स्वराः' (४।२३८) भ० → भि० । **'ख-घ-थ-ध-भाम्'** (१।१८७) भस्य हः **लहिमु** ॥३८६॥

## हि-स्वयोरिदुदेत् ॥ ८।४।३८७ ॥

पञ्चम्या हि-स्वयोरपभ्रंशे इ-उ-ए इत्येते त्रय आदेशा वा भवन्ति ॥

॥ इत् ॥ कुंजर[2] ! **सुमरि** म सल्लइउ सरला सास म **मेल्लि** ।
कवल जि पाविय विहि-वसिण ते **चरि** माणु म **मेल्लि** ॥१॥

॥ उत् ॥ भमरा[3] ! एत्थु वि लिंबडइ के वि दिअहडा **विलंबु** ।
घण-पत्तलु छाया-बहुलु[4] फुल्लइ जाम कयंबु ॥२॥

॥ एत् ॥ प्रिय ! एवँहिं करि सेल्लु **करे** छड्डहि तुहुं करवालु ।
जं(जें) कावालिय बप्पुडा लेहि अभग्गु कवालु ॥३॥

पक्षे- **सुमरहि** इत्यादि ॥

**[ हि-स्वयोरिदुदेत् ]** हि-स्व षष्ठी ओस् । इत्-उत्-एत् प्रथमा सि ।

**[ कुञ्जर ! सुमरि म सल्लइउ............ ]**

अस्यार्थः- कुञ्जर ! मा स्मर सल्लकीः । सरलान् - दीर्घान् श्वासान् मा मुञ्च । विधिवशेन ये कवलाः प्राप्तास्तान् चर। मानं मा मुञ्च इत्यर्थः ॥

---

१. H. P. खग्गें वि साहिउ - खड्गेनापि साधितं ।

२. मा सुमरसु चंदणपल्लवाण करिणाह ! गेण्ह तिणकवलं । जा जह परिणमइ दसा तं तह धीरा पडिच्छंति ॥
[व० ल० - गयवज्जा- १९२-३]
मा स्मर चन्दनपल्लवानां करिनाथ ! गृहाण तृणकवलम् । या यथा परिणमति दशा तां तथा धीराः प्रपद्यन्ते ॥

३. छप्पय ! गमेसु कालं वासवकुसुमाइं ताव मा मुयसु । मन्ने जियंतो पेच्छसि पउरा रिद्धी वसंतस्स ॥
[व० ल० - इंदिंदिरवज्जा- २४४।९]
षट्पद ! गमयस्व कालं वासवकुसुमानि तावन्मा मुञ्च । मन्ये जीवन् पश्यसि प्रचुरा ऋद्धिर्वसन्तस्य ॥

४. G. बहलु ।

**[ सुमरि ]** स्मर् । पञ्चमी हि । 'स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः' (४।७४) स्मर० → सुमर० । अनेन हि० → इ० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **सुमरि** ।

**[ मेल्लि ]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् । पञ्चमी हि । अनेन हि० → इ० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) मुचइ । 'मुचेश्छड्डा-वहेड-मेल्लो०' (४।९१) मेल्ल० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **मेल्लि** ।

**[ चरि ]** 'चर भक्षणे च' (४१०) चर् । पञ्चमी हि । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) चरहि । अनेन हि० → इ० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **चरि** ।

**[ भमरा ! एत्थु वि लिंबडइ.............. ]**

अस्यार्थः- हे भ्रमर ! अत्रापि लिम्बे -निम्बे तावत् कति[१] दिवसान् विलम्बस्व, यावत् घनपत्रवान् छायाबहुलः कदम्बः प्रफुल्लतीत्यर्थः ।

**[ विलंबु ]** 'लबुङ् अवस्रंसने च' (७६६) लब् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) लम्ब्, विपूर्व० । पञ्चमी स्व । अनेन स्व० → उ० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **विलंबु** ।

**[ प्रिय ! एवँहिं करि सेल्लु.............. ]**

अस्यार्थः- हे प्रिय ! इदानीं करे सल्लं-भल्लं कुरु । त्वं करवालं मुञ्च । येन कारणेन वराकाः-कापालिका योगिनः कपालं अभग्नं लान्तीत्यर्थः ।

**[ करे ]** 'डुकृंग् करणे' (८८८) कृ । पञ्चमी हि । 'ऋवर्णस्याऽरः' (४।२३४) कृ० → कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) कर० । अनेन हि० → ए० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **करे** ।

पक्षे-सुमरहि इत्यादि ॥३८७॥

## वर्त्स्यति स्यस्य सः ॥ ८।४।३८८ ॥

अपभ्रंशे भविष्यदर्थविषयस्य त्यादेः स्यस्य सो वा भवति ॥

दिअहा जंति झडप्पडहिं पडहिं मणोरह पच्छि ।
जं अच्छइ तं माणिअइ **होसइ** करतु म अच्छि ॥१॥

पक्षे **होहिइ** ॥

**[ वर्त्स्यति स्यस्य सः ]** वर्त्स्यत् सप्तमी ङि । स्य षष्ठी ङस् । स प्रथमा सि ।

**[ दिअहा जंति झडप्पडहिं.................. ]**

अस्यार्थः- दिवसा वेगैर्यान्ति । मनोरथाः पश्चात् पतन्ति । यदस्ति तन्मन्यते - भुज्यते । भविष्यति इति कुर्वन्मा आस्स्व - मा तिष्ठेत्यर्थः ।

**[ होसइ ]** 'भू सत्तायाम्' (१) भू । भविष्यन्ती स्यति । अनेन स्यस्य सः । 'त्यादीना०' (३।१३९) ति० → इ० । 'भुवेर्हो-हुव-हवाः' (४।६०) भू० → हो० **होसइ** ॥३८८॥

१. M. कति(चित्) । N. कान् ।

## क्रियेः कीसु ॥ ८।४।३८९ ॥

क्रिये इत्येतस्य क्रियापदस्याऽपभ्रंशे कीसु इत्यादेशो वा भवति ॥

संता भोगं[1] जु परिहरइ तसु कंतहो बलि **कीसु**[2] ।
तसु दइवेण वि मुंडियउं जसु खल्लिहडउं सीसु ॥१॥

पक्षे- साध्यमानावस्थानात् क्रिये संस्कृतशब्दादेषः प्रयोगः । बलि किज्जउं सुअणस्सु ॥ [४।३३८-१] ।

**[ क्रियेः कीसु ]** क्रियि षष्ठी ङस् । कीसु प्रथमा सि ।

**[ संता भोग जु परिहरइ............... ]**

अस्यार्थः- यः सतो विद्यमानान् भोगान् परिहरति तस्य कान्तस्य बलिं-पूजां क्रिये । यस्य शीर्षं खल्वाटं तस्य दैवेनैव मुण्डितम् । को भावः ? यस्य भोगा न सन्ति स तु स्वयमेव त्यजतीत्यर्थः ।

**[ कीसु ]** क्रिये । अनेन क्रिये० → **कीसु**० । पक्षे-

**[ किज्जउं ]** पूर्वं लिखितमेव [४।३३८] ॥३८९॥

## भुवः पर्याप्तौ हुच्चः ॥ ८।४।३९० ॥

अपभ्रंशे भुवो धातोः पर्याप्तावर्थे वर्तमानस्य हुच्च इत्यादेशो भवति ॥

अइतुंगत्तणु जं थणहं सो छेयउ न हु[3] लाहु ।
सहि ! जइ केवँइ तुडि-वसेण अहरि **पहुच्चइ** नाहु ॥१॥

**[ भुवः पर्याप्तौ हुच्चः ]** भू षष्ठी ङस् । पर्याप्ति सप्तमी ङि । हुच्च प्रथमा सि ।

**[ अइतुंगत्तणु जं थणहं..................... ]**

अस्यार्थः- अतितुङ्गत्वं स छेदकः, न तु लाभः । हे सखि ! यदि कथमपि त्रुटिवशेन-कालविलम्बेन नाथो अधरे प्रभवति, अन्यथा लगत्येव, स्तनयोरतितुङ्गत्वादित्यर्थः ।

**[ पहुच्चइ ]** 'भू सत्तायाम्' (१) भू, प्रपूर्व० । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० । 'सर्वत्र ल०' (२।७९) र्लुक् । अनेन भू० → हुच्च० **पहुच्चइ** ॥३९०॥

## ब्रूगो ब्रुवो वा ॥ ८।४।३९१ ॥

अपभ्रंशे ब्रूगो धातोर्ब्रुव इत्यादेशो वा भवति ॥

**ब्रुवह** सुहासिउ किं पि ॥१॥ पक्षे-

---

१. P. भोगु । २. N. टि० असल में **कीसु** यह **कर्** के **क्** ऐसे कर्मवाच्य अंग पर से बने भविष्यकाल के पहले पुरुष एकवचन का रूप है, वर्तमानकाल का नही । **कीसु** = (मैं) करवाया जाउँगा । उचित अर्थ के बल की दृष्टि से **वि** स्थान पर **जि** की अपेक्षा रहती है ।

अन्ना वयन्ति धन्नो जइ एया मोत्तु एस पव्वइही । संतच्चाई चाई खल्लाडो मुंडिओ चेव [पु० च० -१९३]

पुहवीचंद-गुणसायरभवे सुधणकहिय वित्तंते निव्विण्णमणगुणसायरविवाहवण्णणं ।

३. P. उ ।

इत्तउं **ब्रोप्पिणु** सउणि ठिउ पुणु दूसासणु **ब्रोप्पि** ।
तो हउँ जाणउं एहो हरि जइ महु अग्गइ **ब्रोप्पि** ॥२॥

**[ ब्रूगो ब्रुवो वा ]** ब्रूग् षष्ठी ङस् । ब्रुव प्रथमा सि । वा प्रथमा सि ।

**[ ब्रुवह सुहासिउ किं पि ]** एकपदम् । अर्थः:- किमपि सुभाषितं ब्रूते इत्यर्थः ।

**[ ब्रुवह ]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । पञ्चमी त । अनेन ब्रू० → ब्रुव० । 'मध्यमस्येत्था-हचौ' (३।१४३) त० → ह० **ब्रुवह** ।

**[ इत्तउं ब्रोप्पिणु सउणि ठिउ.................. ]**

अस्यार्थः- दुर्योधनोक्तिरियम् । शकुनिः-भीममातुल इयत् ब्रूत्वा स्थितः । पुनः दुःशासनो ब्रूत्वा स्थितः । अहं ततस्तर्हि जाने यदि एष हरिर्ममाग्रे ब्रूत्वा तिष्ठतीति शेष इत्यर्थः ॥

**[ ब्रोप्पिणु ]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । क्त्वाप्र० । 'एप्प्येप्पिण्वेव्येविणवः' (४।४४०) क्त्वा० → एप्पिणु० । 'स्वराणां स्वराः' (४।२३८) एकारेण सह उकारस्य ओकारः **ब्रोप्पिणु** ।

**[ ब्रोप्पि ]** ब्रू । क्त्वाप्र० । 'एप्प्येप्पिण्वेव्येविणवः' (४।४४०) क्त्वा० → एप्पि० । 'स्वराणां० स्वराः' (४।२३८) एकारेण सह ऊकारस्य ओकारः **ब्रोप्पि** ॥३९१॥

## व्रजेर्वुञः ॥ ८।४।३९२ ॥

अपभ्रंशे व्रजतेर्धातोर्वुञ इत्यादेशो भवति ॥ **वुञइ** । **वुञेप्पि** । **वुञेप्पिणु** ॥

**[ व्रजेर्वुञः ]** व्रजि षष्ठी ङस् । वुञ प्रथमा सि ।

**[ वुञइ ]** 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'व्यञ्जनाद०' (४।२३९) अत् । 'लोकात्' (१।१।३) व्रजति । अनेन व्रज० → वुञ० । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **वुञइ** ।

**[ वुञेप्पि ]** व्रज् । क्त्वाप्र० । 'एप्प्येप्पिण्वेव्येविणवः' (४।४४०) क्त्वा० → एप्पि० । अनेन व्रज० → वुञ० **वुञेप्पि** ।

**[ वुञेप्पिणु ]** व्रज् । क्त्वाप्र० । 'एप्प्येप्पिण्वेव्येविणवः' (४।४४०) क्त्वा० → एप्पिणु० । अनेन व्रज० → वुञ० **वुञेप्पिणु** ॥३९२॥

## दृशेः प्रस्सः ॥ ८।४।३९३ ॥

अपभ्रंशे दृशेर्धातोः प्रस्स इत्यादेशो भवति ॥ प्रस्सदि ॥

**[ दृशेः प्रस्सः ]** दृशि षष्ठी ङस् । प्रस्स प्रथमा सि ।

**[ प्रस्सदि ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इच्० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) दृशइ । 'अतो देश्च' (४।२७४) इच्० → दि० । अनेन दृश० → प्रस्स० **प्रस्सदि**। पश्यतीत्यर्थः ॥३९३॥

## ग्रहेर्गृण्हः ॥ ८।४।३९४ ॥

अपभ्रंशे ग्रहेर्धातोर्गृण्ह इत्यादेशो भवति ॥ पढ **गृण्हेप्पिणु** व्रतु ॥

**[ ग्रहेर्गृण्हः ]** ग्रहि षष्ठी ङस् । गृण्ह प्रथमा सि ।

**[ पढ गृण्हेप्पिणु व्रतु ]** अर्थः- व्रतं गृहीत्वा पठ इत्यर्थः । 'ग्रहीश् उपादाने' (१५१७) ग्रह् । क्त्वाप्र० । अनेन ग्रह० → गृण्ह० । 'एप्प्येप्पिण्वे०' (४।४४०) क्त्वा० → एप्पिणु० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **गृण्हेप्पिणु** ॥३९४॥

**तक्ष्यादीनां छोल्लाऽऽदयः ॥ ८।४।३९५ ॥**

अपभ्रंशे तक्षिप्रभृतीनां धातूनां छोल्ल इत्यादय आदेशा भवन्ति ॥

जिवँ[1-2] तिवँ तिक्खा लेवि कर जइ ससि **छोल्लिज्जंतु** ।
तो जइ गोरिहे मुह-कमलि[3] सरिसिम का-वि लहंतु ॥१॥

आदिग्रहणाद् देशीषु ये क्रियावचना उपलभ्यन्ते तेऽप्युदाहार्याः ॥

चूडुल्लउ चुण्णीहोइसइ मुद्धि ! कवोलि निहित्तउ ।
सासानल-जाल-**झलक्किअउ** बाह-सलिल-संसित्तउ ॥२॥

**अब्भडवंचिउ** बे पयइं पेम्मु निअत्तइ जावँ ।
सव्वासण-रिउ-संभवहो कर परिअत्ता तावँ ॥३॥

हिअइ **खुडुक्कइ** गोरडी गयणि **घुडुक्कइ** मेहु ।
वासारत्ति पवासुअहं विसमा संकडु एहु ॥४॥

अम्मि ! पयोहर वज्जमा[4] निच्चु जे संमुहँ[5] थंति ।
महु कंतहो समरंगणइ गय-घड **भज्जिउ** जंति ॥५॥

पुत्तें जाएं कवणु गुणु अवगुणु कवणु मुएण ।
जा बप्पीकी भुंहडी[6] **चंपिज्जइ** अवरेण ॥६॥

तँ[7] तेत्तिउ जलु सायरहो सो तेवडु वित्थारु ।
तिसहें निवारणु पलु वि नवि पर **धुट्टुअइ** असारु ॥७॥

**[ तक्ष्यादीनां छोल्लाऽऽदयः ]** तक्ष्यादि षष्ठी आम् । छोल्लाऽऽदि प्रथमा जस् ।

**[ जिवँ तिवँ तिक्खा लेवि.......... ]**

अस्यार्थः- यथा तथा शशी-चंद्रस्तीक्ष्णान् शरान् लात्वा यद्यतक्षिष्यत् ततो जगति गौर्याश्चन्द्राननायाः मुखकमलेन सह कामपि सदृशतामलप्स्यतेत्यर्थः ।

**[ छोल्लिज्जंतु ]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । क्रियातिपत्तिः स्यत् । अनेन तक्ष० → छोल्ल० । 'न्त-माणौ' (३।१८०) स्यत्० → न्त० । 'मध्ये च स्वरान्ताद्वा' (३।१७८) ज्ज० । 'स्वराणां स्वराः' (४।२३८) ल्ल० → ल्लि० - न्त० → न्तु० **छोल्लिज्जंतु** ।

---

१-२. पण्डुरं जइवि रज्जए मुहं कोमलंगि ! खडिआरसेण । दिज्जए पुण कवोल-कज्जलं ता लहेज्ज ससिणो विडंबणं ॥
[क० म० ३।३३]

P. जिम्व २ । ३. G. [मुहकमलिं] मुखकमल । टा । आट्टो णा० । एट्टि । स्वराणां० । ४. G. वज्जवाँ । ५. P. समुहवंति = सम्मुखीभवन्ति । ६. N. टि. भुंहडी सुधारकर भुम्हडी पढें । P. भउंहडी ।
७. तं तेत्तियं जलं सायरस्स सो च्चेव परमवित्थारो । एक्कं पि पलं तं नत्थि पिवासं निवारेइ ॥ [गा० को०-१४७]

**[ चूडुल्लउ चुण्णीहोइसइ मुद्धि !........... ]**

अस्यार्थः- हे मुग्धे ! कपोले निहितः-स्थापितश्चूटकश्चूर्णीभविष्यति । किंवि० चूटकः ? श्वासानलज्वालादग्धः । पुनः किंवि० ? बाष्पसलिलसंसिक्त इत्यर्थः ।

**[ झलक्किअउ ]** 'दहं भस्मीकरणे' (५५२) दह् । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) दह० । अनेन दह० → झलक्क आदेशः । क्तप्र० । 'स्वराणां स्वराः' (४।२३८) क्क० → क्कि० । 'क-ग-च-ज०' (१।१७७) त्लुक् । स्वार्थे कप्र० । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'स्यमोरस्योत्' (४।३३१) अ० → उ० **झलक्किअउ** ।

**[ अब्भडवंचिउ बे पयइं..................... ]**

अस्यार्थः- प्रेमशब्देन प्रिया वाच्या अभेदोपचारात् । यथा प्रेमवतीत्युच्यते तथा प्रेमापीत्युच्यते । प्रिया प्रियमिति शेषः । प्रियमब्भडवंचिउ इति । अनुव्रज्य मुक्त्वालाप्य यावद् द्वौ पादौ निवर्तते तावत् सर्वाशनरिपुसम्भवस्य चन्द्रस्य कराः-किरणाः परिवृत्ताः-प्रसृता इत्यर्थः ।

**[ सव्वासण-रिउ-संभवहो ]** सर्वमश्नातीति । 'नन्द्यादि०' (५।१।५२) अनप्र० । सर्वाशनोऽग्निः, तस्य रिपुर्जलं, तत्सम्भवः चन्द्रः ।

**[ अब्भडवंचिउ ]** अनुव्रजेरनेन अब्भड इति । वञ्च् । क्तप्र० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) वञ्चत । 'स्वराणां स्वराः' (४।२३८) वञ्चित **अब्भडवंचिउ** ।

**[ हिअइ खुडुक्कइ गोरडी............... ]**

अस्यार्थः- गौरी-स्त्री हृदये शल्यायते । मेघो गगने गर्जति । वर्षारात्रे प्रवासिकानां विषमं सङ्कटमेतदित्यर्थः ।

**[ खुडुक्कइ[१] ]** शल्याय । अनेन ख(खु)डुक्क इति । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **खुडुक्कइ** ।

**[ घुडुक्कइ ]** गर्ज । अनेन गर्जेर्घुडुक्क इति । वर्त्त० तिव् । 'त्यादीनामाद्य०' (३।१३९) तिव्० → इ० **घुडुक्कइ** ।

**[ अम्मि ! पयोहर वज्जमा................ ]**

अस्यार्थः- हे अम्ब ! मम पयोधरौ वज्रमयौ स्तः । यौ नित्यमेव तस्य मम कान्तस्य सम्मुखौ तिष्ठतः । तस्येति कस्य ? त(य)स्याऽग्रे गजघटाः समराङ्गणे भङ्क्त्वा यान्तीत्यर्थः ।

**[ थन्ति ]** अनेन तिष्ठतः स्थाने **थन्ति** ।

**[ पुत्तें जाएं कवणु गुणु..................... ]**

अस्यार्थः- जातेन पुत्रेण को गुणः ? मृतेन पुत्रेण कोऽप(व)गुणः ? येन पुत्रेण सतेति गम्यते । या पैतृकी भूमिरपरेणाक्रम्यते इत्यर्थः ।

**[ चम्पिज्जइ ]** 'क्रमू पादविक्षेपे' (३८५) क्रम्, आङ्पूर्व० । अनेन आक्रमेश्चम्प् । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० । क्यप्र० । 'ईअ-इज्जौ क्यस्य' (३।१६०) क्यस्य इज्जः **चम्पिज्जइ** ।

---

१. O. खुडक्क अक० (दे०) (१) शल्य की तरह चुभना. (२) नीचे उतरना. (३) स्खलित होना. (४) क्रोध से मौन रहना. पा० म० - खुडक्क देखो खुडुक्क । ।

**[ तं तेत्तिउ जलु सायरहो.............. ]**

अस्यार्थः- सागरस्य तत्तावज्जलम् । स तावन्मात्रो विस्तारः । परं-केवलं तृषाया निवारणं पलमपि नैव स्यादिति शेषः । असारः सन् शब्दायते इत्यर्थः ।

**[ धुट्ठुअइ ]** शब्दायस्थाने अनेन धुट्ठुअ इति । वर्त्त० ते । 'त्यादीनामाद्य०' (३।१३९) ते० → इ० **धुट्ठुअइ** ॥३९५॥

## अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः ॥ ८।४।३९६ ॥

अपभ्रंशे अपदादौ वर्तमानानां स्वरात्परेषामसंयुक्तानां क-ख-त-थ-प-फां स्थाने यथासंख्यं ग-घ-द-ध-ब-भाः प्रायो भवन्ति ॥

॥ कस्य गः ॥ [२]जं दिट्ठउं सोमग्गहणु असईहिं हसिउ निसंकु ।
पिअ-माणुस-विच्छोह-**गरु** गिलि गिलि राहु मियंकु ॥१॥

॥ खस्य घः ॥ अम्मीए ! सत्थावत्थेहिं **सुघें** चिंतिज्जइ माणु ।
पिए दिट्ठे हल्लोहलेण को चेअइ अप्पाणु ? ॥२॥

॥ त-थ-प-फानां द-ध-ब-भाः ॥
**सबधु**-करेप्पिणु **कधिदु** मइं तसु पर **सभलउं** जम्मु ।
जासु न चाउ न चारहडि न य पम्हुट्ठउ धम्मु ॥३॥

अनादाविति किम् ? सबधु करेप्पिणु । अत्र कस्य गत्वं न भवति । स्वरादाविति किम् ? गिलि गिलि राहु मयंकु ।

असंयुक्तानामिति किम् ? एक्कहिं अक्खिहिं सावणु......[४।३५७-२] ।

प्रायोऽधिकारात् क्वचिन्न भवति -

जइ केवँइ पावीसु पिउ अकिआ कुड्डु करीसु ।
पाणिउ नवइ सरावि जिवँ सव्वंगे पइसीसु ॥४॥

उअ कणिआरु पफुल्लिअउ कंचण-कंति-पयासु ।
गोरी-वयण-विणिज्जिअउ नं सेवइ वण-वासु ॥५॥

**[ अनादौ स्वरादसंयुक्तानाम् ]** अनादि सप्तमी ङि । स्वर पञ्चमी ङसि । असंयुक्त षष्ठी आम् ।

**[ क-ख-त-थ-प-फाम् ]** क-ख-त-थ-प-फ् षष्ठी आम् ।

**[ ग-घ-द-ध-ब-भाः ]** ग-घ-द-ध-ब-भ प्रथमा जस् ।

---

१. पा० म० - धुट्ठुअ देखो धुद्धुअ । ।. धुट्टु(घुग्घु)अइ । O. घुग्घु = "घु घु" ध्वनि करना ।
२. रे रे विडप्प ! मा मुयसु दुज्जणं गिलसु पुण्णिमायंदं । अमयमयं भुंजंतो हयास ! दीहाउओ होसि ॥
[व० ल० - असईवज्जा- ४८३।१२]

रे रे राहो ! मा मुञ्च दुर्जनं गिल पूर्णिमाचन्द्रम् । अमृतमयं भुञ्जानो हताश ! दीर्घायुर्भविष्यसि ॥

**[ जं दिट्ठउं सोमग्गहणु.................. ]**

अस्यार्थः- असतीभिर्यत् सोमग्रहणं दृष्टं - दृष्टकं तन्निःशङ्कं यथास्यात्तथा हसितम् । हे राहो ! प्रियमानुषविक्षोभकरं - इष्टपुरुषवियोगकरं मृगाङ्कं गिल गिलेत्यर्थः ।

**[ पिअमाणुसविच्छोहगरु ]** प्रियमानुषविक्षोभकर । द्वितीया अम् । अनेन कस्य गः । 'स्यमोरस्योत्' (४।३३१) र० → रु० । शेषं स्पष्टम् ।

**[ अम्मीए ! सत्थावत्थेहिं.................. ]**

अस्यार्थः- स्त्री कथयति । हे [१]अम्ब ! स्वस्थावस्थैः-स्वस्थचित्तैः । सुखेन मानश्चिन्त्यते-अहङ्कारः क्रियते । परं प्रिये दृष्टे सति हल्लोहलेन - व्याकुलत्वेन कः आत्मानं चेतयतीत्यर्थः ।

**[ सुघें ]** सुख । तृतीया टा । अनेन खस्य घः । 'एं चेदुतः' (४।३४३) टाया एं **सुघें** ।

**[ सबधु करेप्पिणु कधिदु.................. ]**

अस्यार्थः- शपथं कृत्वा मया कथितं पर-केवलं तस्य जन्म सफलं यस्य त्यागो न प्रमृष्टः- न प्रमुषितः- दानं न गतम् । यस्य चारभटी न प्रमुषिता-सूरवृत्तिर्न गता । यस्य धर्मो न च प्रमृष्टः- न प्रमुषित इत्यर्थः ।

शपथं-कथितं-सफलं - सफलकं । अनेन थस्य धः । तस्य च दः । पस्य च बः । फस्य च भः ।

**[ जइ केवँइ पावीसु पिउ................. ]**

अस्यार्थः- स्त्री कथयति । यदि कथञ्चित् प्रियं प्राप्स्ये(प्राप्स्यामि) तर्हि अकृतं कौतुकं करिष्यामि । यथा नवे शरावे पानीयं सर्वाङ्गेण प्रविशति तथा सर्वाङ्गेण प्रवेक्ष्यामीत्यर्थः ।

**[ उअ कणिआरु पफुल्लिअउ...................... ]**

त्वं पश्य कर्णिकारः प्रफुल्लितः । किंविशिष्टः ? काञ्चनकान्तिप्रकाशः । नं उत्प्रेक्ष्यते । गौरीवदनविनिर्जितः सन् वनवासं सेवते इत्यर्थः ॥३९६॥

## मोऽनुनासिको वो वा ॥ ८।४।३९७ ॥

अपभ्रंशेऽनादौ वर्तमानस्याऽसंयुक्तस्य मकारस्य अनुनासिको वकारो वा भवति ॥

कवँलु कमलु । भवँरु भमरु ॥ लाक्षणिकस्यापि-जिवँ । तिवँ । जेवँ ॥ अनादावित्येव - मयणु ॥ असंयुक्तस्येत्येव - तेवँ । तसु पर सभलउँ जम्मु [४।३९६-३] ॥

**[ मोऽनुनासिको वो वा ]** म् षष्ठी ङस् । अनुनासिक प्रथमा सि । व प्रथमा सि । वा प्रथमा सि ।

**[ कवँलु कमलु ]** कमल (२) । अनेन वा मस्याऽधो वः । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ल० → लु० **कवँलु कमलु** ।

**[ भवँरु भमरु ]** भ्रमर (२) । अनेन वा मस्याऽधो वः । 'सर्वत्र ल०' (२।७९) र्लुक् । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) र० → रु० **भवँरु भमरु** ।

---

१. H. हे अम्बिके ! ।

**[ जिवँ जेवँ ]** यथा (२) । 'कथं-यथा-तथां थादेः०' (४।४०१) डिद् इम-एम० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'आदेर्यो जः' (१।२४५) य० → ज० । अनेन । **जिवँ जेवँ** ।

**[ तिवँ तेवँ ]** तथा (२) । 'कथं-यथा-तथां थादेः०' (४।४०१) डिद् इम-एम० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन । **तिवँ तेवँ** ।

[1]**[ जावँ ]** यावत् । 'यावत्तावतोर्वादेर्म०' (४।४०६) वत्० → म० । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन मस्याऽधो व० **जावँ** ।

[2]**[ तावँ ]** तावत् । 'यावत्तावतोर्वादेर्म०' (४।४०६) वत्० → म० । अनेन मस्याऽधो व० **तावँ** ।

**[ तसु पर सभलउँ जम्मु ]** पूर्वं लिखितम् । [४।३९६-३] ॥३९७॥

## वाऽधो रो लुक् ॥ ८।४।३९८ ॥

अपभ्रंशे संयोगादधो वर्तमानो रेफो लुग् वा भवति ॥

जइ केवँइ पावीसु **पिउ** [४।३९६-४] । पक्षे- जइ भग्गा पारक्कडा तो सहि ! मज्झु **प्रियेण** [४।३७९-२] ॥

**[ वाऽधो रो लुक् ]** वा प्रथमा सि । अधस् षष्ठी ङस् । र् षष्ठी ङस् । लुक् प्रथमा सि ।

**[ जइ केवँइ पावीसु पिउ ]** पूर्वं लिखितम् । प्रिय । द्वितीया अम् । अनेन वा र्लुक् । 'स्यमोरस्योत्' (४।३३१) य० → यु० **पिउ** ।

**[ जइ भग्गा प( पा )रक्कडा तो सहि ! मज्झु प्रियेण ]** पूर्वं लिखितम् । [४।३७९-२] ॥३९८॥

## अभूतोऽपि क्वचित् ॥ ८।४।३९९ ॥

अपभ्रंशे क्वचिदविद्यमानोऽपि रेफो भवति ॥

**व्रासु** महारिसि एउ भणइ जइ सुइ-सत्थु पमाणु ॥
मायहं चलण नवंताहं दिवे दिवे गंगा-ण्हाणु ॥१॥

**वासेण** वि भारह-खंभि बद्ध ॥२॥

**[ अभूतोऽपि क्वचित् ]** अभूत प्रथमा सि । अपि प्रथमा सि । क्वचित् प्रथमा सि ।

**[ व्रासु महारिसि एउ भणइ.................... ]**

अस्यार्थः- व्यासो महर्षिः एतद् भणति । यदि श्रुतिशास्त्रं प्रमाणं तर्हि मातॄणां चरणौ नमतां सतां दिवसे दिवसे गङ्गास्नानमित्यर्थः ।

**[ व्रासु ]** व्यास । प्रथमा सि । 'अधो म-न-याम्' (२।७८) य्लुक् । अनेन वस्याऽधो रः । 'स्यमोरस्योत्' (४।३३१) स० → सु० **व्रासु** ।

**[ वासेण वि भारह-खंभि बद्ध ]** व्यासेनाऽपि भारतस्तम्भे बद्धम् । क्वचित् पठनादत्र रो न स्यात् ॥३९९॥

---

१-२. A. उदाहरणमस्ति ।

## आपद्-विपत्-सम्पदां द इः ॥ ८।४।४०० ॥

अपभ्रंशे आपद्-विपत्-सम्पद् इत्येतेषां दकारस्य इकारो भवति ॥

अनउ करंतहो पुरिसहो आवइ **आवइ** । **विवइ** । **संपइ** ॥

प्रायोऽधिकारात् - गुणहिं न **संपय** कित्ति पर........[४।३३५-१] ।

**[ आपद्-विपत्-सम्पदां द इः ]** आपद्-विपत्-सम्पद् षष्ठी आम् । द् षष्ठी ङस् । इ प्रथमा सि ।

**[ अनउ करंतहो पुरिसहो आवइ आवइ ]**

अस्यार्थः- अनयं कुर्वतः पुरुषस्य आपद् आयाति आवाति वा इत्यर्थः । आपत् । प्रथमा सि । 'पो वः' (१।२३१) प० → व० । अनेन द० → इ० । 'स्यस्-जस्-शसां लुक्' (४।३४४) सिलुक् **आवइ** ।

**[ विवइ ]** विपद् । प्रथमा सि । 'पो वः' (१।२३१) प० → व० । अनेन द० → इ० । 'स्यम्-जस्०' (४।३४४) सिलुक् **विवइ** ।

**[ सम्पइ ]** सम्पद् । प्रथमा सि । अनेन द० → इ० । 'स्यम्-जस्०' (४।३४४) सिलुक् **सम्पइ** ॥४००॥

## कथं-यथा-तथां थादेरेमेमेहेधा डितः ॥ ८।४।४०१ ॥

अपभ्रंशे कथं-यथा-तथा इत्येतेषां थादेरवयवस्य प्रत्येकं एम-इम-इह-इध इत्येते डितश्चत्वार आदेशा भवन्ति ॥

**केम** समप्पउ दुट्ठु दिणु **किध** रयणी छुडु होइ ।
नववहु-दंसण-लालसउ वहइ मणोरह[१] सो-इ ॥१॥

ओ गोरी-मुह-निज्जिअउ वद्दलि लुक्कु मियंकु ।
अन्नु-वि जो परिहविय-तणु सो **किवँ** भवँइ निसंकु ? ॥२॥

बिंबाहरि तणु रयण-वणु **किह** ठिउ सिरि-आणंद ! ।
निरुवम[२]-रसु पिएं पिअवि जणु सेसहो दिण्णी मुद्द ॥३॥

भण[३-४] सहि ! निहुअउं **तेवँ** मइं जइ पिउ दिट्ठु स-दोसु ।
**जेवँ** न जाणइ मज्झु मणु पक्खावडिअं[५] तासु ॥४॥

**जिवँ जिवँ** वंकिम लोअणहं निरु सावँलि सिक्खेइ ।
**तिवँ तिवँ** वम्महु निअय-सर खर-पत्थरि तिक्खेइ ॥५॥

मइं जाणिउं पिअ ! विरहिअहं क-वि धर होइ विआलि ।
नवर मिअंकु वि **तिह** तवइ **जिह** दिणयरु खय-गालि ॥६॥

---

१. P. मणोरहु । २. G. निरुववँ ।

३. मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते । मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ॥
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना । नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥ [अमरुशतकम्-७०]
सखी सिखावति मान विधि सैंननि बरजति बाल । हरुये कहि मो हिय बसत सदा बिहारीलाल ॥
[बिहारी सतसई- "बिहारी सतसई का छन्द(दोहा) और उसकी विशेषताएँ"]

४. G. P. भणु । ५. G. पक्खावडिअउं ।

एवं तिध-जिधावुदाहार्यौ ॥

**[ केम समप्पउ दुट्टु दिणु........... ]**

अस्यार्थः- दुष्टो दिनः कथं समाप्यताम् ? रात्रिः कथम्भवति ? । छुडु[1] यदि भविष्यतीत्यर्थः । यदि शब्देन भविष्यत्कालः । सोऽपि नववधूदर्शनलालसः । एवंविधान् विशेषो मनोरथान् वहतीत्यर्थः ।

**[ केम ]** कथम् । अनेन "थम्" स्थाने डेम० → एम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **केम** ।

**[ किध ]** कथम् । अनेन "थम्" स्थाने डिध० → इध० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **किध** ।

**[ ओ गोरी-मुह-निज्जिअउ.................. ]**

ओ सूचनायाम् । गौरीमुखनिर्जितको मृगाङ्कोऽभ्रे निलीनः । अन्योऽपि यः परिभूततनुः सो निःशङ्कं कथं भ्रमतीत्यर्थः ।

**[ किवँ ]** कथम् । अनेन "थम्" स्थाने डिम० → इम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **किवँ** ।

**[ बिंबाहरि तणु रयण-वणु............. ]**

अस्यार्थः- हे श्रीआनन्द ! तन्व्या बिम्बाधरे रदनव्रणं-दन्तव्रणं कथं स्थितम् ? । उत्तरं ददाति-जणु उत्प्रेक्ष्यते । प्रियेण अधरस्य निरुपमं रसं पीत्वा शेषस्य रसस्य मुद्रा दत्ता इत्यर्थः ।

**[ किह ]** कथम् । अनेन "थम्" स्थाने डिह० → इह० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **किह** ।

**[ भण सहि ! निहुअउं तेवँ मइं............... ]**

अस्यार्थः- हे सखि ! मां प्रति निभृतं-छन्नं यथास्यात्तथा भण-कथय । यदि त्वया प्रियः सरो(दो)षो दृष्टः । तस्य पक्षापतितं - तस्यान्यनरस्य पार्श्वे स्थितं मम मनो यथा न जानाति । भर्त्तेति गम्यते । ममाऽग्रे तथा त्वया छन्नं वाच्यमित्यर्थः ।

**[ तेवँ ]** तथा । अनेन "था"स्थाने डेम० → एम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) तेम० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **तेवँ** ।

**[ जेवँ ]** यथा । अनेन "था"स्थाने डेम० → एम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) येम० । 'आदेर्यो जः' (१।२४५) येम० → जेम० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **जेवँ** ।

**[ जिवँ जिवँ वंकिम लोअणहं...... ]** एकपदम् ।

यथा (२) । अनेन "था"स्थाने डिम० → इम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) यिम० । 'आदेर्यो जः' (१।२४५) यिम० → जिम० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **जिवँ जिवँ** ।

**[ तिवँ तिवँ वम्महु निअय-सर..... ]** एकपदम् ।

तथा (२) । अनेन "था"स्थाने डिम० → इम० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) तिम० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **तिवँ तिवँ** ।

**[ मइं जाणिउं पिअ ! विरहिअहं........ ]** पूर्वं लिखितमेव । [४।३७७-१] ।

---

१. O. छुडु-अव्य० (दे०) यदि "छुडु चीरत्तणु होइ मणूसहो" । यदि मनुष्यमें थोडा धैर्य हो. ।

**[ तिह ]** तथा । अनेन "था"स्थाने डिह० → इह० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तिह०** ।

**[ जिह ]** यथा । अनेन "था"स्थाने डिह० → इह० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) यिह० । 'आदेर्यो जः' (१।२४५) यिह० → **जिह०** ।

**[ तिध ]** तथा । अनेन "था"स्थाने डिध० → इध० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **तिध** ।

**[ जिध ]** यथा । अनेन "था"स्थाने डिध० → इध० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) यिध० । 'आदेर्यो जः' (१।२४५) यिध० → **जिध०** ॥४०१॥

## यादृक्-तादृक्-कीदृगीदृशां दादेर्डेहः ॥ ८।४।४०२ ॥

अपभ्रंशे यादृगादीनां दादेरवयवस्य डिद् एह इत्यादेशो भवति ॥

मइं भणिअउ बलिराय ! तुहुं **केहउ** मग्गणु[१] **एहु** ? ।
जेहु तेहु न वि होइ वढ ! सइं नारायणु **एहु** ॥१॥

**[ यादृक्-तादृक्-कीदृगीदृशाम् ]** यादृक्-तादृक्-कीदृक्-ईदृश् षष्ठी आम् ।

**[ दादेर्डेहः ]** दादि षष्ठी ङस् । डेह प्रथमा सि ।

**[ मइं भणिअउ बलिराय !.............. ]**

अस्यार्थः- हे बलिराज ! मया त्वं भणितः, कीदृग् मार्गण एषः ? । बलिराह-हे वढ ! हे मूर्ख ! यादृक् तादृग् न भवति । ईदृक् स्वयं नारायण इत्यर्थः ।

**[ केहउ ]** कीदृक् । अनेन "दृक्"स्थाने डेह० → एह० इति । 'डित्यन्त्य०' (२।१।११४) ईलुक् । 'लोकात्' (१।१।३) केह । 'स्वार्थे कश्च वा' (२।१६४) कप्र० । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमो०' (४।३३१)) उ० **केहउ** ।

**[ जेहु ]** यादृक् । प्रथमा सि । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन "दृक्"स्थाने डेह० → एह० इति। 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) जेह । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमो०' (४।३३१)) उ० **जेहु** ।

**[ तेहु ]** तादृक् । प्रथमा सि । अनेन "दृक्"स्थाने डेह० → एह० इति । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) तेह । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमो०' (४।३३१)) उ० **तेहु** ।

**[ एहु ]** ईदृक् । प्रथमा सि । अनेन "दृक्"स्थाने डेह० → एह० इति । 'डित्यन्त्य०' (२।१।११४) ईलुक् । 'सौ पुंस्योद्वा' (४।३३२) ('स्यमो०' (४।३३१)) उ० **एहु** ॥४०२॥

## अतां डइसः ॥ ८।४।४०३ ॥

अपभ्रंशे यादृगादीनामदन्तानां यादृश-तादृश-कीदृशेदृशानां दादेरवयवस्य डिद् अइस इत्यादेशो भवति ॥

जइसो । तइसो । कइसो । अइसो ॥

---

१. H. M. मग्गण ।

**[ अतां डइसः ]** अत् षष्ठी आम् । डइस प्रथमा सि ।

**[ जइसो ]** यादृश । अनेन "दृश"स्थाने डइस० → अइस० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) यइस० । 'आदेर्यो जः' (१।२४५) यइस० → जइस० । 'सौ पुंस्योद्वा' (४।३३२) स० → सो० **जइसो** ।

**[ तइसो ]** तादृश । अनेन "दृश"स्थाने डइस० → अइस० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) तइस० । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) स० → सो० **तइसो** ।

**[ कइसो ]** कीदृश । अनेन "दृश"स्थाने डइस० → अइस० । 'डित्यन्त्य०' (२।१।११४) ईलुक् । 'लोकात्' (१।१।३) कइस० । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) स० → सो० **कइसो** ।

**[ अइसो ]** ईदृश । अनेन "दृश"स्थाने डइस० → अइस० । 'डित्यन्त्य०' (२।१।११४) ईलुक् । 'लोकात्' (१।१।३) अइस० । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) स० → सो० **अइसो** ॥४०३॥

## यत्र-तत्रयोस्त्रस्य डिदेत्थ्वत्तु ॥ ८।४।४०४ ॥

अपभ्रंशे यत्र-तत्रशब्दयोस्त्रस्य एत्थु-अत्तु इत्येतौ डितौ भवतः ॥

जइ सो घडदि प्रयावदी केत्थु-वि लेप्पिणु सिक्खु ।

**जेत्थु**-वि **तेत्थु**-वि एत्थु जगि भण तो [१]तहि सारिक्खु ? ॥१॥

**जत्तु** ठिदो । **तत्तु** ठिदो ॥२॥

**[ यत्रतत्रयोस्त्रस्य ]** यत्र-तत्र षष्ठी ओस् । त्र षष्ठी ङस् ।

**[ डिदेत्थ्वत्तु ]** डित् प्रथमा सि । एत्थु-अत्तु प्रथमा सि ।

**[ जइ सो घडदि प्रयावदी............ ]**

अस्यार्थः- यदि स प्रजापतिः कुत्रापि शिक्षां लात्वा यत्रापि तत्रापि अत्र जगति घटयति **तर्हि भण-कथय** । **तस्याः** सदृक्षीं-सादृश्यं को घटयतीत्यर्थः ।

**[ जेत्थु ]** यत्र । अनेन त्रस्य डेत्थु० → एत्थु० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) येत्थु० । 'आदेर्यो जः' (१।२४५) **जेत्थु**० ।

**[ तेत्थु ]** तत्र । अनेन त्रस्य डेत्थु० → एत्थु० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तेत्थु**० ।

**[ जत्तु ठिदो ]** यत्र । अनेन त्रस्य डत्तु० → अत्तु० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) यत्तु० । 'आदेर्यो जः' (१।२४५) यत्तु० → **जत्तु**० ।

**[ तत्तु ठिदो ]** तत्र । अनेन त्रस्य डत्तु० → अत्तु० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'लोकात्' (१।१।३) **तत्तु**० ॥४०४॥

## एत्थु कुत्रा-ऽत्रे ॥ ८।४।४०५ ॥

अपभ्रंशे कुत्र-अत्र इत्येतयोस्त्रशब्दस्य डित् एत्थु इत्यादेशो भवति ॥

---

१. G. तहे ।

**केत्थु** वि लेप्पिणु सिक्खु । जेत्थु वि तेत्थु वि **एत्थु** जगि ॥

**[ एत्थु कुत्रा-ऽत्रे ]** एत्थु प्रथमा सि । कुत्र-अत्र सप्तमी ङि ।

**[ ........................................ केत्थु-वि लेप्पिणु सिक्खु ।**
**जेत्थु-वि तेत्थु-वि एत्थु जगि............................................ ]** [४।४०४-१] ।

**[ केत्थु ]** कुत्र । अनेन त्रस्य डेत्थु० → एत्थु० इति । 'डित्यन्त्य०' (२।१।११४) उकारलोपः । 'लोकात्' (१।१।३) **केत्थु**० ।

**[ एत्थु ]** अत्र । अनेन त्रस्य डेत्थु० → एत्थु० इति । 'डित्यन्त्य०' (२।१।११४) अकारलोपः । 'लोकात्' (१।१।३) **एत्थु**० ॥४०५॥

## यावत्-तावतोर्वादेर्म-उं-महिं ॥ ८।४।४०६ ॥

अपभ्रंशे यावत्-तावदित्यव्यययोर्वकारादेरवयवस्य म-उं-महिं इत्येते त्रय आदेशा भवन्ति ॥

**जाम** न निवडइ कुंभ-यडि सीह-चवेड-चडक्क ।
**ताम** समत्तहं मयगलहं पइ पइ वज्जइ ढक्क ॥१॥

तिलहं[1] तिलत्तणु **ताउं** पर **जाउं** न नेह गलंति ।
नेहि पणट्ठइ ते जि[2] तिल तिल फिट्टवि खल होंति ॥२॥

**जामहिं** विसमी कज्ज-गई[3] जीवहं मज्झे[4] एइ ।
**तामहिं** अच्छउ इयरु जणु सुअणु-वि अंतरु देइ ॥३॥

**[ यावत्-तावतोर्वादेः ]** यावत्-तावत् षष्ठी ओस् । वादि षष्ठी ङस् ।

**[ म-उं-महिं ]** म-उं-महिं प्रथमा सि ।

**[ जाम न निवडइ कुंभ-यडि.............. ]**

अस्यार्थः- यावत् कुम्भतटे सिंहचपेटाचटत्कारो न निपतति तावत् समस्तानां मदकलानां - गजानां पदे पदे ढक्का वाद्यते इत्यर्थः ।

**[ जाम ]** यावत् । 'आदेर्यो जः' (१।२४५) या० → जा० । अनेन "वत्" स्थाने म० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **जाम-जावँ** ।

**[ ताम ]** तावत् । अनेन "वत्"स्थाने म० । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो वः **ताम-तावँ** ।

**[ तिलहं तिलत्तणु ताउं................... ]**

---

१. ताव च्चिय ढलहलया जाव च्चिय नेहपूरियसरीरा । सिद्धत्था उण छेया नेहविहूणा खलीहुंति ॥
[व० ल० - कुट्टिणीसिक्खावज्जा-५५९।८]
तावदेव मृदुका यावदेव स्नेहपूरितशरीराः । सिद्धार्थाः पुनश्छेकाः स्नेहविहीनाः खलीभवन्ति ॥
ताव च्चिअ गलगिज्जं कुणंति परवाइमत्तमायंगा । चरण-चवेड-चम(ड)क्कं न देइ जाव देव-सूरि-हरी ॥
[पु० प्र०-७१]

२. G. H. M. ज्जि । ३. सर्वमुद्रितेषु - P. गइ । ४. G. मज्झें ।

अस्यार्थः- पर-केवलम् । तिलानां तिलत्वं तावत् यावत् स्नेहा न गलन्ति, स्नेहे प्रनष्टे ते एव तिला **भ्रष्ट्वा खला** भवन्तीत्यर्थः ।

**[ ताउं ]** तावत् । अनेन "वत्"स्थाने उं **ताउं** ।

**[ जाउं ]** यावत् । 'आदेर्यो जः' (१।२४५) यावत्० → जावत्० । अनेन "वत्"स्थाने उं **जाउं** ।

**[ जामहिं विसमी कज्ज-गई................ ]**

अस्यार्थः- यावज्जीवानां मध्ये विषमा कार्यगतिरायाति तावदास्तामितरो जनः, स्वजनोऽप्यन्तरं ददाति - **पृष्ठिं** ददातीत्यर्थः ।

**[ जामहिं ]** यावत् । 'आदेर्यो जः' (१।२४५) यावत्० → जावत्० । अनेन "वत्"स्थाने महिं । **'मोऽनुनासिको वो वा'** (४।३९७) मस्याऽधो वः **जामहिं - जावँहिं** ।

**[ तामहिं ]** तावत् । अनेन "वत्"स्थाने महिं । 'मोऽनुनासिको वो वा' (४।३९७) मस्याऽधो **वः तामहिं - तावँहिं** ॥४०६॥

## वा यत्-तदोऽतोर्डेवडः ॥ ८।४।४०७ ॥

अपभ्रंशे यद्-तद्- इत्येतयोरत्वन्तयोर्यावत्तावतोर्वकारादेरवयवस्य डित् एवड इत्यादेशो वा भवति ॥

**जेवडु** अंतरु रावण-रामहं **तेवडु** अंतरु पट्टण-गामहं ॥ पक्षे- जेत्तुलो । तेत्तुलो ॥

**[ वा यत्तदोऽतोर्डेवडः ]** वा प्रथमा सि । यत्तद् षष्ठी ओस्(ङस्) । अत् षष्ठी ओस् । डेवड प्रथमा सि ।

**[ जेवडु अंतरु रावण-रामहं................ ]** द्विपदम् । यावदन्तरं रावणरामयोः तावदन्तरं पत्तनग्रामयोरित्यर्थः ।

**[ जेवडु ]** यावत् । अनेन वा "वत्"स्थाने डेवड० → एवड० इति । 'डित्यन्त्य०' (२।१।११४) **आलुक्** । 'लोकात्' (१।१।३) येवड० । 'आदेर्यो जः' (१।२४५) येवड० → जेवड० । प्रथमा सि । **'स्यमोरस्योत्' (४।३३१)** जेवड० → **जेवडु०** ।

**[ तेवडु ]** तावत् । अनेन वा "वत्"स्थाने डेवड० → एवड० इति । 'डित्यन्त्य०' (२।१।११४) आलुक् । **'लोकात्'** (१।१।३) तेवड० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) तेवड० → **तेवडु०** । पक्षे-

**[ जेत्तुलो ]** यावत् । 'आदेर्यो जः' (१।२४५) यावत्० → जावत्० । **'अतोर्डेत्तुलः'** (४।४३५) **अत्० → डेत्तुल०** → एत्तुल इति । 'डित्यन्त्य०' (२।१।११४) आव्लुक् **जेत्तुलो** ।

**[ तेत्तुलो ]** तावत् । 'अतोर्डेत्तुलः' (४।४३५) अत्० → डेत्तुल० → एत्तुल इति । **'डित्यन्त्य०' (२।१।११४)** आव्लुक् **तेत्तुलो** ॥४०७॥

## वेदं-किमोर्यादेः ॥ ८।४।४०८ ॥

अपभ्रंशे इदम्-किम् इत्येतयोरत्वन्तयोरियत्-कियतोर्यकारादेरवयवस्य डित् एवड इत्यादेशो वा भवति ॥

**एवडु** अंतरु । **केवडु** अंतरु । पक्षे-**एत्तुलो** । **केत्तुलो** ॥

**[ वेदं-किमोर्याऽऽदेः ]** वा प्रथमा सि । इदम्-किम् षष्ठी ओस् । याऽऽदि षष्ठी ङस् ।

**[ एवडु अंतरु ]** इयदन्तरम् । अनेन "यत्"स्थाने डेवड० → एवड० इति । 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) एवड० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) एवड० → **एवडु०** ।

**[ केवडु अंतरु ]** कियदन्तरम् । अनेन "यत्"स्थाने डेवड० → एवड० इति । 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) केवड० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) केवड० → **केवडु**० । पक्षे-

**[ एत्तुलो ]** इयत् । 'अतोर्डेत्तुलः' (४।४३५) अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) इय्लुक् **एत्तुलो** ।

**[ केत्तुलो ]** कियत् । 'अतोर्डेत्तुलः' (४।४३५) अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) किय्लुक् **केत्तुलो** ॥४०८॥

## परस्परस्याऽऽदिरः ॥ ८।४।४०९ ॥

अपभ्रंशे परस्परस्याऽऽदिरकारो भवति ॥

ते मुग्गडा हराविआ जे परिविट्ठा ताहं ।
**अवरोप्परु** जोअंताहं सामिउ गंजिउ जाहं ॥१॥

**[ परस्परस्याऽऽदिरः ]** परस्पर षष्ठी ङस् । आदि षष्ठी ङस् (प्रथमा सि) । अ प्रथमा सि ।

**[ ते मुग्गडा हराविआ............. ]**

अस्यार्थः- ये तेषां परिवेषितास्ते मुद्गा हारिताः- मुग्धा जाताः । येषां परस्परं युध्यतां सतां स्वामी गञ्जितः-पीडित इत्यर्थः ।

**[ अवरोप्परु ]** परस्पर । अनेन आदौ अकारः । 'नमस्कार-परस्परे द्वितीयस्य' (१।६२) र० → रो० । 'क-ग-ट-ड०' (२।७७) स्लुक् । 'अनादौ०' (२।८९) द्वित्वम् प० → प्प० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) उत्वम् । 'पो वः' (१।२३१) प० → व० **अवरोप्परु** ॥४०९॥

## कादिस्थैदोतोरुच्चारलाघवम् ॥ ८।४।४१० ॥

अपभ्रंशे कादिषु व्यञ्जनेषु स्थितयोः ए-ओ इत्येतयोरुच्चारणस्य लाघवं प्रायो भवति ॥

**सुधें** चिंतिज्जइ माणु । [४।३९६-२] ।

तसु हउं कलिजुगि **दुल्लहहो** । [४।३३८-१] ।

**[ कादिस्थैदोतोरुच्चारलाघवम् ]** कादिस्थ-एत्-ओत् षष्ठी ओस् । उच्चारलाघव द्वितीया अम् ॥४१०॥

## पदान्ते उं-हुं-हिं-हंकाराणाम् ॥ ८।४।४११ ॥

अपभ्रंशे पदान्ते वर्त्तमानानां उं-हुं-हिं-हं इत्येतेषां उच्चारणस्य लाघवं प्रायो भवति ॥

अन्नु जु **तुच्छउं** तहे धणहे । [४।३५०-१] ।

बलि - **किज्जउं** सुअणस्सु । [४।३३८-१] ।

दइवु घडावइ वणि **तरुहुं** । [४।३४०-१] ।

**तरुहुं** वि वक्कलु । [४।३४१-२] ।

खग्ग - विसाहिउ **जहिं** लहहुं । [४।३८६-१] ।

**तणहं** तइज्जी भंगि न - वि । [४।३३९-१] ।

**[ पदान्ते उं-हुं-हिं-हंकाराणाम् ]** पदान्त सप्तमी ङि । उं-हुं-हिं-हंकार षष्ठी आम् ॥४११॥

**म्हो म्भो वा ॥ ८।४।४१२ ॥**

अपभ्रंशे म्ह इत्यस्य स्थाने म्भ इति मकाराक्रान्तो भकारो वा भवति ॥

म्ह इति 'पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः' (२।७४) इति प्राकृतलक्षणविहितोऽत्र गृह्यते, संस्कृते तदसम्भवात् ॥ **गिम्भो** । **सिम्भो** ॥१॥

**बम्भ** ! ते विरला के वि नर जे सव्वंग-छइल्ल ।
जे वंका ते वंचयर जे उज्जुअ ते बइल्ल ॥२॥

**[ म्हो म्भो वा ]** म्ह् षष्ठी ङस् । म्भ प्रथमा सि । वा प्रथमा सि ।

**[ गिम्भो ]** ग्रीष्मन् । 'सर्वत्र०' (२।७९) र्लुक् । 'ह्रस्वः संयोगे' (१।८४) गी० → गि० । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्म० → म्ह० । 'अन्त्य०' (१।११) न्लुक् । अनेन वा म्हस्य म्भ० । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) म्भ० → म्भो० । 'अन्त्य०' (१।११) स्लुक् **गिम्भो** ।

**[ सिम्भो ]** शलेष्मन् । 'सर्वत्र०' (२।७९) ल्लुक् । 'श-षोः सः' (१।२६०) शे० → से० । 'ह्रस्वः संयोगे' (१।८४) से० → सि० । 'पक्ष्म-श्म-ष्म०' (२।७४) ष्म० → म्ह० । 'अन्त्य०' (१।११) न्लुक् । अनेन वा म्ह० → म्भ० । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) म्भ० → म्भो० । 'अन्त्य०' (१।११) स्लुक् **सिम्भो** ।

**[ बम्भ ! ते विरला के वि.............. ]**

अस्यार्थः- हे ब्रह्मन् ! ते केऽपि नरा विरला ये सर्वाङ्गैर्दक्षाः । ये वक्रास्ते वञ्चतराः-अत्यर्थं वञ्चकाः । ये ऋजवस्ते बलीवर्दाः-मूर्खा इत्यर्थः ।

**[ बम्भ ! ]** ब्रह्मन् । प्रथमा सि । 'सर्वत्र०' (२।७९) र्लुक् । 'पक्ष्म-श्म-ष्म०' (२।७४) ह्म० → म्ह० । अनेन वा म्हस्य म्भ० । 'अन्त्य०' (१।११) न्लुक्-स्लुक् च **बम्भ !** ॥४१२॥

**अन्यादृशोऽन्नाइसा-ऽवराइसौ ॥ ८।४।४१३ ॥**

अपभ्रंशे अन्यादृशशब्दस्य अन्नाइस-अवराइस इत्यादेशौ भवतः ॥ **अन्नाइसो** । **अवराइसो** ॥

**[ अन्यादृशोऽन्नाइसा-ऽवराइसौ ]** अन्यादृश् षष्ठी ङस् । अन्नाइस-अवराइस प्रथमा औ ।

**[ अन्नाइसो अवराइसो ]** अन्यादृश । अनेन अन्यादृशस्य अन्नाइस-अवराइस आदेशौ । प्रथमा सि । 'सौ पुंस्योद्वा' (४।३३२) स० → सो० । 'अन्त्यव्य०' (१।११) स्लुक् **अन्नाइसो अवराइसो** ॥४१३॥

**प्रायसः प्राउ-प्राइव-प्राइम्व-पग्गिम्वाः ॥ ८।४।४१४ ॥**

अपभ्रंशे प्रायस् इत्येतस्य प्राउ-प्राइव-प्राइम्व-पग्गिम्व इत्येते चत्वार आदेशा भवन्ति ॥

अन्ने[१] ते दीहर लोअण, अन्नु तं भुअ-जुअलु ।
अन्नु सु घण-थण-हारु, तं अन्नु-जि मुह-कमलु ॥

अन्नु जि केस-कलावु, सु अन्नु जि **प्राउ** विहि ।
जेण निअम्बिणि घडिअ, स गुण-लायण्ण-णिहि ॥१॥

**प्राइव** मुणिहं-वि भ्रं(भं)तडी तें मणिअडा गणंति ।
अखइ निरामइ परम-पइ अज्जु[२]-वि लउ न लहंति ॥२॥

अंसु-जलें **प्राइम्व** गोरिअहे सहि ! उव्वत्ता नयण-सर[३] ।
तें संमुह संपेसिआ देंति तिरिच्छी घत्त पर ॥३॥

एँसी[४] पिउ रूसेसु हउं रुट्ठी मइं अणुणेइ ।
**पग्गिम्व** एइ मणोरहइं दुक्करु दइउ [५]करेइ ॥४॥

**[ प्रायसः प्राउ-प्राइव-प्राइम्व-पग्गिम्वाः ]** प्रायस् षष्ठी ङस् । प्राउ-प्राइव-प्राइम्व-पग्गिम्व प्रथमा जस् ।

**[ अन्ने ते दीहर लोअण........... ]**

अस्यार्थः- ते दीर्घे लोचने अन्ये एव । अन्यदेव तद्भुजयुगलम् । सोऽन्यो घनस्तनभारः । घनो निविडः । तदन्यदेव मुखकमलम् । अन्य एव स केशकलापः । प्रायः स विधिरन्य एव । येन सा नितम्बिनी घटिता । किं० ? सा गुणलावण्यनिधिरित्यर्थः ।

**[ प्राउ ]** प्रायस् । अनेन "प्रायस्"स्थाने **प्राउ**० ।

**[ प्राइव मुणिहं-वि भ्रं( भं )तडी.......... ]**

अस्यार्थः- प्रायो मुनीनामपि भ्रान्तिः, तेन मणीयकान् गणयन्ति । अक्षये निरामये परमपदे अद्यापि लयं न लभन्ते । किं शून्यध्यानेनेत्यर्थः ।

**[ प्राइव ]** प्रायस् । अनेन "प्रायस्"स्थाने **प्राइव**० ।

**[ अंसु-जलें प्राइम्व गोरिअहे.......... ]**

अस्यार्थः- हे सखि ! प्रायो गौर्या अश्रुजलेन नयनसरसी उद्वृत्ते-उल्लटिते[६] सम्मुखे संप्रेषिते पर-केवल तिर्यग्घातं ददत इत्यर्थः ।

---

१. N. टि० छन्द सुरक्षित रखने के लिए **अन्ने** और **ते** उनके अन्त्य स्वरो को ह्रस्व और **तं** को **तँ** बोलना पडेगा ।
२. G. H. M. अज्ज ।
३. N. टि० उदयसौभाग्यगणि, पीशेल, वैद्य आदि सर का अर्थ सरस् सरोवर-झील करते हैं । परंतु संपेसिआ के साथ उसका सम्बन्ध नहीं ठहर पाता । अश्रुजल के कारण दृष्टि-शर की गति सीधी के स्थान पर वक्र दिखती है - या होती है ऐसा अर्थ ही स्वाभाविक लगता है ।
४. आविहिइ पिओ चुंबिहिइ निट्ठुरं चुंबिउण पुच्छिहिइ । दइए कुसल त्ति तुमं नमो नमो ताण दिवसाणं ॥
[व० ल० - पियोल्लाववज्जा-७८४।५]
एष्यति प्रियश्चुम्बिष्यति निष्ठुरं चुम्बित्वा प्रक्ष्यति । दयिते कुशलेति त्वं नमो नमस्तेभ्यो दिवसेभ्यः ॥
५. N. टि० **करेइ** उसे **कारेइ** ऐसा प्रेरक अर्थ में लेना है । ६. H. उल्लसिते ।

**[ प्राइम्व ]** प्रायस् । अनेन "प्रायस्" स्थाने **प्राइम्व०** ।

**[ एसी पिउ रूसेसु हउं................. ]**

अस्यार्थः- प्रिय एष्यति-समागमिष्यति । अहं रुषिष्यामि । रुष्टां मामनुनयति-मनावइ । प्रायो दयित[1] एतान् मनोरथान् दुःकरान् करोति । इष्टकालेऽनागमनादित्यर्थः ।

**[ पग्गिम्व ]** प्रायस् । अनेन "प्रायस्"स्थाने **पग्गिम्व०** ॥४१४॥

## वाऽन्यथोऽनुः ॥ ८।४।४१५ ॥

अपभ्रंशे अन्यथाशब्दस्य अनु इत्यादेशो वा भवति ॥

विरहाणल-जाल-करालियउ पहिउ को-वि बुड्डु(ड्डि)वि ठिअउ ।
**अनु** सिसिर-कालि सीअल-जलहु धूमु कहंतिहु उट्ठिअउ[2] ॥१॥

पक्षे- **अन्नह** ॥

**[ वाऽन्यथोऽनुः ]** वा प्रथमा सि । अन्यथा षष्ठी ङस् । अनु प्रथमा सि ।

**[ विरहाणल-जाल-करालियउ.............. ]**

अस्यार्थः- कोऽपि कविर्जले धूमं दृष्ट्वा आह-कोऽपि पथिको विरहानलज्वालाकरालितः **पीडितो बुडित्वा** स्थितोऽस्ति। अन्यथा शिशिरकाले शीतलजलाद्धूम कुत उत्थित इत्यर्थः ।

**[ अनु अन्नह ]** अन्यथा । अनेन वा "अन्यथा"स्थाने **अनु** । पक्षे- अन्यथा । **प्रथमा सि** । **'अधो म-न-याम्'** (२।७८) य्लुक् । 'अनादौ०' (२।८९) द्वित्वम् । 'ख-घ-थ-ध-भाम्' (१।१८७) **थस्य हः** । **'स्वराणां स्वराः०'** (४।३२९) हा० → ह० **अन्नह** ॥४१५॥

## कुतसः कउ-कहंतिहु ॥ ८।४।४१६ ॥

अपभ्रंशे कुतःशब्दस्य कउ-कहंतिहु इत्यादेशौ भवतः ॥

महु कंतहो गुट्ठट्ठिअहो **कउ** झुंपडा बलंति ।
अह रिउ-रुहिरें उल्हवइ अह अप्पणें[3] न भंति ॥१॥

धूमु **कहंतिहु** उट्ठिअउ ॥२॥

**[ कुतसः कउ-कहंतिहु ]** कुतस् षष्ठी ङस् । कउ-कहंतिहु प्रथमा सि ।

**[ महु कंतहो गुट्ठट्ठिअहो................ ]**

अस्यार्थः- गोष्ठस्थितस्य मम कान्तस्य कुतः कुटीरकाणि ज्वलन्ति ? । **अथ रिपुरुधिरेण विध्यापयति** । अथ आत्मीयेन। न भ्रान्तिरित्यर्थः ।

**[ कउ ]** कुतस् । अनेन "कुतस्"स्थाने **कउ०** ।

**[ धूमु कहंतिहु उट्ठिअउ ]** पूर्वं लिखितम् । [४।४१५-१] ।

**[ कहंतिहु ]** कुतस् । अनेन "कुतस्"स्थाने **कहंतिहु०** ॥४१६॥

---

१. H. दयिता । २. G. उट्ठीअउ । H. J. उट्ठिअओ । ३. G. P. अप्पणएँ । आत्मीय । 'शीघ्रादीनां०' अप्पण । अ । टा ।

## ततस्तदोस्तोः ॥ ८।४।४१७ ॥

अपभ्रंशे ततस्-तदा इत्येतयोस्तो इत्यादेशो भवति ॥

जइ भग्गा पारक्कडा **तो** सहि ! मज्झु पिएण ।
अह भग्गा अम्हहं तणा **तो** तें मारिअडेण ॥१॥

**[ ततस्तदोस्तोः ]** ततस्-तदा षष्ठी ओस् । तो प्रथमा सि ।

**[ जइ भग्गा पारक्कडा........ ]** पूर्वं लिखितम् । [४।३७९-३] ।

**[ तो ]** ततस्-तदा । अनेन उभयत्र **तो**० ॥४१७॥

## एवं-परं-समं-ध्रुवं-मा-मनाक एम्व-पर-समाणु-ध्रुवु-मं-मणाउं ॥ ८।४।४१८ ॥

अपभ्रंशे एवमादीनां एम्वादय आदेशा भवन्ति ॥

॥ एवम एम्व ॥ प्रिय-संगमि कउ निद्दडी ? पिअहो[1] परोक्खहो केम्व ? ।
मइं बिन्नि[2]-वि विनासिआ[3] निद्द न **एम्व** न तेम्व ॥१॥

॥ परमः परः ॥ गुणहिं न संपय कित्ति **पर**........ । [४।३३५] ॥२॥

॥ समम: समाणुः ॥ कंतु जु सीहहो उवमिअइ तं महु खंडिउ माणु ।
सीहु निरक्खय गय हणइ पिउ पय-रक्ख-**समाणु** ॥३॥

॥ ध्रुवमो ध्रुवुः ॥ चंचलु जीविउ **ध्रुवु** मरणु पिअ ! रूसिज्जइ काइं ? ।
हौंसहिं[4] दिअहा रूसणा दिव्वइं वरिस-सयाइं ॥४॥

॥ मो मं ॥ **मं** धणि ! करहि विसाउ । [४।३८५-१] ॥५॥

माणि पणट्ठइ जइ न तणु तो देसडा चइज्ज[5] ।
**मा** दुज्जण-कर-पल्लवेहिं दंसिज्जंतु भमिज्ज ॥६॥

लोणु विलिज्जइ पाणिएण अरि ! खल मेह ! गज्जु ।
बालिउ गलइ सु झुंपडा गोरी तिम्मइ अज्जु ॥७॥

॥ मनाको मणाउं ॥ विहवि पणट्ठइ वंकुडउ रिद्धिहिं जण-सामन्नु ।
किं-पि **मणाउं** महु पिअहो ससि अणुहरइ न अन्नु ॥८॥

**[ एवं-परं-समं-ध्रुवं-मा-मनाकः ]** एवं-परं-समं-ध्रुवं-मा-मनाक् षष्ठी ङस् ।

**[ एम्व-पर-समाणु-ध्रुवु-मं-मणाउं ]** एम्व-पर-समाणु-ध्रुवु-मं-मणाउं प्रथमा जस् ।

**[ प्रिय-संगमि कउ निद्दडी ?........ ]**

अस्यार्थः- प्रियसङ्गमे कुतो निद्रा ? । प्रियस्य परोक्षस्य । सप्तम्याः षष्ठी । प्रिये परोक्षे सति कथं निद्रा ? । मया द्वेऽपि विनाशिते निद्रा न एवं न तथेत्यर्थः ।

---

१. N. टि० "पिअहो परोक्खहो" यहां षष्ठी सति सप्तमी के अर्थ में हैं । २. G. बिण्णि । ३. G. H. I. J. N. P. विन्नासिआ । O. विन्नास = यथास्थान स्थापन० स्थापना० । ४. G. H. I. P. होसइं । ५. G. चएण । N. चइज्ज-भमिज्ज विध्यर्थ है ।

**[ एम्व ]** एवम् । अनेन "एवं"स्थाने **एम्व०** ।

**[ गुणहिं न संपय कित्ति पर........ ]** पूर्वं लिखितम् । [४।३३५-१] ।

**[ पर ]** परम् । अनेन "परं" स्थाने **पर०** ।

**[ कंतु जु सीहहो उवमिअइ.......... ]**

कान्तो यत् सिंहेन सहोपमीयते तन्मम मानः खण्डितः । सिंहो नीरक्षकान्-रक्षपालरहितान् गजान् हन्ति । प्रियः पदरक्षैः समं गजान् हन्तीत्यर्थः ।

**[ समाणु ]** समम् । अनेन "समं"स्थाने **समाणु०** ।

**[ चंचलु जीविउ ध्रुवु मरणु........... ]**

अस्यार्थः- जीवितं चञ्चलम् । मरणं ध्रुवम् । हे प्रिय ! रूष्यते कथम् ? । रोषणस्य दिवसा दिव्यानि वर्षशतानि भविष्यन्तीत्यर्थः ।

**[ ध्रुवु ]** ध्रुवम् । अनेन "ध्रुवं" स्थाने **ध्रुवु०** ।

**[ मं धणि ! करहि विसाउ ]** एकपदम् । अर्थः- हे नायके ! विषादं मा कुरु । [४।३८५-१] ।

**[ मं ]** मा । अनेन मा० → **मं०** ।

प्रायोग्रहणात् - **[ माणि पणट्ठइ जइ न तणु........ ]**

अस्यार्थः- माने प्रनष्टे यदि तनुर्न त्यज्यते[1] ततो देशस्त्यज्यते, परं दुर्जनकरपल्लवैर्दर्श्यमानो मा [2]भ्राम्येत् । न भ्रमतीत्यर्थः ।

**[ मा ]** मा । प्रायोग्रहणात् मा एवं स्थितम् ।

**[ लोणु विलिज्जइ पाणिएण............... ]**

अस्यार्थः- हे मेघ ! मा गर्ज । लवणं लावण्यं पानीयेन विलीयते । ज्वालितो मेघो गलति । अद्य स-कुटीरिका गौरी तिम्यति । भींजइ इत्यर्थः ।

**[ म ]** प्रायोग्रहणात् "मा"स्थाने मा० । 'स्वराणां स्वराः०' (४।३२९) मा० → **म०** ।

**[ विहवि पणट्ठइ वंकुडउ................ ]**

अस्यार्थः- विभवे प्रनष्टे वक्रः । ऋद्धौ जनसामान्यो भवति- सर्वजनतुल्यो भवति । शशी किमपि मम प्रियस्याऽनुहरति-सदृशो भवति मनाक् । अनेन "मनाक्" स्थाने **मणाउं०** ॥४१८॥

### किला-ऽथवा-दिवा-सह-नहेः किरा-ऽहवइ-दिवे-सहुं-नाहिं ॥ ८।४।४१९ ॥

अपभ्रंशे किलाऽऽदीनां किराऽऽदय आदेशा भवन्ति ॥

॥ किलस्य किरः ॥ **किर** न खाइ न पिअइ न विद्दवइ धम्मि न वेच्चइ रूअडउ ।
इह किवणु न जाणइ जइ जमहो खणेण पहुच्चइ दूअडउ ॥१॥

---

१. I. N. त्यजेत् । J. M. त्यजेः । २. H. भ्राम्य । I. N. P. भ्रमेत् । J. M. भ्रमेः ।

॥ अथवोऽहवइ ॥ **अहवइ** न सु-वंसहं एह खोडि ॥२॥

जाइज्जइ तहिं देसडइ लब्भइ पिअहो पमाणु[1] ।
जइ आवइ तो आणियइ **अहवा** तं जि निवाणु ॥३॥

॥ दिवो दिवे ॥ **दिवे[2] दिवे** गंगा-ण्हाणु ॥४॥ [४।३९९]

॥ सहस्य सहुं ॥ जउ[3] पवसंतें न **सहुं** गय न मुअ विओएं तस्सु ।
लज्जिज्जइ संदेसडा दिंतिहिं सुहय-जणस्सु ॥५॥

॥ नहेर्नाहिं ॥ एत्तहे मेह पिअंति जलु एत्तहे वडवानलु आवट्टइ ।
पेक्खु गहीरिम सायरहो एक्क-वि कणिअ **नाहिं** ओहट्टइ ॥६॥

**[ किला-ऽथवा-दिवा-सह-नहेः ]** किल-अथवा-दिवा-सह-नहि षष्ठी ङस् ।

**[ किरा-ऽहवइ-दिवे-सहुं-नाहिं ]** किर-अहवइ-दिवे-सहुं-नाहिं प्रथमा जस् ।

**[ किर न खाइ न पिअइ.............. ]**

अस्यार्थः- किल न खादति । न पिबति । न विद्रवति-ददाति । धर्मे रूपकं न व्ययति । इह कृपणो न जानाति यथा यमस्य दूतः क्षणेन प्रभवतीत्यर्थः ।

**[ किर ]** किल । अनेन किलस्य **किर**० ।

**[ अहवइ न सु-वंसहं एह खोडि ]** एकपदम् ।

अस्यार्थः- अथवा न सुवंशस्य(शानां) एष दोष इत्यर्थः ।

**[ अहवइ ]** अथवा । अनेन "अथवा"स्थाने **अहवइ**० ।

**[ जाइज्जइ तहिं देसडइ..................... ]**

अस्यार्थः- तत्र देशे गम्यते यत्र प्रियस्य प्रमाणं लभ्यते । यद्यागच्छति तत आनीयते, अथवा तदेव निर्वाणं- स एवाऽन्त इत्यर्थः ।

**[ अहवा ]** अथवा । प्रायोऽधिकारात् "अथवा" स्थाने अथ(ह)वैव । 'ख-घ-थ-ध-भाम्' (१।१८७) थस्य हः ।

**[ दिवे दिवे गंगा-ण्हाणु ]** पूर्वं लिखितम् । [४।३९९-१] ।

**[ दिवे ]** दिवा । अनेन "दिवा" स्थाने **दिवे**० ।

**[ जउ पवसंतें न सहुं गय............. ]**

अस्यार्थः- स्त्री कथयति । यत् प्रवसता-प्रवासं कुर्वता सता सह न गता । अथ तस्य वियोगेन न मृता । तर्हि तस्य सुभगजनस्य संदेशान् ददतीभिरस्माभिर्लज्यते इत्यर्थः ।

**[ सहुं ]** सह । अनेन सहस्य **सहुं**० ।

---

१. N. पवाणु । २. H. I. M. दिवि दिवि ।
३. जसुं पवसंत न पवसिया मुइअ वियोइ न जासु । लज्जिज्जउ संदेसडउ दिंती पहिय पियासु ॥ [सं० रा० - ७०] ।

**[ एत्तहे मेह पिअंति जलु.............. ]**

अस्यार्थः- अस्मिन् पक्षे मेघा जलं पिबन्ति । इतो वडवानल आवर्त्तयति - शोषयति । सागरस्य गभीरिमा पश्य । एकापि कणिका नहि अपवर्त्तते - ऊना न भवतीत्यर्थः ।

**[ नाहिं ]** नहि । अनेन सूत्रेण "नहि" स्थाने **नाहिं**० ॥४१९॥

**पश्चादेवमेवैवेदानीं-प्रत्युतेतसः पच्छइ-एवँइ-जि-एवँहिं पच्चलिउ[1]-एत्तहे ॥ ८।४।४२० ॥**

अपभ्रंशे पश्चादादीनां पच्छइ इत्यादय आदेशा भवन्ति ॥

॥ पश्चातः पच्छइ ॥ **पच्छइ** होइ विहाणु ॥१॥ [४।३६२-१] ।

॥ एवमेवस्य एवँइ ॥ **एवँइ** सुरउ समत्तु ॥२॥ [४।३३२-२] ।

॥ एवस्य जि ॥ जाउ म जंतउ पल्लवह देक्खउं कइ पय देइ ।
हिअइ तिरिच्छी हउं **जि** पर पिउ डंबरइं करेइ ॥३॥

॥ इदानीम एवँहिं ॥ हरि नच्चाविउ पंगणइ विम्हइ पाडिउ लोउ ।
**एवँहिं** राह-पओहरहं जं भावइ तं होउ ॥४॥

॥ प्रत्युतस्य पच्चलिउ ॥ [2]साव-सलोणी गोरडी नवखी क-वि विस-गंठि ।
भडु **पच्चलिउ** सो मरइ जासु न लग्गइ कंठि ॥५॥

॥ इतस एत्तहे ॥ **एत्तहे** मेह पिअंति जलु । [४।४१९-६] ।

**[ पश्चादेवमेवैवेदानीं-प्रत्युतेतसः ]** पश्चात्-एवमेव-एव-इदानीम्-प्रत्युत-इतस् षष्ठी ङस् ।

**[ पच्छइ-एवँइ-जि-एवँहिं-पच्चलिउ-एत्तहे ]** पच्छइ-एवँइ-जि-एवँहिं-पच्चलिउ-एत्तहे प्रथमा जस् ।

**[ पच्छइ होइ विहाणु ]** पूर्वं लिखितम् । [४।३६२-१] ।

**[ पच्छइ ]** पश्चात् । अनेन "पश्चात्" स्थाने **पच्छइ**० ।

**[ एवँइ सुरउ समत्तु ]** पूर्वं लिखितम् । [४।३३२-२] ।

**[ एवँइ ]** एवमेव । अनेन एवमेवस्य **एवँइ**० ।

**[ जाउ म [3]जंतउ पल्लवह[4].............. ]**

अस्यार्थः- स्त्री कथयति । यातु यान्तं मा पल्लवत - प्रतिषेधयत । पश्यामि कति पदानि ददाति । हृदये अहमेव तिरश्ची अस्मि । आडी रहउं छउं । परं - केवलं प्रियो डम्बराणि करोति, न तु यास्यतीति शेष इत्यर्थः ।

**[ जि ]** एव । अनेन एवस्य **जि**० ।

---

१. N. पच्चल्लिउ ।

२. सा उप्पडी गट्ठउहि णोक्खी काविं विसगण्ठि । भिडिय पचेल्लिउ सो मरइ जस्स ण लग्गइ कण्ठि ॥[स० क० ३।६२]
सा उत्पन्ना गोष्ठभुवि नवीनैव कापि विषग्रन्थिः । भिद्यते प्रत्युत स म्रियते यस्य न लगति कण्ठे ॥

३. P. म जंतउ = मा रक्षतु यातु । ४. P. पल्लवहुं = पल्लवं वस्त्राऽचलं गृहीत्वा ।

**[ हरि नच्चाविउ पंगणइ............ ]**

अस्यार्थः- प्राङ्गणे हरिर्नर्तितः । लोको विस्मये पातितः । इदानीं राधा-पयोधरयोर्यत् प्रतिभाति तद्भवतु इत्यर्थः ।

**[ एवँहिं ]** इदानीम् । अनेन "इदानीम्" स्थाने **एवँहिं** ।

**[ साव-सलोणी गोरडी.................. ]**

अस्यार्थः- गौरी सर्व-सलावण्या का-अपि नवीना विषग्रन्थिर्यस्य कण्ठे न लगति स भटः - कामुकः प्रत्युत - सम्मुखं म्रियते इत्यर्थः ।

**[ पच्चलिउ ]** प्रत्युत । अनेन प्रत्युतस्य **पच्चलिउ०** ।

**[ एत्तहे मेह पिअंति जलु ]** पूर्वं लिखितम् । [४।४१९-६] ।

**[ एत्तहे ]** इतस् । अनेन "इतस्" स्थाने **एत्तहे०** ॥४२०॥

## विषण्णोक्त-वर्त्मनो वुन्न-वुत्त-विच्चं ॥ ८।४।४२१ ॥

अपभ्रंशे विषण्णादीनां वुन्नादय आदेशा भवन्ति ॥

॥ विषण्णस्य वुन्नः ॥ मइं वुत्तउं तुहुं धुरु धरहि कसरेहिं विगुत्ताइं ।
पइं विणु धवल ! न चडइ भरु एवँइ **वुन्नउ** काइं ॥१॥

॥ उक्तस्य वुत्तः ॥ मइं **वुत्तउं** ॥२॥

॥ वर्त्मनो विच्चः ॥ जं मणु **विच्चि** न माइ ॥३॥ [४।३५०-१] ।

**[ विषण्णोक्त-वर्त्मनः ]** विषण्ण-उक्त-वर्त्मन् षष्ठी ङस् ।

**[ वुन्न-वुत्त-विच्चं ]** वुन्न-वुत्त-विच्च प्रथमा सि ।

**[ मइं वुत्तउं तुहुं धुरु.................. ]**

अस्यार्थः- हे वृषभ ! मया उक्तम् । त्वं धुरं धर । कसारैर्गलिवृषभैर्वयं विगोपिताः । हे धवल ! हे वृषभ ! त्वया विना भारो न चटति । एवमेव विषण्णः कथमित्यर्थः ।

**[ वुन्नउ ]** विषण्ण । अनेन विषण्णस्य वुन्न० । प्रथमा सि ।

**[ मइं वुत्तउं............... ]** पूर्वं कथितम् ।

**[ वुत्तउं ]** उक्त । अनेन उक्तस्य वुत्त० ।

**[ जं मणु विच्चि न माइ ]** पूर्वं लिखितम् । [४।३५०-१] ।

**[ विच्चि ]** वर्त्मन् । सप्तमी ङि । अनेन वर्त्मनो विच्च० । 'ङिनेच्च' (४।३३४) च्च० → च्चि० **विच्चि०** ॥४२१॥

## शीघ्राऽऽदीनां वहिल्लाऽऽदयः ॥ ८।४।४२२ ॥

अपभ्रंशे शीघ्राऽऽदीनां वहिल्लाऽऽदय आदेशा भवन्ति ॥

॥ शीघ्रस्य वहिल्लः ॥ एक्कु कइअ[1] ह-वि न आवहि अन्नु **वहिल्लउ** जाहि ।
मइं मित्तडा ! पमाणिअउ पइं जेहउ खलु नाहिं ॥१॥

॥ झकटस्य घंघलः ॥ [2]जिवँ सु-पुरिस तिवँ **घंघलइं** जिवँ नइ तिवँ वलणाइं ।
जिवँ डुंगर तिवँ कोट्टरइं हिआ ! विसूरहि काइं ॥२॥

॥ अस्पृश्यसंसर्गस्य विट्टालः ॥ जे छड्डेविणु रयणनिहि अप्पउं तडि घल्लंति ॥
तहं संखहं **विट्टालु** परं[3] फुक्किज्जंत भमंति ॥३॥

॥ भयस्य द्रवक्कः ॥ दिवेहिं विढत्तउं खाहि वढ ! संचि म एक्कु-वि द्रम्मु ।
को-वि **द्रवक्कउ** सो पडइ जेण समप्पइ जम्मु ॥४॥

॥ आत्मीयस्य अप्पणः ॥ फोडेंति जे हियडउं **अप्पणउं** । [४।३५०-२] ॥५॥

॥ दृष्टेर्द्रेहिः ॥ [4]एक्कमेक्कउं जइ-वि जोएदि ।

हरि सुट्ठु सव्वायरेण तो-वि **द्रेहि** जहिं कहिं-वि राही ।
को सक्कइ संवरे वि दड्ढ-नयणा नेहें पलुट्टा ॥६॥

॥ गाढस्य निच्चट्टः ॥ विहवे कस्सु थिरत्तणउं जोव्वणि कस्सु मरट्टु ।
सो लेखडउ पठाविअइ जो लग्गइ **निच्चट्टु** ॥७॥

॥ असाधारणस्य सड्ढलः ॥ कहिं ससहरु कहिं मयरहरु कहिं बरिहिणु[5] कहिं मेहु ।
दूर-[6]ठिआहं-वि सज्जणहं होइ **असड्ढलु** नेहु ॥८॥

॥ कौतुकस्य कोड्डः ॥ कुंजरु अन्नहं तरुअरहं **कोड्डेण**[7] घल्लइ हत्थु ।
मणु पुणु एक्कहिं सल्लइहिं जइ पुच्छह परमत्थु ॥९॥

॥ क्रीडायाः खेड्डः ॥ **खेड्डयं** कयमम्मेहिं निच्छयं किं पयंपह ।
अणुरत्ताउ भत्ताउ अम्हे मा चय सामिअ ! ॥१०॥

---

१. G. कइअ हे इत्यामन्त्रणार्थमव्ययम् । G. पा० वाक्यालङ्कारे कोमलामन्त्रणे वा हः - ताटि० ।

२. सह कोज्झरेहिं गिरिणो सरियाओ विचित्तवंकखलिणेहिं । घंघलसएहिं सुयणा विणिम्मिया हयकयंतेण । [पु० च० - ६७]
पुहईचंदचरिए छट्ठे सूरसेण-मुत्तावलीभवे सूरसेण-मुत्तावलीणं जम्मो विवाहो य ।

३. H. I. J. परु ।

४. सव्व गोविउ जइवि जोएइ ।
हरि सुट्टु वि आयरेण देइ दिट्ठि जहिं कहिं वि राही । को सक्कइ संवरेवि डड्ढ-णयण णेहें पलोट्टउ ॥ [स्वयम्भूछन्दस्]

५. I. बरहिणु ।

६. गयणट्ठिओ वि चंदो आसासइ कुमुयसंडाइं । [व० ल०-नेहवज्जा-७७-५]
गगनस्थितोऽपि चन्द्र आश्वासयति कुमुदषण्डानि । दूरट्ठिओ वि चंदो सुणिव्वुइं कुणइ कुमुयाणं । [व० ल०-नेहवज्जा-७८-६]
दूरस्थितोऽपि चन्द्रः सुनिर्वृतिं करोति कुमुदानाम् ।
कत्तो उग्गमइ रई कत्तो वियसंति पंकयवणाइं । सुयणाण जए नेहो न चलइ दूरट्ठियाणं पि ॥ [व० ल०-नेहवज्जा-८०-८]
कुत उद्गच्छति रविः कुतो विकसन्ति पङ्कजवनानि । सुजनानां जगति स्नेहो न चलति दूरस्थितानामपि ॥

७. I. M. कुड्डेण ।

॥ रम्यस्य रवण्णः ॥ [१]सरिहिं न सरेहिं न सरवरेहिं न-वि उज्जाण-वणेहिं ।
देस **रवण्णा** होंति वढ ! निवसंतेहिं सुअणेहिं ॥११॥

॥अद्भुतस्य ढक्करिः ॥ हिअडा ! पइं एहु बोल्लिअउ महु अग्गइ सय-वार ।
फुट्टिसु पिए पवसंते हउं भंडय ! **ढक्करि**-सार ! ॥१२॥

॥ हे सखीत्यस्य हेल्लिः ॥ **हेल्लि !** म झंखहि आलु । [४।३७९-१] ॥१३॥

॥ पृथक् पृथगित्यस्य जुअंजुअः ॥
एक्क कुडुल्ली पंचहिं रुद्धी तहं पंचहं वि **जुअंजुअ** बुद्धी ।
बहिणुए ! तं घरु कहि किवँ नंदउ जेत्थु कुडुंबउं अप्पण-छंदउं ॥१४॥

॥ मूढस्य नालिअ-वढौ ॥

जो पुणु मणि-जि खसफसिहूअउ चिंतइ देइ न दम्मु न रूअउ ।
रइवस-भमिरु करग्गुल्लालिउ धरहिं-जि कोंतु गुणइ सो **नालिउ** ॥१५॥

दिवेहिं विढत्तउं खाहि **वढ !** । [४।४२२-४] ॥१६॥

॥ नवस्य नवखः ॥ **नवखी** क-वि विस-गंठि । [४।४२०-५] ॥१७॥

॥ अवस्कन्दस्य दडवडः ॥ [२]चलेहिं [३]वलंतेहिं लोअणेहिं जे तइं दिट्ठा बालि ! ।
तहिं मयरद्धय-**दडवडउ** पडइ अपूरइ कालि ॥१८॥

॥ यदेश्छुडुः ॥ **छुडु** अग्घइ ववसाउ । [४।३८५-१] ॥१९॥

॥ सम्बन्धिनः केर-तणौ ॥ गयउ सु केसरि पिअहु जलु निच्चिंतइं ! हरिणाइं ! ।
जसु **केरएं** हुंकारडएं मुहहुं पडंति तृणाइं ॥२०॥

अह भग्गा अम्हहं **तणा** । [४।३७९-३] ॥२१॥

॥ मा भैषीरित्यस्य मब्भीसेति स्त्रीलिङ्गम् ॥

सत्थावत्थहं आलवणु साहु-वि लोउ करेइ ।
आदन्नहं **मब्भीसडी** जो सज्जणु सो देइ ॥२२॥

॥ यद् यद् दृष्टं तत्तदित्यस्य जाइट्ठिआ ॥

जइ रच्चसि **जाइट्ठिआए** हिअडा ! मुद्धसहाव ! ।
लोहें फुट्टणएण जिवँ घणा सहेसइ ताव ॥२३॥

---

१. नयरं न होइ अट्टालएहिं पायारतुंगसिहरेहिं । गामो वि होइ नयरं जत्थ छइल्लो जणो वसइ ॥ [व० ल०-छइल्लवज्जा-२७०-१]
नगरं न भवत्यट्टालकैः प्राकारतुङ्गशिखरैः । ग्रामोऽपि भवति नगरं यत्र विदग्धो जनो वसति ॥
२. जत्तो विलोलपम्हलधवलाइं चलंति नवर नयणाइं । आयण्णपूरियसरो तत्तो च्चिय धावइ अणंगो ॥ ।
[ व० ल०-नयणवज्जा-२९४।४]
यतो विलोलपक्ष्मलधवलानि चलन्ति केवलं नयनानि । आकर्णपूरितशरस्तत एव धावत्यनङ्गः ॥
३. H. I. M. चलंतेहिं ।

**[ शीघ्राऽऽदीनां वहिल्लाऽऽदयः ]** शीघ्राऽऽदि षष्ठी आम् । वहिल्लाऽऽदि प्रथमा जस् ।

**[ एक्कु कइअ ह-वि न आवहि.............. ]**

अस्यार्थः- एकं कदापि नागच्छसि । अन्यत् शीघ्रं यासि । हे मित्र ! मया त्वं प्रमाणितो ज्ञातः, त्वया यादृशः खलो नहि इत्यर्थः ।

**[ वहिल्लउ ]** शीघ्र । अनेन वहिल्ल इति । 'अ-डड०' (४।४२९) अप्र० । प्रथमा सि । 'स्यमोर०' (४।३३१) अ० → उ० **वहिल्लउ** ।

**[ जिवँ सु-पुरिस तिवँ घंघलइं.............. ]**

अस्यार्थः- यथा सत्पुरुषा बहवः सन्ति तथा झकटकाः । यथा नद्यस्तथा वलनानि । यथा गिरयस्तथा कोटराणि । तर्हि हे हृदय ! कथं खिद्यसे इत्यर्थः ।

**[ घंघलइं ]** झकटक । अनेन घंघल इति । प्रथमा जस् । 'जस्-शस-इँ-इं-णयः सप्राग्दीर्घाः' (३।२६) जस्० → इं० **घंघलइं** ।

**[ जे छड्डेविणु रयणनिहि.............. ]**

अस्यार्थः- ये रत्ननिधिं मुक्त्वा आत्मानं तटे क्षिपन्ति, पर-केवलं तेषां शङ्खानामस्पृश्यसंसर्ग एव । ये फूत्क्रियमाणा भ्रमन्तीत्यर्थः ।

**[ विट्टालु ]** अस्पृश्यसंसर्ग । अनेन विट्टाल इति । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ल० → लु० **विट्टालु** ।

**[ दिवेहिं विढत्तउं खाहि.................. ]**

अस्यार्थः- हे वढ ! हे मूर्ख ! दैवार्जितं खाद । मा संचिनु एकमपि द्रम्मम् । किमपि तद्भयं पतति येन जन्म समाप्यते इत्यर्थः ।

**[ द्रवक्कउ ]** भय । अनेन द्रवक्क इति । 'अ-डड०' (४।४२९) अप्र० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) अ० → उ० **द्रवक्कउ** ।

**[ फोडेंति जे हियडउं अप्पणउं ]** पूर्वं लिखितम् । [४।३५०-२] ।

**[ अप्पणउं ]** आत्मीय । अनेन अप्पण० । प्रथमा सि । 'स्यमोरस्यो०' (४।३३१) **अप्पणउं** ।

**[ एक्कमेक्कउं जइ वि जोएदि.......... ]**

अस्यार्थः- हरिः सुष्ठु-अत्यर्थः सर्वादरेण एकैकं वस्तु यद्यपि पश्यति ततोऽपि दृष्टिर्यत्र क्वापि राधिका कः शक्नोति संवरीतुं । दग्धनयने स्नेहेन पर्यस्ते व्याकुलिते इत्यर्थः ।

**[ द्रेहि ]** दृष्टि । अनेन "दृष्टि" स्थाने **द्रेहि**० ।

**[ विहवे कस्सु थिरत्तणउं.................. ]**

अस्यार्थः- विभवे कस्य स्थिरत्वम् । यौवने कस्य गर्वः । स लेखः प्रस्थाप्यते यो लगति गाढम् । वियोगिनीवचनमिदमित्यर्थः ।

**[ निच्चट्टु ]** गाढ । अनेन गाढस्य **निच्चट्टु**० ।

**[ कहिं ससहरु कहिं मयरहरु............ ]**

अस्यार्थः- कुत्र शशी ? कुत्र मकरधरः ? कुत्र बर्ही ? कुत्र मेघः ? । दूरस्थितानामपि सज्जनानामसाधारणः स्नेहो भवतीत्यर्थः ।

**[ असड्ढलु ]** असाधारण । अनेन असड्ढल० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) असड्ढल० → **असड्ढलु**० ।

**[ कुंजरु अन्नहं तरुअरहं............... ]**

अस्यार्थः- कुञ्जरोऽन्येषु तरुवरेषु कौतुकेन हस्तं क्षिपति । मनः पुन एकस्यां सल्लक्यां, यदि पृच्छत(थ) परमार्थमित्यर्थः ।

**[ कोड्डेण ]** कौतुक । अनेन कोड्ड इति । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) ड्ड० → ड्डे० **कोड्डेण** ।

**[ खेड्डयं कयमम्हेहिं निच्छयं............. ]**

अस्यार्थः- अस्माभिर्निश्चयं[1] क्रीडा कृता । किं प्रजल्पत[2] ? । हे स्वामिन् ! अनुरक्ता[3] भक्ताः । अस्मान् मा त्यजेत्यर्थः ।

**[ खेड्डयं ]** क्रीडा । अनेन क्रीडायाः खेड्डः । स्वार्थे कप्र० । प्रथमा सि । 'क-ग-च-ज०' (१।१७७) क्लुक् । 'अवर्णो यश्रुतिः' (१।१८०) अ० → य० । 'क्लीबे०' (३।२५) सि० → म्० । 'मोऽनु०' (१।२३) अनुस्वारः **खेड्डयं** ।

**[ सरिहिं न सरेहिं न..................... ]**

अस्यार्थः- सरिद्भिर्नदीभिः सरोभिः सरोवरैर्महत्सरोभिः नाप्युद्यानवनैर्देशा रम्याः । हे वढ ! हे मूर्ख ! निवसद्भिः स्व(सु)जनैर्देशा रम्या भवन्तीत्यर्थः ।

**[ रवण्णा ]** रम्य । अनेन रम्यस्य रवण्ण इति । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) रवण्ण० → रवण्णा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **रवण्णा** ।

**[ हिअडा ! पइं एहु बोल्लिअउ.................... ]**

अस्यार्थः- हे हृदय ! हे भंडय ! हे निर्लज्ज ! हे अद्भुतसार ! त्वया ममाग्रे एतत् शतवारं जल्पितं, प्रियेण प्रवसता सह स्फुटिष्यामीत्यर्थः ।

**[ ढक्करि ]** अद्भुत । अनेन अद्भुतस्य **ढक्करि**० ।

**[ हेल्लि ! म झंखहि आलु ]** पूर्वं लिखितम् । [४।३७९-१] ।

**[ हेल्लि ! ]** हे सखि ! । अनेन "हे सखि !" स्थाने **हेल्लि !** ।

**[ एक्क कुडुल्ली पंचहिं रुद्धी............. ]**

अस्यार्थः- एका कुटी शरीरं पञ्चभिरिन्द्रियै रुद्धा, तेषां पञ्चानां पृथक् (२) । हे भगिनि ! कथय तद् गृहं कथं नन्दतु ? । यत्र कुटुम्बमात्मछन्दकमित्यर्थः ।

**[ जुअंजुअ ]** पृथक् (२) । अनेन **जुअंजुअ**० ।

---

१. P. निच्छयं = निःछद्मं । २. P. प्रजल्पथ । ३. H. अनुरक्तान् भक्तान् ।

**[ जो पुणु मणि-जि खसफसिहूअउ............. ]**

अस्यार्थः- यः पुनर्मनस्येव व्याकुलीभूतः सन् चिन्तयति, द्रम्मं न ददाति न रूपकम् । स मूढो रतिवशेन भ्रमणशीलः सन् कराग्रोल्लालितं कुन्तं-भल्लं गृहे एव गुणयति-चालयतीत्यर्थः ।

**[ नालिउ ]** मूढ । अनेन मूढस्य नालिअ० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) अ० → उ० **नालिउ** ।

**[ दिवेहिं विढत्तउं खाहि वढ ! ]** पूर्वं लिखितम् [४।४२२-४] ।

**[ वढ ! ]** मूढ ! । अनेन मूढस्य **वढ !** ।

**[ नवखी क-वि विस-गंठि ]** पूर्वं लिखितम् । [४।४२०] ।

**[ नवखी ]** नव । अनेन नवस्य **नवख०** ।

**[ चलेहिं वलंतेहिं लोअणेहिं............ ]**

अस्यार्थः- हे बाले ! चलैर्वलमानैश्च लोचनैर्ये त्वया दृष्टास्तेषु मकरध्वजावस्कन्दः कन्दर्पधाटी पतति । कदा ? अपूर्णकाले इत्यर्थः ।

**[ दडवडउ ]** अवस्कन्द । अनेन दडवड० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) **दडवडउ** ।

**[ छुडु अग्घइ ववसाउ ]** पूर्वं लिखितम् । [४।३८५-१] ।

**[ छुडु ]** यदि । अनेन "यदि" स्थाने **छुडु०** ।

**[ गयउ सु केसरि पिअहु जलु............... ]**

अस्यार्थः- हे हरिणाः ! स केसरी गतः । यूयं निश्चिताः सन्तो जलं पिबत । यस्य सम्बन्धिना हुङ्कारेण मुखेभ्यस्तृणानि पतन्तीत्यर्थः ।

**[ केरएं ]** सम्बन्धिन् । अनेन सम्बन्धिनः केर इति । तृतीया टा । 'एं चेदुतः' (४।३४३) टाया एं० **केरएं** ।

**[ अह भग्गा अम्हहं तणा ]** पूर्वं लिखितम् । [४।३७९-३] ।

**[ तणा ]** सम्बन्धिन् । अनेन सम्बन्धिनस्तण इति । प्रथमा जस् । 'जस्-शस्-ङसि-त्तो०' (३।१२) दीर्घः । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **तणा** ।

**[ सत्थावत्थहं आलवणु............ ]**

अस्यार्थः- स्वस्थावस्थानामालपनं सर्वोऽपि लोकः करोति, परमार्त्तानां मा भैषीः इति य आश्वासनो ददाति स सज्जन इत्यर्थः ।

**[ मब्भीसा ]** मा भैषीः । अनेन मा भैषीरित्यस्य **मब्भीसा** ।

**[ जइ रच्चसि जाइट्ठिअए............. ]**

अस्यार्थः- हे हृदय ! हे मुग्धस्वभाव ! यद् यद् दृष्टं तत्तत्त्र यदि रज्यसे तर्त्तहि त्वया लोहेनेव स्फुटता सता घनास्तापाः सहिष्यते इत्यर्थः ।

**[ जाइट्ठिअए ]** यद् यद् दृष्टं तत्तदित्यस्य जाइट्ठिअ । सप्तमी ङि । 'ङिनेच्च' (४।३३४) **जाइट्ठिअए** ॥४२२॥

## हुहुरु-घुग्घ्यादयः शब्द - चेष्टाऽनुकरणयोः ॥ ८।४।४२३ ॥

अपभ्रंशे हुहुर्वादयः शब्दानुकरणे घुग्घ्यादयश्चेष्टानुकरणे यथासंख्यं प्रयोक्तव्याः ॥

मइं जाणिउ बुड्डीसु हउं पेम्म-द्रहि **हुहुरु**-त्ति ।
नवरि अचिंतिय संपडिय विप्पिय-नाव झडत्ति ॥१॥

॥ आदिग्रहणात् ॥ खज्जइ[1] नउ **कसरक्केहिं** पिज्जइ नउ **घुंटेहिं** ।
एवँइ होइ सुहच्छडी पिएं दिट्ठें नयणेहिं ॥२॥

अज्ज-वि नाहु महु-ज्जि घरि सिद्धत्था वंदेइ ।
ताउँ-जि विरहु गवक्खेहिं मक्कड-**घुग्घिउ** देइ ॥३॥

॥ आदिग्रहणात् ॥ सिरि जर खंडी लोअडी गलि मणिअडा न वीस ।
तो-वि गोट्ठडा कराविआ मुद्धए **उट्ठबईस** ॥४॥

**[ हुहुरु-घुग्घ्यादयः ]** हुहुरु-घुग्घ्यादि प्रथमा जस् ।

**[ शब्द-चेष्टाऽनुकरणयोः ]** शब्द-चेष्टाऽनुकरण सप्तमी ओस् ।

**[ मइं जाणिउ बुड्डीसु हउं................ ]**

अस्यार्थः- मया ज्ञातम्, अहं प्रेमह्रदे बुडिष्यामि हुहुरु इति शब्दाऽनुकरणं कृत्वा । नवरं-केवलं मया विप्रियनौः - वियोगे बेडा झटिति सम्पतिता-सम्प्राप्तेत्यर्थः ।

अनेन शब्दाऽनुकरणे **हुहुरु** इति ।

**[ खज्जइ नउ कसरक्केहिं............. ]**

अस्यार्थः- कसरक्कैर्न तु खाद्यते । घुण्टैर्न तु पीयते । एवमेव सुखाशा - समाधिर्भवति । क्व सति ? नयनाभ्यां प्रिये दृष्टे सतीत्यर्थः ।

**[ अज्ज-वि नाहु महु-ज्जि.................... ]**

अस्यार्थः- अद्यापि नाथो ममैव गृहे सिद्धार्थान् वन्दते । अर्थाच्चलितुकामोऽस्ति, तावदेव विरहो गवाक्षेषु मर्कटचेष्टां ददातीत्यर्थः ।

**[ सिरि जर-खंडी लोअडी............... ]**

अस्यार्थः- ततोऽपि मुग्धया गोष्ठं-गोकुलं तत्र तिष्ठन्तीति गोष्ठाः । **तात्स्थ्यात् तद्व्यपदेशः** इति न्यायात् । गोष्ठस्थाः पुरुषा उत्थानोपवेशनं चेष्टानुकरणं कारिताः । यस्याः स्त्रियाः शिरसि जराखण्डिता लोमपटी-जीर्णा कम्बलिका वर्त्तते । यस्य(याः) गले विंशतिर्मणीयका न सन्तीत्यर्थः ॥४२३॥

## घइमादयोऽनर्थकाः ॥ ८।४।४२४ ॥

अपभ्रंशे घइमित्यादयो निपाता अनर्थकाः प्रयुज्यन्ते ॥

---

१. खज्जंति टसत्ति न भंजिऊण पिज्जति नेव घुंटेहिं । तह-वि कुणंति तित्ति आलावा सज्जण-जणस्स ॥ [गा० र०- ८४]

अम्मडि ! पच्छायावडा पिउ कलहिअउ विआलि ।
घइं विवरीरी बुद्धडी होइ विणासहो कालि ॥१॥

आदिग्रहणात् खाइं इत्यादयः ॥

**[ घइमादयोऽनर्थकाः ]** घइमादि प्रथमा जस् । अनर्थक प्रथमा जस् ।

**[ अम्मडि ! पच्छायावडा.............. ]**

हे अम्ब ! पश्चात्तापो वर्त्तते । विकाले-सन्ध्यायां प्रियः कलहायितः- कलहयुक्तो विहितः । विनाशस्य काले विपरीता बुद्धिर्भवतीत्यर्थः ॥४२४॥

## तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः ॥ ८।४।४२५ ॥

अपभ्रंशे तादर्थ्ये द्योत्ये केहिं - तेहिं - रेसि - रेसिं - तणेण इत्येते पञ्च निपाताः प्रयोक्तव्याः ॥

ढोल्ला ! एह परिहासडी अइभण कवणहिं देसि ।
हउं झिज्जउ तउ **केहिं** पिअ ! तुहुँ पुणु अन्नहे **रेसि** ॥१॥

एवं **तेहिं-रेसिमा**वुदाहार्यौ ॥

वड्डत्तणहो तणेण ॥२॥

**[ तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः ]** तादर्थ्य सप्तमी ङि । केहिं-तेहिं-रेसि-रेसिं-तणेण प्रथमा जस् ।

**[ ढोल्ला ! एह परिहासडी................ ]**

अस्यार्थः- हे नायक ! एषा परिभाषा - रीतिः [१]अतिभण-अत्यद्भुता वर्त्तते इति शेषः । हे प्रिय ! अहं तव कृते क्षये - क्षयं प्राप्नोमि त्वं पुनरन्यस्याऽर्थे क्षीयसे इत्यर्थः ।

**[ वड्डत्तणहो तणेण ]** पूर्वं लिखितम् । [४।३६६] । अनेन तादर्थ्ये **तणेण** ॥४२५॥

## पुनर्विनः स्वार्थे डुः ॥ ८।४।४२६ ॥

अपभ्रंशे पुनर्विना इत्येताभ्यां परः स्वार्थे डुः प्रत्ययो भवति ॥

[२]सुमरिज्जइ तं वल्लहउं जं वीसरइ मणाउं ।
जहिं **पुणु** सुमरणु [३]जाउं गउ तहो नेहडो कइं नाउं ? ॥१॥

**विणु** जुज्झें न वलाहुं ॥२॥ [४।३८६-१] ।

**[ पुनर्विनः स्वार्थे डुः ]** पुनर्-विना षष्ठी ङस् । स्वार्थ सप्तमी ङि । डु प्रथमा सि ।

---

१. M. N. अइ भण = अयि भण । P. अइभ = अतिभा - अत्यद्भुता । न-नास्ति ।

२. सो णाम संभरिज्जइ पब्भसिओ जो खणं पि हिअआहि । संभरिअव्वं च कअं गअं अ पेम्मं णिरालम्बं ॥
[गा० स० -१९५]

स नाम संस्मर्यते प्रभ्रष्टो यः क्षणमपि हृदयात् । स्मर्तव्यं च कृतं गतं च प्रेम निरालम्बम् ॥

३. N. जाउ = जातम् ।

**[ सुमरिज्जइ तं वल्लहउं............. ]**

अस्यार्थः- तद्वल्लभं वस्तु स्मर्यते यन्मनाक् विस्मरति । यस्मिन् वस्तुनि पुनः स्मरणं यावद्गतं तस्य स्नेहस्य किं नाम ? न किञ्चिदित्यर्थः ।

**[ पुणु ]** पुनर् । अनेन डुप्र० → उ० । 'डित्यन्त्य०' (२।१।११४) अर्लुक् । 'लोकात्' (१।१।३) पुनु० । 'नो णः' (१।२२८) **पुणु**० ।

**[ विणु जुज्झें न वलाहुं ]** पूर्वं लिखितम् । [४।३८६-१] ।

**[ विणु ]** विना । अनेन डुप्र० → उ० । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) विनु० । 'नो णः' (१।२२८) नु० → णु० **विणु**० ॥४२६॥

## अवश्यमो डें-डौ ॥ ८।४।४२७ ॥

अपभ्रंशेऽवश्यमः स्वार्थे डें-ड इत्येतौ प्रत्ययौ भवतः ॥

जिब्भिंदिउ[1] नायगु वसिकरहु[2] जसु अधिन्नइं अन्नइं ।
मूलि विणट्ठइ तुंबिणिहे **अवसें** सुक्कहिं(इं) पण्णइं ॥१॥

**अवस** न सुअहिं सुहच्छिअहिं ॥२॥ [४।३७६-२] ।

**[ अवश्यमो डें-डौ ]** अवश्यम् षष्ठी ङस् । डें-ड प्रथमा औ ।

**[ जिब्भिंदिउ नायगु वसिकरहु.............. ]**

जिम्हे(ह्वे)न्द्रियं वशे(शी)कुरुत । अन्यानीन्द्रियाणि यस्याधीनानि वर्त्तन्ते इति शेषः । तुम्बिन्या मूले विनष्टे अवश्यं पर्णानि शुष्कन्तीत्यर्थः ।

**[ अवसें ]** अवश्यम् । अनेन डेंप्र० → एं । 'डित्यन्त्य०' (२।१।११४) अम्लुक् । 'अधो म-न-याम्' (२।७८) य्लुक् । 'श-षोः सः' (१।२६०) श० → स० **अवसें** ।

**[ अवस न सुअहिं सुहच्छिअहिं ]** पूर्वं लिखितम् । [४।३७६-२] ।

**[ अवस ]** अवश्यम् । अनेन डप्र० → अ० । 'डित्यन्त्य०' (२।१।११४) अम्लुक् । शेषं पूर्ववत् । **अवस** ॥४२७॥

## एकशसो डिः ॥ ८।४।४२८ ॥

अपभ्रंशे एकशश्शब्दात् स्वार्थे डिर्भवति ॥

**एक्कसि** सील-कलंकिअहं दिज्जहिं पच्छित्ताइं ।
जो पुणु खंडइ अणुदिअहु तसु पच्छित्तें काइं ? ॥१॥

**[ एकशसो डिः ]** एकशस् पञ्चमी ङसि । डि प्रथमा सि ।

---

१. पंचहँ णायकु वसिकरहु जेण होंति वसि अण्ण । मूल विणट्ठइ तरुवरहँ अवसइँ सुक्कहिं पण्ण ॥
[प० प्र० - द्वितीयो महाधिकारः- श्लोकः १४०]
पञ्चानां नायकं वशीकुरुत येन भवन्ति वशे अन्यानि । मूले विनष्टे तरुवरस्य अवश्यं शुष्यन्ति पर्णानि ॥
२. M. वसि करहु = वशे कुरुत । H. वशीकुरु ।

**[ एक्कसि सील-कलंकिअहं.................. ]**

अस्यार्थः- एकशः-एकवारं शीलं कलङ्कितं येषां ते = शीलकलङ्किताः, तेषां = शीलकलङ्कितानामालोचनरूपाणि प्रायश्चित्तानि दीयन्ते । यः पुनः अनुदिवसं खण्डयति तस्य प्रायश्चित्तेन किमित्यर्थः ।

**[ एक्कसि ]** एकशः । 'तैलादौ' (२।९८) द्वित्वं-क्क० । 'श-षोः सः' (१।२६०) श० → स० । अनेन डिप्र० → इ० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) **एक्कसि** ॥४२८॥

## अ-डड-डुल्लाः स्वार्थिक-कलुक् च ॥ ८।४।४२९ ॥

अपभ्रंशे नाम्नः परतः स्वार्थे अ-डड-डुल्ल इत्येते त्रयः प्रत्यया भवन्ति, तत्संनियोगे स्वार्थिकस्य कप्रत्ययस्य लोपश्च ॥

॥ अ ॥ विरहाणल-जाल-**करालिअउ** पहिउ पंथि जं **दिट्ठउ** ।
तं मेलवि सव्वहिं पंथिअहिं सो-जि किअउ **अग्गिट्ठउ** ॥१॥

॥ डड ॥ महु कंतहो बे **दोसडा** ॥२॥ [४।३७९-१] ।

॥ डुल्ल ॥ एक्क **कुडुल्ली** पंचहिं रुद्धी ॥३॥ [४।४२२-१४] ।

**[ अ-डड-डुल्लाः ]** अ-डड-डुल्ल प्रथमा जस् ।

**[ स्वार्थिककलुक् च ]** स्वार्थिककलुक् प्रथमा सि । च प्रथमा सि ।

**[ विरहाणल-जाल-करालिअउ................. ]**

अस्यार्थः- पथि मार्गे पथिको विरहानलज्वालाकरालितः पीडितो यस्माद् दृष्टः, तं तस्मात् सर्वैरपि पथिकैर्मिलित्वा स एव पथिकोऽग्निष्ठः कृतः । लोके तु अंगीठउ इति प्रतीतिरित्यर्थः ।

**[ अग्गिट्ठउ ]** अग्निष्ठ । 'अधो म-न-याम्' (२।७८) न्लुक् । 'अनादौ०' (२।८९) गस्य द्वित्वम् । 'ष्टस्याऽनुष्ट्रे०' (२।३४) ष्टस्य ठः । 'अनादौ०' (२।८९) ठस्य द्वित्वम् । 'द्वितीय-तु०' (२।९०) पूर्वठस्य टः । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० । अनेन अप्रत्ययः-कस्य च लुक् । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) अ० → उ० । 'अन्त्यव्य०' (१।११) स्लुक् **अग्गिट्ठउ** ।

**[ महु कंतहो बे दोसडा ]** पूर्वं लिखितम् । [४।३७९-१] ।

**[ दोसडा ]** दोष । अनेन डडप्र० → अड इति । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) दोषड० । 'श-षोः सः' (१।२६०) ष० → स० । 'द्विवचनस्य बहुवचनम्' (३।१३०) बहुवचनम् । प्रथमा जस् । 'जस्-शस्-ङसि०' (३।१२) दीर्घः-ड० → डा० । 'जस्-शसोर्लुक्' (३।४) जस्लुक् **दोसडा** ।

**[ एक्क कुडुल्ली पंचहिं रुद्धी ]** पूर्वं लिखितम् । [४।४२२-१४] ।

**[ कुडुल्ली ]** कुटी । अनेन डुल्लप्र० → उल्ल० । 'डित्यन्त्य०' (२।१।११४) ईलुक् । 'लोकात्' (१।१।३) कुटुल्ल० । 'टो डः' (१।१९५) कुडुल्ल० । 'स्त्रियां तदन्ताड्डीः' (४।४३१) डीप्र० → ई० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) ल्ली० **कुडुल्ली** ॥४२९॥

## योगजाश्चैषाम् ॥ ८।४।४३० ॥

अपभ्रंशे अ-डड-डुल्लानां योगभेदेभ्यो ये जायन्ते डडअ इत्यादयः प्रत्ययास्तेऽपि स्वार्थे प्रायो भवन्ति ॥

॥ डडअ ॥ फोडेंति जे **हियडउं** अप्पणउं ॥१॥ [४।३५०-२] । अत्र 'किसलय०' (१।२६९) इत्यादिना यलुक् ।

॥ डुल्लअ ॥ **चूडुल्लउ** चुण्णीहोइसइ ॥२॥ [४।३९५-२] ।

॥ डुल्ल-डड ॥ सामि - पसाउ स-लज्जु पिउ सीमा-संधिहिं वासु ।
पेक्खिवि **बाहु-बलुल्लडा** धण मेल्लइ नीसासु ॥३॥

अत्राऽमि 'स्यादौ दीर्घह्रस्वौ' (४।३३०) इति दीर्घः । एवं **बाहुबलुल्लडउ** ॥४॥ अत्र त्रयाणां [डुल्ल-डड-अ] योगः ॥

**[ योगजाश्चैषाम् ]** योगज प्रथमा जस् । च प्रथमा सि । एतद् षष्ठी आम् ।

**[ फोडेंति जे हिअडउं अप्पणउं ]** पूर्वं लिखितम् । [४।३५०-२] ।

**[ हिअडउं ]** हृदय । 'इत्कृपादौ' (१।१२८) हृ० → हि० । 'क-ग-च-ज०' (१।१७७) द्लुक् । 'किसलय-कालायस-हृदये यः' (१।२६९) यलुक् । अनेन डडअप्र० → अडअ इति । 'डित्यन्त्य०' (२।१।११४) अलुक् । द्वितीया अम् । 'स्यमोरस्योत्' (४।३३१) अ० → उ० । 'अमोऽस्य' (३।५) अलुक् **हिअडउं** ।

**[ चूडुल्लउ चुण्णीहोइसइ ]** पूर्वं लिखितम् । [४।३९५-२] ।

**[ चूडुल्लउ ]** चूडा । अनेन डुल्लअप्र० → उल्लअ इति । 'डित्यन्त्य०' (२।१।११४) आलुक् । 'लोकात्' (१।१।३) चूडुल्लअ । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) अ० → उ० । 'अन्त्य०' (१।११) स्लुक् **चूडुल्लउ** ।

**[ सामि-पसाउ स-लज्जु............... ]**

अस्यार्थः- स्वामिप्रसादः, सलज्जः, प्रियः, सीमासन्धौ वासः, बाहुबलं प्रेक्ष्य धण इति नायिका निःश्वासं मुञ्चतीत्यर्थः ।

**[ बाहुबलुल्लडा ]** बाहुबल । अनेन डुल्लडडप्र० → उल्लअड इति । उभयत्र 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) बाहुबलुल्लड० । द्वितीया अम् । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) ड० → डा० । 'स्यम्-जस्-शसां लुक्' (४।३४४) अम्लुक् **बाहुहलुल्लडा** ।

**[ बाहुबलुल्लडउ ]** बाहुबल । अनेन डुल्लडडअप्र० → उल्लडअ इति । उभयत्र 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) बाहुबलुल्लडअ । 'स्यमोरस्योत्' (४।३३१) अ० → उ० । 'अमोऽस्य' (३।५) अलुक् । 'मोऽनुस्वारः' (१।२३) अनुस्वारः । **बाहुबलुल्लडउं** इत्यपि पाठः ॥४३०॥

## स्त्रियां तदन्ताड्डीः ॥ ८।४।४३१ ॥

अपभ्रंशे स्त्रियां वर्तमानेभ्यः प्राक्तनसूत्रद्वयोक्तप्रत्ययान्तेभ्यो डीः प्रत्ययो भवति ॥

पहिआ ! दिट्ठी **गोरडी** ? दिट्ठी मग्गु निअंत ।
अंसूसासेहिं कंचुआ तिंतुव्वाण[१] करंत ॥१॥

एक्क **कुडुल्ली** पंचहिं रुद्धी ॥२॥ [४।४२२-१४] ।

**[ स्त्रियां तदन्ताड्डीः ]** स्त्री सप्तमी ङि । तदन्त पञ्चमी ङसि । डी प्रथमा सि ।

**[ पहिआ ! दिट्ठी गोरडी ?............ ]**

१. G. तिंतोव्वाण ।

अस्यार्थः- हे पथिक ! गौरी दृष्टा, मयेति गम्यते । किंकुर्वती दृष्टा ? मार्गं पश्यती । पुनः किंकुर्वती ? अश्रु-उत्श्वा(उच्छ्वा)साभ्यां कञ्चुकं-तिमितोद्वानं आर्द्र-शुष्कं कुर्वतीत्यर्थः ।

**[ गोरडी ]** गोरी । 'अ-डड-डुल्लाः स्वार्थिक०' (४।४२९) डडप्र० → अड इति । 'डित्यन्त्य०' (२।१।११४) ईलुक् । अनेन डीप्र० → ई० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) गोरडी । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **गोरडी** ।

**[ एक्क कुडुल्ली पंचहिं रुद्धी ]** पूर्वं लिखितम् । [४।४२२-१४] ।

**[ कुडुल्ली ]** कुटी । 'टो डः' (१।१९५) टी० → डी० । 'अ-डड-डुल्लाः०' (४।४२९) डुल्लप्र० → उल्ल० । 'डित्यन्त्य०' (२।१।११४) ईलुक् । अनेन डीप्र० → ई० । 'डित्यन्त्य०' (२।१।११४) अलुक् **कुडुल्ली** ॥४३१॥

## आन्तान्ताड्डाः ॥ ८।४।४३२ ॥

अपभ्रंशे स्त्रियां वर्तमानादप्रत्ययान्त-प्रत्ययान्तात् डाप्रत्ययो भवति ॥ ड्यपवादः ॥

पिउ आइउ सुअ वत्तडी झुणि कन्नडइ पइट्ठ ।
तहो विरहहो नासंतअहो **धूलडिआ**-वि न दिट्ठ ॥१॥

**[ आन्तान्ताड्डाः ]** अप्रत्ययोऽन्ते यस्य स आन्तः । डडादिः आन्तप्रत्ययोऽन्ते यस्य तद् आन्तान्तम्, तस्मात् = आन्तान्तात् । डा प्रथमा सि ।

**[ पिउ आइउ सुअ वत्तडी............ ]**

अस्यार्थः- प्रिय आगतः [इति] वार्त्ता श्रुता । ध्वनिः कर्णे प्रविष्टः । तस्य विरहस्य नश्यतः सतः धूलिरपि न दृष्टेत्यर्थः ।

**[ धूलडिआ ]** धूलि । 'अ-डड-डुल्लाः०' (४।४२९) डडप्र० → अड इति । 'डित्यन्त्य०' (२।१।११४) इलुक् । 'लोकात्' (१।१।३) धूलड । अनेन डाप्र० → आ इति । 'अस्येदे' (४।४३३) ड० → डि० । प्रथमा सि । 'स्यम्-जस्-शसां लुक्' (४।३४४) सिलुक् **धूलडिआ** ॥४३२॥

## अस्येदे ॥ ८।४।४३३ ॥

अपभ्रंशे स्त्रियां वर्तमानस्य नाम्नो योऽकारस्तस्य आकारे प्रत्यये परे इकारो भवति ।

**धूलडिआ** वि न दिट्ठ ॥१॥ [४।४३२-१] । स्त्रियामित्येव- झुणि **कन्नडइ** पइट्ठ ॥२॥ [४।४३२-१] ।

**[ अस्येदे ]** अ षष्ठी ङस् । इत् प्रथमा सि । आ सप्तमी ङि ।

**[ धूलडिआ वि न दिट्ठ ]** पूर्वं लिखितमत्र साधितं च ॥

**[ झुणि कन्नडइ पइट्ठ ]** पूर्वं लिखितम् । अत्र कर्णशब्दस्य पुल्लिङ्गत्वात् कण्णड इति न भवति ॥४३३॥

## युष्मदादेरीयस्य डारः ॥ ८।४।४३४ ॥

अपभ्रंशे युष्मदादिभ्यः परस्य ईयप्रत्ययस्य डार इत्यादेशो भवति ॥

संदेसें[१-२] काइं **तुहारेण** ? जं संगहो न मिलिज्जइ ।
सुइणंतरि पिएं पाणिएण पिअ ! पिआस किं छिज्जइ ? ॥१॥

दे[३]क्खु **अम्हारा** कंतु ॥२॥ [४।३४५-१] ।

बहिणि ! **महारा** कंतु ॥३॥ [४।३५१-१] ।

**[ युष्मदादेरीयस्य डारः ]** युष्मदादि पञ्चमी ङसि । ईय षष्ठी ङस् । डार प्रथमा सि ।

**[ संदेसें काइं तुहारेण ?............ ]**

अस्यार्थः- युष्मदीयेन संदेशेन किम् ? यद्-यस्मात् संगाय न मिल्यते । हे प्रिय ! स्वप्नान्तरे पीतेन पानीयेन किं पिपासा-तृषा छिद्यते ? । अपितु नेत्यर्थः ।

**[ तुहारेण ]** युष्मदीय । अनेन ईयस्य डार० → आर इति । 'युष्मदः सौ०' (४।३६८) ('तइ-तु-ते०' (३।९९) ) युष्मद्० → तुह० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) तुहार० । तृतीया टा । 'टा-आमोर्णः' (३।६) टा० → ण० । 'टाण-शस्येत्' (३।१४) र० → रे० **तुहारेण** ।

**[ देक्खु अम्हारा कंतु ]** पूर्वं लिखितम् [४।३४५-१] ।

**[ अम्हारा ]** अ[४]स्मदीय । 'अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना' (३।१०५) अस्मद्० → अम्हि० ('मे-मइ-मम०' (३।११३) अम्ह०) । अनेन ईयस्य डार० → आर० । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः । 'लोकात्' (१।१।३) अम्हार । द्वितीया अम् । 'स्यादौ दीर्घ-ह्रस्वौ' (४।३३०) र० → रा० । 'स्यम्-जस्०' (४।३४४) अम्लुक् **अम्हारा** ॥४३४॥

## अतोर्डेत्तुलः ॥ ८।४।४३५ ॥

अपभ्रंशे इदम् - किम्-यत्-तद्-एतद्भ्यः परस्य अतोः प्रत्ययस्य डेत्तुल इत्यादेशो भवति ॥

एत्तुलो । केत्तुलो । जेत्तुलो । तेत्तुलो । एत्तुलो ॥

**[ अतोर्डेत्तुलः ]** अतु षष्ठी ङस् । डेत्तुल प्रथमा सि ।

**[ एत्तुलो ]** इयत् । अनेन अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) इय्लुक् **एत्तुलो** - इयान् ।

**[ केत्तुलो ]** कियत् । अनेन अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) इय्लुक् **केत्तुलो**-कियान् ।

**[ जेत्तुलो ]** यावत् । 'आदेर्यो जः' (१।२४५) यावत्० → जावत्० । अनेन अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) आव्लुक् **जेत्तुलो** - यावान् ।

**[ तेत्तुलो ]** तावत् । अनेन अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) आव्लुक् **तेत्तुलो** - तावान् ।

**[ एत्तुलो ]** एतावत् । अनेन अत्० → डेत्तुल० → एत्तुल० । 'डित्यन्त्य०' (२।१।११४) एताव्लुक् **एत्तुलो**-एतावान् ॥४३५॥

---

१. अविअण्हपेक्खणिज्जेण तक्खणं मामि ! तेण दिट्ठेण । सिविणअपीएण व पाणिएण तण्ह च्चिअ ण फिट्टा ॥
[गा० स० - १।९३]

अवितृष्णप्रेक्षणीयेन तत्क्षणं मामि ! तेन दृष्टेन । स्वप्नपीतेनेव पानीयेन तृष्णैव न भ्रष्टा ॥

२. G. संदेसएं । ३. G. दिक्खु । P. देक्खि । ४. G. अस्मदीय । 'पक्ष्म-श्म०' (२।७४) स्म० → म्ह० ।

## त्रस्य डेत्तहे ॥ ८।४।४३६ ॥

अपभ्रंशे सर्वादेः सप्तम्यन्तात् परस्य त्रप्रत्ययस्य डेत्तहे इत्यादेशो भवति ॥

**एत्तहे तेत्तहे** वारि घरि लच्छी विसंठुल धाइ ।
पिअ-पब्भट्ठु[1] व गोरडी निच्चल कहिँ - वि न ठाइ ॥१॥

**[ त्रस्य डेत्तहे ]** त्र षष्ठी ङस् । डेत्तहे प्रथमा सि ।

**[ एत्तहे तेत्तहे वारि घरि............ ]**

अस्यार्थः- अत्र तत्र द्वारे गृहे लक्ष्मीर्विसंस्थुला भवति । प्रिय-प्रभृ(भ्र)ष्टा गौरीव कुत्रापि निश्चला न तिष्ठतीत्यर्थः ।

**[ एत्तहे ]** अत्र । अनेन त्रस्य डेत्तहे० → एत्तहे० इति । 'डित्यन्त्य०' (२।१।११४) अलुक् **एत्तहे** ।

**[ तेत्तहे ]** तत्र । अनेन त्रस्य डेत्तहे० → एत्तहे० इति । 'डित्यन्त्य०' (२।१।११४) तस्य अलुक् । 'लोकात्' (१।१।३) **तेत्तहे** ॥४३६॥

## त्व-तलोः प्पणः ॥ ८।४।४३७ ॥

अपभ्रंशे त्व-तलोः प्रत्यययोः प्पण इत्यादेशो भवति ॥

**वड्डप्पणु** पर[2] पाविअइ ॥१॥ [४।३६६-१] । प्रायोऽधिकारात् **वड्डत्तणहो** तणेण ॥२॥ [४।३६६-१] ।

**[ त्वतलोः प्पणः ]** त्व-तल् षष्ठी ओस् । प्पण प्रथमा सि ।

**[ वड्डप्पणु पर पाविअइ ]** पूर्वं लिखितम् । वृद्धत्व । शीघ्रादित्वाद् वृद्धस्य वड्ड० । अनेन त्वस्य प्पण० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) ण० → णु० । 'अन्त्य०' (१।१।११) स्लुक् **वड्डप्पणु** ।

**[ वड्डत्तणहो तणेण ]** पूर्वं लिखितम् । वृद्धत्व । प्रायोऽधिकारात् 'त्वस्य डिमा-त्तणौ वा' (२।१५४) त्वस्य त्तण० । षष्ठी ङस् । 'ङसः सु-हो-स्सवः' (४।३३८) ङस्० → हो० **वड्डत्तणहो** । वृद्धत्वस्थाने वड्ड इति ॥४३७॥

## तव्यस्य इएव्वउं-एव्वउं-एवा ॥ ८।४।४३८ ॥

अपभ्रंशे तव्यप्रत्ययस्य इएव्वउं - एव्वउं - एवा इत्येते त्रय आदेशा भवन्ति ॥

॥ इएव्वउं ॥ एउ गृण्हेप्पिणु ध्रुं मइं जइ प्रिउ उव्वारिज्जइ ।
महु **करिएव्वउं** किं-पि न-वि **मरिएव्वउं** पर दिज्जइ[3] ॥१॥

॥ एव्वउं ॥ देसुच्चाडणु[4] सिहि-कढणु घण-कुट्टणु जं लोइ ।
मंजिट्ठए अइ-रत्तिए[5] सव्वु **सहेव्वउं** होइ ॥२॥

---

१. P. पब्भट्ठा । २. I J. M. परि । ३. G. I. N. देज्जइ ।
४. कंदुक्खणणं निअदेसछड्डणं कुट्टणं च अइकढणं । अइरत्ते मंजिट्ठे किं दुक्खं जं न पाविहसि ॥ [म० क० - १२९]
[सम्मत्तलंभो णाम बीओ अवसरो तत्थ य दुगुंछाए सुहंकतकहा]
४. कंदुक्खणणं निअदेसछंडणं कुट्टणं च कढणं च । अइरत्ता मंजिट्ठा किं दुक्खं जं न पावेइ ? ॥
[सु० सा० - विमलश्री-देदस्वर्गगमनप्रबन्धे द्वितीयस्तरङ्गः-३४]
कन्दोत्खननं निजदेशत्यजनं कुट्टनञ्च क्वथनञ्च । अतिरक्ता मञ्जिष्ठा किं दुःखं यन्न प्राप्नोति ॥
५. I. N. रत्तिअए ।

॥ एवा ॥ [1]**सोएवा** पर [2]वारिआ पुप्फवईहिं समाणु ।
**जग्गेवा** पुणु को धरइ ? जइ सो वेउ पमाणु ॥३॥

**[ तव्यस्य इएव्वउं-एव्वउं-एवा ]** तव्य षष्ठी ङस् । इएव्वउं-एव्वउं-एवा प्रथमा जस् ।

**[ एउ गृण्हेप्पिणु ध्रुं मइं............... ]**

अस्यार्थः- केनापि सिद्धपुरुषेण विद्यासिद्धये नायिकां प्रति धनादिकं दत्त्वा भर्तरि प्रार्थिते नायिका उक्तिरियम् । एतद् गृहीत्वा यन्मया यदि प्रिय [3]उद्धार्यते - त्यज्यते तर्हि मम कर्तव्यं किमपि नापि पर-केवलं मर्तव्यमेव दीयते इत्यर्थः ।

**[ करिएव्वउं ]** कृ-तव्यप्र० । 'ऋवर्णस्या०' (४।२३४) कर० । 'व्यञ्जना०' (४।२३९) अत् । 'लोकात्' (१।१।३) करतव्य० । 'एच्च क्त्वा-तुम्-तव्य०' (३।१५७) इत्वम् । अनेन तव्यस्य एव्वउं **करिएव्वउं** ।

**[ मरिएव्वउं ]** मृ-तव्यप्र० । अनेन तव्यस्य इएव्वउं । शेषं पूर्ववत् । **मरिएव्वउं** ।

**[ देसुच्चाडणु सिहिकढणु................ ]**

अस्यार्थः- देशोच्चाटनं - देशपरित्यागः, शिखिक्वथनम्-अग्नितापः, घनकुट्टनं यल्लोके वर्त्तते तत्सर्वं मञ्जिष्ठया अतिरक्तया सोढव्यम् । एतावता अतिरक्तत्वं विरूपमित्यर्थः ।

**[ सहेव्वउं ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै०' (२।३।९८) सह् । तव्यप्र० । अनेन तव्यस्य एव्वउं **सहेव्वउं** ।

**[ सोएवा पर वारिआ.................. ]**

अस्यार्थः- पुष्पवतीभिः - ऋतुमतीभिः समं स्वपितव्यं परं वारितं, ताभिः समं पुनर्जागर्त(रित)व्यं को बिभर्ति ? यदि स वेदः प्रमाणमित्यर्थः ।

**[ सोएवा ]** स्वप्-तव्यप्र० । 'अन्त्यव्य०' (१।११) प्लुक् । 'स्वपावुच्च' (१।६४) स्व० → सो० । अनेन तव्यस्य एवा० **सोएवा** ।

**[ जग्गेवा ]** जागृ-तव्यप्र० । 'जाग्रेर्जग्गः' (४।८०) जागृ० → जग्ग० । अनेन तव्यस्य एवा० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **जग्गेवा** ॥४३८॥

### क्त्व इ-इउ-इवि-अवयः ॥ ८।४।४३९ ॥

अपभ्रंशे क्त्वाप्रत्ययस्य इ-इउ-इवि-अवि इत्येते चत्वार आदेशा भवन्ति ॥

हिअडा ! जइ वेरिअ घणा तो किं अब्भि चडाहुं ? ।
[4]अम्हहं बे हत्थडा जइ पुणु **मारि** मराहुं ॥१॥

गय-घड **भज्जिउ** जंति ॥२॥ [४।३९५-५] ।

१. लोओ जूरउ जूरइ वअणिज्जं होइ होउ तं णाम । एहि णिमज्जसु पासे पुप्फवइ ण एइ मे णिद्दा ॥ [गा० स० - ६।२९]
लोकः खिद्यते खिद्यतु(तां) वचनीयं भवति भवतु तन्नाम । एहि निमज्ज पार्श्वे पुष्पवति ! नैति मे निद्रा ॥
२. P. परिवारिआ = परिवारितं निषिद्धं समस्ति । ३. H. उद्वर्त्यते । ४. I. N. अम्हाहं । G. H. P. अम्हाहिं । अस्मद् । आम् । अम्हहं भ्यसाम्भ्याम् । 'स्वराणां०' आत्वं-इत्वं च । ।

रक्खइ सा विस-हारिणि बे कर **चुम्बिवि** जीउ ।
पडिबिम्बिअ-मुंजालु जलु जेहिं अ-डोहिउ पीउ ॥३॥

बाह **विछोडवि** जाहि तुहुँ हउं तेवँ-इ को दोसु ? ।
हिअय-ट्ठिउ जइ नीसरहि जाणउं मुंज ! स-रोसु ॥४॥

**[ क्त्व इ-इउ-इवि-अवयः ]** क्त्वा षष्ठी ङस् । इ-इउ-अवि प्रथमा जस् ।

**[ हिअडा ! जइ वेरिअ घणा.............. ]**

अस्यार्थः- हे हृदय ! यदि रिपवो घनास्ततः किं आकाशे आरुहामः ? अस्माकं द्वौ हस्तौ । यदि पुनर्म्रियामहे तर्हि मारयित्वेत्यर्थः ।

**[ मारि ]** मृ-णिग्प्र० । 'ऋवर्णस्या०' (४।२३४) मर० । णित्त्वाद् वृद्धिः - म० → मा० । मारणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । अनेन क्त्वाप्रत्ययस्य इ० । 'लोकात्' (१।१।३) रि० **मारि** ।

**[ गय-घड भज्जिउ जंति ]** पूर्वं लिखितम् [४।३९५-५] ।

**[ भज्जिउ ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । क्त्वाप्र० । 'तक्ष्यादीनां छोल्लादयः' (४।३९५) भञ्ज० → भज्ज० । अनेन क्त्वाप्रत्ययस्य इउ० । 'लोकात्' (१।१।३) **भज्जिउ०** ।

**[ रक्खइ सा विस-हारिणि................ ]**

अस्यार्थः- सा विषहारिणी पानीयहारिका तौ करौ चुम्बित्वा जीवितं रक्षति । तौ कौ ? याभ्यां कराभ्यां प्रतिबिम्बितमुञ्जालं जलमनवगाह्य पीतमित्यर्थः ।

**[ चुम्बिवि ]** 'चुबुकि चुम्बने' (          ) ('चुबु वक्त्रसंयोगे' (३७१) ) चुब् । 'उदितः स्वरा०' (४।४।९८) नोऽन्तः । चुम्बनं पूर्वम् । क्त्वाप्र० । अनेन क्त्वा० → इवि० । 'लोकात्' (१।१।३) **चुम्बिवि०** ।

**[ बाह विछोडवि जाहि तुहुं................ ]**

अस्यार्थः- मम बाहू वि[1]च्छोड्य त्वं यासि । भवतु । तथा को दोषः ? । हे मुञ्ज ! हृदयस्थितस्त्वं यदि निःसरसि तर्हि जाने सरोष इत्यर्थः ।

**[ विछोडवि ]** विपूर्व० 'मुच्लृंती मोक्षणे' (१३२०) मुच् । 'तक्ष्यादीनां छोल्लादयः' (४।३९५) विमुच्० → विछोड० । क्त्वाप्र० । अनेन क्त्वा० → अवि० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) डवि० **विछोडवि** ॥४३९॥

**एप्प्येप्पिण्वेव्येविणवः ॥ ८।४।४४० ॥**

अपभ्रंशे क्त्वाप्रत्ययस्य एप्पि-एप्पिणु-एवि-एविणु इत्येते चत्वार आदेशा भवन्ति ॥

**जेप्पि** असेसु कसाय-बलु **देप्पिणु** अभउ जयस्सु ।
**लेवि** महव्वय सिवु लहहिं **झाएविणु** तत्तस्सु ॥१॥

**[ एप्प्येप्पिण्वेव्येविणवः ]** एप्पि-एप्पिणु-एवि-एविणु प्रथमा जस् ।

---

१. G. वि + छुटण् छेदने (१५९७) - यपि विच्छोट्य । 'टो डः' (१।१९५) ट० → ड० ।

**[ जेप्पि असेसु कसाय-बलु............ ]**

अस्यार्थः- अशेषं कषायबलं जित्वा, जगतोऽभयं दत्त्वा, महाव्रतानि लात्वा, तत्त्वं ध्यात्वा शिवं लभन्ते इत्यर्थः ।

**[ जेप्पि ]** 'जिं अभिभवे' (८) जि । क्त्वाप्र० । अनेन क्त्वा० → एप्पि० । 'लुक्' (१।१०) इलुक् । 'लोकात्' (१।१।३) जि० → जे० **जेप्पि** ।

**[ देप्पिणु ]** 'डुदांग्क् दाने' (११३८) दा । क्त्वाप्र० । अनेन क्त्वा० → एप्पिणु० । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) दा० → दे० **देप्पिणु** ।

**[ लेवि ]** 'लांक् आदाने' (१०६८) ला । क्त्वाप्र० । अनेन क्त्वा० → एवि० । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) ला० → ले० **लेवि** ।

**[ झाएविणु ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'ध्या-गोर्झा-गौ' (४।६) ध्यै० → झा० । क्त्वाप्र० । अनेन क्त्वा० → एविणु० **झाएविणु** ॥४४०॥

## तुम एवमणाऽणहमणहिं च ॥ ८।४।४४१ ॥

अपभ्रंशे तुमः प्रत्ययस्य एवं-अण-अणहं-अणहिं इत्येते चत्वारः, चकारात् एप्पि-एप्पिणु-एवि-एविणु इत्येते, एवं चाष्टावादेशा भवन्ति ॥

**देवं** दुक्करु निअय-धणु **करण** न तउ[1] पडिहाइ ।
एवँइ सुहु **भुंजणहं** मणु पर **भुंजणहिं** न जाइ ॥१॥

**जेप्पि चएप्पिणु** सयल धर **लेविणु** तवु **पालेवि** ।
विणु [2]संते तित्थेसरेण को सक्कइ भुवणे-वि ? ॥२॥

**[ तुम एवमणाऽणहमणहिं च ]** तुम् षष्ठी ङस् । एवं - अण-अणहं अणहिं प्रथमा जस् । च प्रथमा सि ।

**[ देवं दुक्करु निअय-धणु.............. ]**

अस्यार्थः- निजकं धनं दातुं दुःकरं । तपः कर्तुं न प्रतिभाति । एवमेव सुखं भोक्तुंमनः । परं भोक्तु न यातीत्यर्थः ।

**[ देवं ]** दा-तुम्प्र० । दातुम् । अनेन तुम्० → एवं० । 'लुक्' (१।१०) आलुक् । 'लोकात्' (१।१।३) दा० → दे० **देवं** ।

**[ करण ]** कृ-तुम्प्र० । 'ऋवर्णस्या०' (४।२३४) कृ० → कर० । अनेन तुम्० → अण० । 'लोकात्' (१।१।३) **करण**० ।

**[ भुंजणहं, भुंजणहिं ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । तुम्प्र० । 'भुजो भुञ्ज-जिम-जेम०' (४।११०) भुज्० → भुञ्ज० । अनेन तुम्० → अणहं० → अणहिं० । 'लुक्' (१।१०) अलुक् । 'लोकात्' (१।१।३) **भुंजणहं**० - **भुंजणहिं**० ।

१. N. तउ । २. G. संतिं । शान्ति । टा । 'एं चेदुतः' । 'स्वराणां०' इं० ।

**[ जेप्पि चएप्पिणु सयल धर.......... ]**

अस्यार्थः- शान्तिना[1] तीर्थङ्करेण विना सकलां धरां जेतुं त्यक्तुं तपोलातुं पालयितुं कः शक्नोति भुवनेऽपीत्यर्थः ।

**[ चएप्पिणु ]** 'त्यजं हानौ' (१७२) त्यज् । त्यजनाय = त्यक्तुम् । **'क्रियायां क्रियार्थायां०'** (५।३।१३) तुम्प्र० । 'त्यजेश्चय-तर-तीर-पाराः' (४।८६) त्यज्० → चय० । अनेन तुम्० → एप्पिणु० । **'क-ग-च-ज०'** (१।१७७) यलुक् । 'लुक्' (१।१०) अलोपः । 'लोकात्' (१।१।३) चए० **चएप्पिणु** ।

**[ जेप्पि ]** 'जिं अभिभवे' (८) जि । तुम्प्र० । अनेन तुम्० → एप्पि० । **'लुक्'** **(१।१०)** **इलुक्** । 'लोकात्' (१।१।३) जे० **जेप्पि** ।

**[ लेविणु ]** 'लांक् आदाने' (१०६८) ला । तुम्प्र० । अनेन तुम्० → **एविणु०** । **'लुक्'** **(१।१०)** **आलुक्** । 'लोकात्' (१।१।३) ले० **लेविणु** ।

**[ पालेवि ]** पाल-तुम्प्र० । अनेन तुम्० → एवि० **पालेवि** ॥४४१॥

## गमेरेप्पिण्वेप्प्योरेर्लुग् वा ॥ ८।४।४४२ ॥

अपभ्रंशे गमेर्धातोः परयोरेप्पिणु-एप्पि इत्यादेशयोरेकारस्य लुग् वा भवति ॥

**गंपिणु** वाणारसिहिं नर अह उज्जेणिहिं **गंपि** ।
मुआ परावहिं परम-पउ दिव्वंतरइं म जंपि ॥१॥

पक्षे- गंग **गमेप्पिणु** जो मुअइ[2] जो सिव-तित्थु(त्थ) **गमेप्पि** ।
कीलदि तिदसावास-गउ सो जम-लोउ जिणेप्पि ॥२॥

**[ गमेरेप्पिण्वेप्प्योरेर्लुग्वा ]** गमि षष्ठी ङस् । एप्पिणु-एप्पि षष्ठी ओस् । ए षष्ठी ङस् । **लुक् प्रथमा** सि । वा प्रथमा सि ।

**[ गंपिणु वाणारसिहिं नर.............. ]**

अस्यार्थः- ये नरा वाणारस्यां गत्वाऽथ उज्जयिन्यां गत्वा मृताः ते परमपदं प्राप्नुवन्ति । दिव्यान्तराणि तीर्थान्तराणि मा कथयेत्यर्थः । मृता इत्यत्र म्रियन्ते इति । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) इत्यनेन वर्तमानेऽपि क्तप्रत्ययः ।

**[ गंपिणु गंपि ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - **'गम्लृं गतौ'** **(३९६)** गम् (२) । क्त्वाप्र० । 'एप्प्येप्पिण्वेव्येविणवः' (४।४४०) क्त्वा० → एप्पिणु०-एप्पि० । **अनेन वा एकारलोपः गंपिणु गंपि** ।

**[ गंग गमेप्पिणु जो मुअइ.................. ]**

अस्यार्थः- यो गङ्गां गत्वा मृतः, यश्च शिवतीर्थं गत्वा मृतः, स त्रिदशावासं-देवलोकं गतः सन् क्रीडति । किंकृत्वा ? यमलोकं - मरणं जित्वेत्यर्थः । पक्षे-

**[ गमेप्पिणु गमेप्पि ]** गम् (२) । क्त्वाप्र० । **'एप्प्येप्पिण्वे०'** (४।४४०) क्त्वा० → एप्पिणु० - एप्पि० । 'लोकात्' (१।१।३) **गमेप्पिणु०** **गमेप्पि०** ॥४४२॥

१. H. शान्तिनाथ । २. G. मुअउ ।

## तृनोऽणअः ॥ ८।४।४४३ ॥

अपभ्रंशे तृनः प्रत्ययस्य अणअ इत्यादेशो भवति ॥

हत्थि **मारणउ** लोउ **बोल्लणउ** ।
पडहु **वज्जणउ** सुणउ **भसणउ** ॥१॥

**[ तृनोऽणअः ]** तृन् षष्ठी ङस् । अणअ प्रथमा सि ।

**[ हत्थि मारणउ................ ]**

अस्यार्थः- हस्ती मारयिता, लोकः कथयिता, पटहो वदिता, शुनको भषिता इत्यर्थः ।

**[ मारणउ ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । म्रियमाणं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । मारयतीति मारयिता । 'तृन् शील०' (५।२।२७) तृन्प्र० । 'ऋवर्णस्या०' (४।२३४) मर० । वृद्धिः । 'णेरनिटि' (४।३।८३) णिग्लोपः । अनेन तृन्० → अणअ० । 'लोकात्' (१।१।३) मारणअ० । प्रथमा सि । 'स्यमोरस्योत्' (४।३३१) अ० → उ० । 'अन्त्यव्य०' (१।११) स्लुक् **मारणउ** ।

**[ बोल्लणउ ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । कथयतीत्येवंशीलः = कथयिता । 'तृन् शील०' (५।२।२७) तृन्प्र० । 'कथेर्वज्जर-पज्जरोप्पाल-पिसुण०' (४।२) कथ० → बोल्ल० । अनेन तृन्० → अणअ० । 'णेरनिटि' (४।३।८३) णिच्लोपः **बोल्लणउ** ।

**[ वज्जणउ ]** 'वद व्यक्तायां वाचि' (९९८) वद् । 'तक्ष्यादीनां छोल्लादयः' (४।३९५) वद्० → वज्ज० । शेषं पूर्ववत् । **वज्जणउ** ।

**[ भसणउ ]** 'भष भर्त्सने' (५२१) भष् । 'श-षोः सः' (१।२६०) भष्० → भस्० । शेषं पूर्ववत् । **भसणउ** ॥४४३॥

## इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः ॥ ८।४।४४४ ॥

अपभ्रंशे इवशब्दस्याऽर्थे नं-नउ-नाइ-नावइ-जणि-जणु इत्येते षड् भवन्ति ॥

॥नं॥ **नं** मल्ल-जुज्झु ससि-राहु करहिं ॥१॥ [४।३८२-१] ।

॥नउ॥ रवि[१]-अत्थमणि[२] समाउलेण कंठि विइण्णु न छिण्णु ।
चक्के खंडु मुणालिअहे **नउ** जीवग्गलु दिण्णु ॥२॥

॥नाइ॥ वलयावलि[३]-निवडण-भएण धण उद्ध-ब्भुअ[४] जाइ ।
वल्लह-विरह-महादहहो थाह गवेसइ **नाइ** ॥३॥

---

१. भूमीगयं न चत्ता सूरं दट्ठूण चक्कवाएण । जीयग्गल व्व दिन्ना मुणालिया विरहभीएण ॥ [व० ल० - चक्कवायवज्जा-७२३।२]
भूमिगतं न त्यक्ता सूर्यं दृष्ट्वा चक्रवाकेण । जीवार्गलेव दत्ता मृणालिका विरहभीतेन ॥
२. G. अत्थवँणि ।
३. तह झीणा जह मउलियलोयणउडविहडणे वि असमत्था । सक्किहिइ दुक्करं घरगयं पि दट्ठुं तुमं बाला ॥
[व० ल० - ओलुग्गावियावज्जा-४३७।१६]
तथा क्षीणा यथा मुकुलितलोचनपुटविघटनेऽप्यसमर्था । शक्ष्यति दुष्करं गृहगतमपि द्रष्टुं त्वां बाला ॥
४. N. टि० उद्धभुअ के स्थान पर छन्द की खातिर उद्धब्भुअ ।

॥नावइ॥ पेक्खेविणु मुहु जिणवरहो दीहर-नयण-सलोणु ।
**नावइ** गुरु-मच्छर-भरिउ जलणि पवीसइ लोणु ॥४॥

॥जणि॥ चंपय-कुसुमहो मज्झि सहि ! भसलु पइट्ठउ ।
सोहइ[१] इंदनीलु **जणि** कणइ बइट्ठउ ॥५॥

॥जणु॥ निरुवम-रसु पिएं पिअवि **जणु** ॥६॥ [४।४०१-३] ।

**[ इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः ]** इवार्थ सप्तमी ङि । नं-नउ-नाइ-नावइ-जणि-जणु प्रथमा जस् ।

**[ नं मल्ल-जुज्झु ससि-राहु करहिं ]** पूर्वं लिखितम् । [४।३८२-१] । अत्र **नं** उत्प्रेक्षायाम् ।

**[ रवि-अत्थमणि समाउलेण............... ]**

अस्यार्थः- रव्यस्तमने समाकुलेन चक्रेण-चक्रवाकेन कण्ठे वितीर्णं दत्तम् । मृणालिकायां(याः) खण्डं न छिन्नं - न खण्डितम् । नउ उत्प्रेक्ष्यते । जीवार्गला दत्तेत्यर्थः ।

**[ वलयावलि-निवडण-भएण.......... ]**

अस्यार्थः- नायिका वलयावलिनिपतनभयेन ऊर्ध्वभुजा याति । **नाइ** उत्प्रेक्ष्यते । **वल्लभविरहमहाह्रदस्य** स्ताघं गवेषयतीत्यर्थः ।

**[ पेक्खेविणु मुहु जिणवरहो............... ]**

अस्यार्थः- **नावइ** उत्प्रेक्ष्यते । गुरुमत्सरभृतं लवणं ज्वलने प्रविशति । किंकृत्वा ? जिनवरस्य दीर्घनयनं सलवणं- सलावण्यं मुखं प्रेक्ष्येत्यर्थः ।

**[ चंपय-कुसुमहो मज्झि.................... ]**

अस्यार्थः- हे सखि ! चम्पककुसुममध्ये भ्रमरः प्रविष्टः । **जणि** उत्प्रेक्ष्यते । कनके उपविष्टमिन्द्रनीलं रत्नं शोभते इत्यर्थः ।

**[ निरुवम-रसु पिएं पिअवि जणु ]** पूर्वं लिखितम् । [४।४०१-३] । अत्र **जणु** उत्प्रेक्षायाम् ॥४४४॥

## लिङ्गमतन्त्रम् ॥ ८।४।४४५ ॥

अपभ्रंशे लिङ्गमतन्त्रं व्यभिचारि प्रायो भवति ॥

गय-**कुंभइं** दारंतु ॥१॥ [४।३४५-१] । अत्र पुल्लिङ्गस्य नपुंसकत्वम् ।

**अब्भा** लग्गा [२]डुंगरेहिं पहिउ रडंतउ जाइ ।
जो एहा गिरि-गिलण-मणु सो किं धणहे धणाइ ? ॥२॥

अत्र अब्भा इति नपुंसकस्य पुंस्त्वम् ।

पाँइ[३] विलग्गी **अंत्र( त )डी** सिरु ल्हसिँउ[४] खंधस्सु ।
तो-वि कटारइ हत्थडउ बलि किज्जउं कंतस्सु ॥३॥

---

१. N. टि० सोहेइ ऐसे पाठ की कल्पना करें तो छन्दभंग नहीं होगा । २. G. H. M. डुंगरिहिं ।
३. दाहिणकरेण खग्गं वामेण सिरं धरेइ निवडंतं । अंतावेढियचलणो जाइ भडो एक्कमेक्कस्स ॥ [व० ल० - सुहडवज्जा-१६७।६]
दक्षिणकरेण खड्गं वामेन शिरो धारयति निपतत् । अन्त्रावेष्टितचरणो याति भट एकैकस्य ।
४. G. ल्हसिअउं ।

अत्र अंत्र(त)डी इति नपुंसकस्य स्त्रीत्वम् ।

सिरि चडिआ खंति प्फलइं पुणु **डालइं** मोडंति ।
तो-वि महद्दुम सउणाहं अवराहिउं न करंति ॥४॥

अत्र डालइं इत्यत्र स्त्रीलिङ्गस्य नपुंसकत्वम् ।

**[ लिङ्गमतन्त्रम् ]** लिङ्ग प्रथमा सि । अतन्त्र प्रथमा सि ।

**[ गय-कुंभइं दारंतु ]** पूर्वं लिखितम् । [४।३४५-१] ।

**[ अब्भा लग्गा डुंगरेहिं.............. ]**

अस्यार्थः- पर्वतेषु अभ्राणि-मेघा लग्नानि । पथिको रटन् याति । उत्तरार्द्धे रटनकारणमाह-यो मेघो गिरिगलनमनाः स ईदृक् किं नायिकाया धनानीच्छति ? तां न रक्षतीति भाव इत्यर्थः ।

**[ पाइ विलग्गी अंत्र( त )डी.............. ]**

अस्यार्थः- अन्त्रं पादे विलग्नम् । शिरः स्कन्धं प्रति ल्हसितं-स्रस्तम् । ततोऽपि हस्तः क्षुरिकायाम् । अहं कान्तस्य बलिं क्रिये इत्यर्थः ।

**[ सिरि चडिआ खंति प्फलइं................. ]**

अस्यार्थः- शिरसि चटिताः । फलानि खादन्ति । पुनः शाखा मोटयन्ति । ततोऽपि महाद्रुमा शकुनानामपराधं न कुर्वन्तीत्यर्थः ॥४४६॥

## शौरसेनीवत् ॥ ८।४।४४६ ॥

अपभ्रंशे प्रायः शौरसेनीवत् कार्यं भवति ॥

सीसि सेहरु खणु **विणिम्मविदु** ।

खणु कंठि पालंबु **किदु रदिए विहिदु** खणु मुंडमालिए ।
जं पणएण तं नमहु कुसुम-दाम-कोदंडु कामहो ॥

**[ शौरसेनीवत् ]** शौरसेनीवत् प्रथमा सि ।

**[ सीसि सेहरु खणु विणिम्मविदु............. ]**

गद्यार्थः- कामस्य तत् कुसुमदामकोदण्डं प्रणयेन-स्नेहेन नमत । तत्किंयद्धनु ? रत्या कामभार्यायाः क्षणं शीर्षे शेखरो विनिर्मापितम् । यत् क्षणं कण्ठे प्रालम्बः कृतः । यत् क्षणं मुण्डमालिका[१] मस्तके विहितमित्यर्थः ।

अत्र 'तो दोनादौ शौरसेन्यामयुक्तस्य' (४।२६०) इति तस्य दः ॥छ॥

## व्यत्ययश्च ॥ ८।४।४४७ ॥

प्राकृतादिभाषालक्षणानां व्यत्ययश्च भवति ॥ यथा मागध्यां 'तिष्ठश्चिष्ठः' (४।२९८) इत्युक्तं तथा प्राकृत-पैशाची-शौरसेनीष्वपि भवति ॥ चिष्ठदि ॥

१. G. H. मुण्डमालिकायाम् । M. मुण्डमालिकीयाम् ।

अपभ्रंशे रेफस्याऽधो वा लुगुक्तो मागध्यामपि भवति ॥

शद-माणुश-मंश-भालके कुंभ-**शहश्र**-वशाहे शंचिदे । इत्याद्यन्यदपि द्रष्टव्यम् ॥

न केवलं भाषालक्षणानां त्याद्यादेशानामपि व्यत्ययो भवति । **ये वर्तमाने काले प्रसिद्धास्ते भूतेऽपि भवन्ति** ॥

अह **पेच्छइ** रहुतणओ ॥ अथ प्रेक्षांचक्रे रघुतनय इत्यर्थः ।

**आभासइ** रयणीअरे ॥ आबभाषे रजनीचरानित्यर्थः ।

भूते प्रसिद्धा वर्तमानेऽपि ॥ **सोहीअ** एस वंठो । शृणोत्येष वण्ठ इत्यर्थः ।

[ **व्यत्ययश्च** ] व्यत्यय प्रथमा सि । च प्रथमा सि ।

[ **शद-माणुश-मंश-भालके कुंभ-शहश्र-वशाहे शंचिदे** ] गद्यम् ।

अर्थः- शत-मानुष-मांस-भारकः कुम्भसहस्रवशायाः सञ्चितमित्यर्थः ॥४४७॥

**शेषं संस्कृतवत् सिद्धम् ॥ ८।४।४४८ ॥**

शेषं यदत्र प्राकृतादिभाषासु अष्टमे नोक्तं तत् सप्ताध्यायीनिबद्धसंस्कृतवदेव सिद्धम् ॥

हेट्ठ[1]-ट्ठिय-सूर-निवारणाय छत्तं अहो इव वहंती ।
जयइ ससेसा वराह[2]-सास-दुरुक्खया पुहवी ॥१॥

अत्र चतुर्थ्या आदेशो नोक्तः, स च संस्कृतवदेव सिद्धः । उक्तमपि क्वचित् संस्कृतवदेव भवति । यथा प्राकृते उरस्शब्दस्य सप्तम्येकवचनान्तस्य उरे-उरम्मि इति प्रयोगौ भवतस्तथा क्वचिदुरसीत्यपि भवति । एवम् - सिरे - सिरम्मि - सिरसि । सरे-सरम्मि-सरसि ॥

सिद्धग्रहणं मङ्गलार्थम् । ततो ह्यायुष्मच्छ्रोतृकताभ्युदयश्चेति ।

[ **शेषं संस्कृतवत् सिद्धम्** ] शेष प्रथमा सि । संस्कृतवत् प्रथमा सि । सिद्ध प्रथमा सि ।

[ **हेट्ठट्ठियसूरनिवारणाय................** ] अधःस्थितसूर्यनिवारणायेत्यर्थः ।

चतुर्थपादे सूत्रसंख्या ४४५ (४४८) ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तावष्टमस्याऽध्यायस्य चतुर्थः पादः ॥

शब्दानुशासनवृत्तिः प्रकाशिकानामेति ॥

आसीद्विशाम्पतिरमुद्रचतुःसमुद्रमुद्राङ्कितक्षितिभरक्षमबाहुदण्डः ।
श्रीमूलराज इति दुर्द्धरवैरिकुम्भिकण्ठीरवः शुचिचुलुक्यकुलावतंसः ॥१॥

तस्यान्वये समजनि प्रबलप्रतापतिग्मद्युतिः क्षितिपतिर्जयसिंहदेवः ।
येन स्ववंशसवितर्यपरं सुधांशौ श्रीसिद्धराज इति नाम निजं व्यलेखि ॥२॥

---

१. अधःस्थितसूर्यनिवारणाय छत्रमध इव वहन्ती । जयति सशेषा वाराहश्वासदूरोत्क्षिप्ता पृथिवी ॥ [ग० व० -१५]

२. ग० व० - वाराह ।

सम्यग्निषेव्य चतुरश्चतुरोऽप्युपायान् जित्वोपभुज्य च भुवं चतुरब्धिकाञ्चीम् ।
विद्याचतुष्टयविनीतमतिर्जितात्मा काष्ठामवाप पुरुषार्थचतुष्टये यः ॥३॥

तेनातिविस्तृतदुरागमविप्रकीर्णशब्दानुशासनसमूहकदर्थितेन ।
अभ्यर्थितो निरवमं विधिवद् व्यधत्त शब्दानुशासनमिदं मुनिहेमचन्द्रः ॥४॥

ग्रंथाग्रं - २१८५ श्लोकाः । मूलसूत्र-एकवीशी पंच्याशी । दूहकानां संख्या - १६५ मिति ।

संवत् १९४२ ना वर्षे जेष्ठमासे शुक्लपक्षे पञ्चम्यां तिथौ इन्दुवासरे लं । मु । खुबचन्देन । श्रीजामनयरे । श्री-शान्तिनाथप्रसादात् ॥ श्री तपागच्छे ॥ शिवमस् तु लेखकवाचकयोर्निरन्तरम् ॥

झवेरि ताराचंद प्रागजी तथा झवेरि लखमीचंद हीराचंद तथा पारेख हंसराज वेलजीए मली मुनिराज मोहनविजयजीने आ परत वोहरावी छे ।

इति बृहत्तपागच्छे श्रीश्रीश्रीश्रीसौभाग्यसागरसूरिशिष्येण हर्षकुलपण्डितवचःप्राप्तप्रयोगरहस्येन उदयसौभाग्यगणिना लिखातायां हैमप्राकृतवृत्तिढुण्ढिकायां व्युत्पत्तिदीपिकाभिधानायां सर्वप्रयोगविशेषव्युत्पत्तिप्रकाशिकायां चतुर्थः पाद समर्थितः ॥

श्रीमद्गुरुतपागच्छ-प्राज्यसाम्राज्यकारकाः ।
अभूवन् भुवनख्याता लब्धिसागरसूरयः ॥१॥

तत्पट्टप्रकटाम्भोजे भजन्ते राजहंसताम् ।
विजयन्तेऽधुना तेऽमी धनरत्नगुरूत्तमाः ॥२॥

श्रीलब्धिसागराचार्य-परिचर्याऽनुभावतः ।
प्राप्तोदया[ः] श्रीसौभाग्य-सागराः सन्ति सूरयः ॥३॥

श्रीमल्लघुतपागच्छे विपश्चिन्मौलिमण्डनम् ।
श्रीहर्षकुलनामानः पण्डिता गुणमण्डिताः ॥४॥

तत्पार्श्वेऽध्येष्टा सकलं हैमप्राकृतलक्षणम् ।
सर्वप्रयोगव्युत्पत्ति-रहस्यं लब्धवांश्च ये(यः) ॥५॥

सोऽहं सौभाग्यपाथोधि-सुगुरुक्रमसेवया ।
सुद्धी(धी)रुदयसौभाग्य[ः] प्रचक्रे ढुण्ढिकामिमाम् ॥६॥

विश्वजातिरिपुव्रात-ध्वान्तध्वंसनभास्करे ।
पार्वणेन्दुलसत्कीर्त्ति-धवलीकृतभूतले ॥७॥

प्रणमत् प्रौढपृथ्वीश-कोटीरद्योतिविक्रमे ।
बाहदरसुरत्राणे राज्यं पालयति क्षितौ ॥८॥

श्रीस्तम्भतीर्थनगरे भूम्यङ्कतिथि १५९१ संति मिते वर्षे हर्षविहितो ग्रन्थोऽयं जयतात् चिरम् ॥

परिशिष्ट - १

# ॥ सम्पादनोपयुक्तग्रंथसूची ॥

**[A] प्राकृतव्याकरणढुण्ढिका ।**

ह. प्रतिक्रमाङ्कः- ८६६२ । पत्रसंख्या १-१३१ । शाासनसम्राट् आचार्य-विजयनेमिसूरीश्वरजी ज्ञानशाला - खंभात ।

**[B] हेमप्राकृतवृत्तिढुण्ढिका** । पत्रसंख्या १-२२१ । पं० कान्तिविजयजी - हंसविजयजी संगृहीत ज्ञानभण्डार - वडोदरा ।

**[C] शब्दानुशासन-अष्टमाध्यायवृत्तिढुण्ढिका ( त्रिपाठः ) ।**

ह. प्रतिक्रमाङ्कः- ३६२६ । पत्रसंख्या १-१२८ । संवेगीनो उपाश्रय - अमदावाद ।

**[D] सिद्धहेमचन्द्रव्याकरणप्राकृतवृत्तिढुण्ढिका ।**

ह. प्रतिक्रमाङ्कः- २२९४ । पत्रसंख्या २८ । जैन श्वे० मू० तपा० संघ । शेठ डोसाभाई अभेचंद पेढी - भावनगर ।

**[E] सिद्धहेमचन्द्रशब्दानुशासनप्राकृतव्याकरणवृत्तिः - प्रकाशिकानामा** । ह. प्रतिक्रमाङ्कः- ५७७६ । पत्रसंख्या २२३ । महावीर जैन आराधना केन्द्र । आचार्य कैलाशसागरसूरि ज्ञानमंदिर - कोबा - गांधीनगर ।

**[F]** आ० मलधारि-नरचन्द्रसूरिकृता **सिद्धहेमशब्दानुशासनाष्टमाध्यायप्राकृतप्रबोधवृत्तिः ।**

ह. प्रतिक्रमाङ्कः- २१७६ । पत्रसंख्या ३१ । कलिकालसर्वज्ञ - हेमचन्द्राचार्य जैन ज्ञानमंदिर - पाटण (उ०गु०) ।

**[G]** आचार्य - मलधारि-नरचन्द्रसूरिकृतः **प्राकृतप्रबोधः** । सम्पादिका - सा० दीप्तिप्रज्ञा म. । **प्रकाशकः**- कलिकालसर्वज्ञ - हेमचन्द्राचार्य-नवम जन्मशताब्दी-स्मृति-संस्कार-शिक्षणनिधि-अमदावाद । (वि.स. २०६८) ।

**[H] प्राकृतव्याकरणम्** । सम्पादकः- पंन्यासप्रवर-वज्रसेनविजय-गणिवर्यः ।

प्रकाशकः- भद्रंकर प्रकाशन । ४९-१ महालक्ष्मी सोसायटी-शाहीबाग-अमदावाद-३८०००४ (वि.सं.२०५०) ।

**[I]** सिद्धहेमशब्दानुशासनलघुवृत्तिः **( प्राकृतव्याकरणम् )** भाग-३ । सम्पादकः- अनुवादकः- विवेचकः- पण्डित बेचरदास जीवराज दोशी । प्रकाशकः- युनिवर्सिटी ग्रंथनिर्माण बोर्ड - अमदावाद- ३८०००६ (१९७८) ।

**[J] प्राकृतव्याकरणम्** । (प्रियोदया हिन्दी व्याख्या सहितम्) भाग -१-२ ।

प्रधानसम्पादकः- डॉ० सागरमल जैन - डॉ० प्रेमसुमन जैन । प्रकाशकः- आगम अहिंसा - समता एवं प्राकृत संस्थान - उदयपुर । (वर्ष - २००६) ।

**[K] प्राकृतव्याकरणढुण्ढिका** - (भाग-१) । प्रकाशकः- भीमशी माणेक - बम्बई ।

**[L] प्राकृतव्याकरणम्** - (भाग-१) । सम्पादकः- ज्ञानमुनिः ।

प्रकाशकः- आचार्य आत्माराम जैन मोडल स्कूल-दहेली (दिल्ही) ।

**[M] प्राकृतव्याकरणम्** । प्रकाशकः- चौखम्बा संस्कृत सीरिज ओफिस - वाराणसी ।

**[N] अपभ्रंश व्याकरणम्** । सम्पादकः- डॉ० हरिवल्लभ सी. भायाणी ।

प्रकाशकः- कलिकालसर्वज्ञ - हेमचन्द्राचार्य - नवम जन्मशताब्दी-स्मृति-संस्कार-शिक्षणनिधि-अमदावाद । (१९९४) ।

**[O] अपभ्रंश हिन्दीकोशः ।**

सम्पादकः- नरेशकुमार । प्रकाशकः- डी० के० प्रिन्टवर्ल्ड प्रा० लि० - नई दिल्ली-११००१५ ।

**[P]** सिद्धहेम प्राकृतव्याकरण अपभ्रंश व्याकरण की स्वोपज्ञवृत्तिगत उदाहृत दोधक टीका की दोधकव्याख्यालेशटीका ।

ह. प्रतिक्रमाङ्कः- ६४०३४ । कर्ता - सुमतिरत्न म. । ले. सं. १६४७ । पत्रसंख्या १-९ । आचार्य कैलाशसागरसूरि ज्ञानमंदिर - कोबा - गांधीनगर ।

सिरिदेववायगविरइयं **नंदिसुत्तं** । सम्पादकाः- आगमप्रभाकरो मुनि-पुण्यविजयो म०, पं० दलसुखभाई मालवणिया, पं० अमृतलाल मोहनलाल भोजक । प्रकाशकः- महावीर जैन विद्यालय - मुम्बई - ४०००३६ । (वि.सं. २०२४) ।

सिरिअज्जरक्खियथेरविरइयाइं **अणुओगद्दाराइं** । सम्पादकाः- आगमप्रभाकरो मुनि-पुण्यविजयो म०, पं० दलसुखभाई मालवणिया, पं० अमृतलाल मोहनलाल भोजक । प्रकाशकः- महावीर जैन विद्यालय, मुम्बई-४०००३६ । (वि.सं. २०२४)।

पंचमगणहरभयवं सिरिसुहम्मसामिविरइयं तइयं अंगं **ठाणंगसुत्तं** ।

सम्पादकः- मुनि - जम्बूविजयो म० । प्रकाशकः- महावीर जैन विद्यालय - मुम्बई-४०००३६ । (वि. सं. २०४१) ।

विविहथेरभदंतविरइयाइं **पइण्णयसुत्ताइं** (भागः १-२) । सम्पादकौ- आगमप्रभाकरो मुनि-पुण्यविजयो म०, पं० अमृतलाल मोहनलाल भोजकश्च । प्रकाशकः- महावीर जैन विद्यालय, मुम्बई-४०००३६ । (वि. सं. २०४०) ।

पंचमगणहरसिरिसुहम्मसामिवायणाणुगयं बिइयमंगं **सूयगडंगसुत्तं** ।

सम्पादकः- मुनि - जम्बूविजयो म० । प्रकाशकः- महावीर जैन विद्यालय, मुम्बई-४०००३६ ।

सिरिसेज्जंभवथेरविरइयं **दसकालियसुत्तं** ।

सिरिभद्दबाहुसामिविरइयाए निज्जुत्तीए सिरिवइरसामिसाहुब्भव-सिरिअगत्थियसिंहथेरविरइयाए चुण्णीए य संजुयं । संशोधकः सम्पादकश्च - आगमप्रभाकरो मुनि-पुण्यविजयो म० । प्रकाशकः- प्राकृत ग्रन्थ परिषद्, अहमदाबाद-३८०००७। (वि. सं. २०६०) ।

**व्यवहारभाष्यम् ।**

प्र० सम्पादकः- युवाचार्य महाप्रज्ञ । प्रकाशकः- जैन विश्वभारती संस्थान - लाडनूं । (वि. सं. २०५३) ।

धीरसुंदरसूरिविरचिता **आवश्यकनियुक्तेरवचूर्णिः** । सम्पादकः- मुनि - प्रमोदसागरो म० । प्रकाशकः- देवचन्द लालभाई ।

**आचारांगभाष्यम्** । भाष्यकारः- आचार्य महाप्रज्ञ ।

अनुवादकः मुनि-दुलहराज । प्रकाशकः- जैन विश्वभारती संस्थान - लाडनू । (वि. सं. १९९४) ।

**आयारो** । सम्पादकः- मुनि - नथमल । प्रकाशकः- जैन विश्वभारती संस्थान - लाडनू । (वि. सं. २०३१) ।

**जीयकप्पो** । **संपादकः**- प्रो. एच. डी. वेलणकर । प्रकाशकः- राजस्थान प्रतिष्ठान - जोधपुर ।

**आयारो-आयारचूला** ।

सम्पादकः- मुनि - नथमल । प्रकाशकः- जैन श्वेताम्बर तेरापंथी महासभा-कलकत्ता-१ । (वि. सं. १९६७) ।

**पंचमांगं भगवईसुत्तं** ।

**उत्तरज्झयणसुत्तं** ।

जिनभद्रगणिक्षमाश्रमणविरचितं **विशेषावश्यकभाष्यम्** ।

सम्पादकः- मुनि - राजेन्द्रविजयः । प्रकाशकः- दिव्यदर्शन कार्यालय । (वीर. सं. २४८९) ।

श्रुतकेवलि-भद्रबाहुस्वामिप्रणीतं **कल्पसूत्रम्** ।

प्रकाशिका- जैनग्रन्थप्रकाशनसमितिः- खंभात ।

**देशीशब्दकोशः** ।

प्र० सम्पादकः- युवाचार्य महाप्रज्ञ । प्रकाशकः- जैन विश्वभारती संस्थान-लाडनू । (वि. सं. २०४५) ।

**देशीशब्दसङ्ग्रहः** ।

सम्पादकः- अनुवादकः- विवेचकः- पं० बेचरदास जीवराज दोशी । प्रकाशकः- युनिवर्सिटी ग्रंथनिर्माण बोर्ड - अमदावाद - ६ । (१९७४) ।

शाकटायनविरचितं **शाकटायनव्याकरणम्** । सम्पादकः- शंभुनाथ त्रिपाठी । प्रकाशकः- भारतीय ज्ञानपीठ ।

अमरसिंहसूरिविरचितः **अमरकोषः** । प्रकाशकः- निर्णयसागर प्रेस - बम्बई ।

हेमचन्द्राचार्यविरचितः **अनेकार्थसङ्ग्रहः** । प्रकाशकः- हर्षपुष्पामृत जैन ग्रंथमाला - लाखाबावल ।

कवि-धनपालविरचिता **पाइअलच्छीनाममाला** । प्रकाशकः- जिनशासन आराधना ट्रस्ट-बम्बई । (वि.सं. २०४६) ।

**राजस्थान रा दूहा** ।

सम्पादकः- नरोत्तमदास स्वामी । प्रकाशकः- राजस्थानी रिसर्च इन्स्टिटयुट-बीकानेर । (१९६१) ।

Prakrta Prakasa or The prakrt Grammar of vara Ruchi - By E. B. Cowell. Punthi Pustak Calcutta - 4. [1962]

**पाइअ - सद्द- महण्णवो** । कर्ता - पं० हरगोविंददास त्रिकमचंद शेठ । प्रकाशकः- अरिहंतसिद्धसूरि ग्रंथमाला - लुणावा मंगल भुवन - पालीताणा । (वि.सं. २०६७) ।

**सुभाषितरत्नभाण्डागारम्** । समुद्धृतः- काशिनाथ शर्मा । प्रकाशकः- निर्णयसागर प्रेस - बम्बई ।

सोमदेवभट्टविरचितः **कथासरित्सागरः** । संशोधकः- पं० दुर्गाप्रसादः-काशिनाथ शर्मा च । (१८३७) ।

आचार्य-शान्तिसूरिविरचितं **पुहईचंदचरियं** ।

सम्पादकः- मुनि-रमणिकविजयो म० । प्रकाशिका- प्राकृत ग्रन्थ परिषद् - अहमदाबाद-९ ।

वद्धमाणसूरिविरइया **मणोरमा कहा** । सम्पादकः- पं० रूपेन्द्रकुमार पगारिया । प्रकाशकः- लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर - अहमदाबाद - ९ । (१९८३) ।

मेरुतुङ्गाचार्यविरचितः प्रबन्धचिंतामणिसम्बद्धः **पुरातनप्रबन्धसङ्ग्रहः** ।

सम्पादकः- पुरातत्त्वाचार्यो मुनि-जिनविजयः । प्रकाशकः- सिंघी जैन ज्ञानपीठ-शांतिनिकेतन - बंगाल । (१९८९) ।

रत्नमण्डनगणिविरचितः **सुकृतसागरः** ।

सम्पादकः - आचार्य-प्रद्युम्नसूरिः । प्रकाशकः- अंधेरी गुजराती जैन संघ - ईर्लाब्रीज - मुम्बई । (वि. सं. २०३२) ।

आयरियसूरिविमलसूरिविरइयं **पउमचरियं** (प्रथमो भागः १) । सम्पादकः- डॉ० हर्मन जेकोबी । संशोधकः पुनः सम्पादकश्च - आगमप्रभाकरो मुनि-पुण्यविजयो म० । प्रकाशिका - प्राकृत ग्रन्थ परिषद् - वाराणसी-५ । (वि. सं. २०१८) ।

चिरन्तनाचार्यविरचितः **कुमारपालप्रतिबोधप्रबन्धः** ।

संशोधकः- पं० मफतलाल झवेरचंद गांधी । प्रकाशकः- मुक्तिविमल जैन ग्रंथमाला । (वि. सं. १९९६) ।

कवि-भोजदेवविरचितं **सरस्वतीकण्ठाभरणम्** ।

संशोधकः-केदारनाथ शर्मा, वासुदेव शर्मा च । प्रकाशकः- पाण्डुरंग जावजी - निर्णयसागर प्रेस - बम्बई ।

आनन्दवर्धनाचार्यप्रणीतो **ध्वन्यालोकः** । बदरीनाथशर्मणा निर्मितया दीधितिविवृत्या विभूषितः ।

प्रकाशकः- चौखम्बा संस्कृत सीरिझ ओफिस - बनारस सिटी ।

**गाथा सप्तशती** ।

लेखकः- डॉ० परमानन्द शास्त्री । प्रकाशन प्रतिष्ठानः- आनन्दपुरी मेरठ - (उ०प्र०) । (वि. सं. १९९५) ।

योगीन्दुदेवविरचितः **परमात्मप्रकाशः( परमप्पयासु )** ।

प्रकाशकः- रावजीभाई छगनभाई देसाई । परमश्रुतप्रभावकमण्डल । (१९७३) ।

अब्दुलरहमानकृतः **संदेशरासकः** ।

सम्पादकः- डॉ. हरिवल्लभ चूनीलाल भायाणी । प्रकाशिका - प्राकृत ग्रन्थ परिषद् - अमदाबाद । (१९९९) ।

शूद्रककविविरचितं **मृच्छकटिकम्** ।

संशोधकः- वासुदेव शर्मा । प्रकाशकः- पाण्डुरंग जावजी - निर्णयसागर प्रेस-बम्बई । (शाक - १८४४) ।

कवि-भट्टनारायणप्रणीतं **वेणीसंहारनाटकम्** । "प्रकाश" संस्कृत - हिन्दी व्याख्योपेतम् ।

प्रकाशकः- चौखम्बा संस्कृत सीरिज ओफिस-वाराणसी । (२०२२) ।

कवि-विशाखदत्तविरचितं **मुद्राराक्षसनाटकम्** । प्रकाशकः- आशुबोध विद्याभूषण - नित्यबोधविद्यारत्न ।

प्रवरसेनविरचितं **सेतुबन्धम् ।**

संशोधकः- शिवदत्तशर्मा - काशीनाथशर्मा च । प्रकाशकः- पाण्डुरंग जावजी - निर्णयसागर प्रेस-बम्बई । (शाक-१८५७) ।

महाकवि - कालिदासविरचितं **अभिज्ञानशाकुन्तलम्** ।

व्याख्याकारः सम्पादकश्च - डॉ० गंगासागरराय । प्रकाशकः- चौखम्बा संस्कृत भवन - वाराणसी ।

कवि-हालविरचिता **गाथा सप्तशती** ।

अनुवादकः- डॉ० हरिराम आचार्यः । प्रकाशकः- प्राकृत भारती अकादमी - जयपुर ।

कवि-हालविरचिता **गाथा सप्तशती** ।

अनुवादकः- पं० विश्वनाथ पाठकः । सम्पादकः- डॉ० सागरमल जैन । प्रकाशकः- पार्श्वनाथ शोधपीठ - वाराणसी - ५ । (१९९५) ।

मम्मटाचार्यविरचितः **काव्यप्रकाशः** ।

व्याख्याकारः- डॉ० सत्यव्रतसिंहः । प्रकाशकः- चौखम्बा विद्याभवन - वाराणसी - २२१००१ ।

कवि-वाक्पतिराजविरचितो **गउडवहो** (गौडवधः) ।

सम्पादकः- प्रा० नरहर गोविंद सुरु । प्रकाशकः- प्राकृत टेक्स्ट सोसायटी - अहमदाबाद - ९ ।

कवि-हालविरचितो **गाहाकोसो** (गाथाकोशः) । भुवनपालविरचितया छेकोक्तिविचारलीलानाम्न्या टीकया संवलित : । सम्पादकः- प्रा० माधव वासुदेव पटवर्धन । प्रकाशकः- प्राकृत टेक्स्ट सोसायटी, (प्राकृत ग्रन्थ परिषद्) । (१९८०) ।

कवि-भोजराजविरचितः **शृङ्गारप्रकाशः** (भाग १-२) ।

सम्पादकः- म० म० रेवाप्रसादो द्विवेदी । प्रकाशकः- इन्दिरागांधी राष्ट्रीयकलाकेन्द्रम् - नई दिल्ली - ११०००१ ।

जयवल्लभकृतं **वज्जालग्गं** । अनुवादकः- विश्वनाथ पाठकः । प्रकाशकः- पार्श्वनाथ विद्याश्रम शोध संस्थान । काशी हिन्दु विश्वविद्यालय - वाराणसी । (१९८४) ।

अज्ञातकर्तृक: **कविदर्पण:** ।

सम्पादक:- प्रो० एच० डी० वेलणकर । प्रकाशक:- राजस्थान प्राच्यविद्या प्रतिष्ठान - जोधपुर ।

गोपालकृतटीकयोपेत: कविविरहाङ्ककृतो **वृत्तजातिसमुच्चय:** ।

प्रधानसम्पादक:- मुनि-जिनविजय: । सम्पादक:- प्रो० एच० डी० वेलणकर । प्रकाशक:- राजस्थान प्राच्यविद्या प्रतिष्ठान - जोधपुर ।

कवि-बप्पभट्टिविरचित: **तारागण:** ।

सम्पादक:- डॉ० हरिवल्लभ चूनीलाल भायाणी । प्रकाशिका - प्राकृत ग्रन्थ परिषद् - अमदावाद । (१९८७) ।

Raja cek Haras karpura manjari. poet by - Sten Konow Translated in to English with notes-Charles Rockwell Lanman. Motilal Banarsidass.

अमरकविविरचितं **अमरुशतकम्** । संशोधक:- पं० दुर्गाप्रसाद - वासुदेव शर्मा च ।

कवि-बिहारी की अमरकृति **बिहारी सतसई** ।

प्रकाशक:- राजकिशोर अग्रवाल । विनोद पुस्तक मंदिर, आगरा । (१९६१) ।

कवि-पुष्पदंतविरचितो **महापुराण:** (भाग - १) । सम्पादक:- डॉ० पी० एल० वैद्य ।

अनुवादक:- डॉ० देवेन्द्रकुमार जैन । प्रकाशक:- भारतीय ज्ञानपीठ । (वि. सं. २०३६) ।

धनेश्वरमुनीश्वरविरचितं **सुरसुंदरीचरियं** । प्रकाशिका- जैन ज्ञानवर्धक शाला - वेरावल । (वि. सं. १९९९) ।

सूरिपुरंदर-हरिभद्रसूरिविरचितं **सम्बोधप्रकरणम्** ।

सम्पादक:- मुनि-विशालविजय: । प्रकाशक:- अमृतसूरीश्वरजी ज्ञानमंदिर - दोलतनगर - मुम्बई, ६६ ।

जिनेश्वरसूरिविरचितो **गाहारयणकोश:** । सम्पादकौ- अमृतलाल मोहनलाल भोजक - नगीन जी० शाह ।

प्रकाशक:- लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर - अहमदाबाद - ३८०००९ । (१९७५) ।

शान्तिसूरिविरचितं **चेइयवंदणमहाभासं** । प्रकाशक:- जिनशासन आराधना ट्रस्ट । (वि. सं. २०४९) ।

पूर्वसूरिप्रवरनिर्मित: **कुलकसंदोह:** ।

**नाणपंचमी कहा** । सम्पादक:- डॉ० अमृतलाल सवचंद गोपाणी ।

प्रकाशक:- सिंघी जैन शास्त्र शिक्षापीठ, भारतीय विद्याभवन-मुम्बई ।

**जुगाइजिणिंदचरियं** । सम्पादक:- पं० रूपेन्द्रकुमार पगारिया ।

प्रकाशक:- लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर - अहमदाबाद-९ ।

**प्राकृत भारती** । सम्पादक:- डॉ० प्रेमसुमन जैन, डॉ० सुभाष कोठारी ।

प्रकाशकः- आगम अहिंसा समता एवं प्राकृत संस्थान - उदयपुर ।

**पाहुड दोहा** । कर्ता- मुनि रामसिंह । सम्पादकः- हीरालाल जैन ।

प्रकाशकः- अपभ्रंश साहित्य अकादमी ।

**धातुपारायणम्** । सम्पादकः- आचार्य-मुनिचन्द्रसूरि म० ।

प्रकाशकः- विजयभद्रसूरीश्वरजी जैन संस्कृत पाठशाला-राधनपुर ।

**धातुरत्नाकरः** भाग-१ । प्रणेतारः- आचार्य-लावण्यसूरीश्वराः ।

प्रकाशकः- श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर-बोटाद । वि. सं. २०२४ ।

**अभिधानराजेन्द्रकोषः** । सङ्कलनकारः- आचार्य-राजेन्द्रसूरि म० ।

प्रकाशकः- अभिधान राजेन्द्रकोष प्रकाशन संस्था - अहमदाबाद ।

**कवि-स्वयम्भूकृतं स्वयम्भूछन्दस्** ।

सम्पादकः- प्रो० एच० डी० वेलणकर । प्रकाशकः- राजस्थान प्राच्यविद्या प्रतिष्ठान-जोधपुर ।

**शब्दरत्नमहोदधिः भागः १-२** । संग्राहकः- पंन्यास-मुक्तिविजयो गणी ।

प्रकाशकः- शेठ भोगीलाल सांकलचंद, गांधी रोड, अमदावाद । वि. सं. १९९७ ।

परिशिष्ट - २

# ।। प्राकृतव्याकरणस्य मूलसूत्राणि ।।

## ।। प्रथमः पादः ।।

अथ प्राकृतम् ॥ १।१ ॥
बहुलम् ॥ १।२ ॥
आर्षम् ॥ १।३ ॥
दीर्घ-ह्रस्वौ मिथो वृत्तौ ॥ १।४ ॥
पदयोः सन्धिर्वा ॥ १।५ ॥
न युवर्णस्याऽस्वे ॥ १।६ ॥
एदोतोः स्वरे ॥ १।७ ॥
स्वरस्योद्वृत्ते ॥ १।८ ॥
त्यादेः ॥ १।९ ॥
लुक् ॥ १।१० ॥
अन्त्यव्यञ्जनस्य ॥ १।११ ॥
न श्रदुदोः ॥ १।१२ ॥
निर्दुरोर्वा ॥ १।१३ ॥
स्वरेऽन्तरश्च ॥ १।१४ ॥
स्त्रियामादविद्युतः ॥ १।१५ ॥
रो रा ॥ १।१६ ॥
क्षुधो हा ॥ १।१७ ॥
शरदादेरत् ॥ १।१८ ॥
दिक् - प्रावृषोः सः ॥ १।१९ ॥
आयुरप्सरसोर्वा ॥ १।२० ॥
ककुभो हः ॥ १।२१ ॥
धनुषो वा ॥ १।२२ ॥
मोऽनुस्वारः ॥ १।२३ ॥
वा स्वरे मश्च ॥ १।२४ ॥
ङ-ञ-ण-नो व्यञ्जने ॥ १।२५ ॥
वक्रादावन्तः ॥ १।२६ ॥
क्त्वा-स्यादेर्ण-स्वोर्वा ॥ १।२७ ॥
विंशत्यादेर्लुक् ॥ १।२८ ॥
मांसाऽऽदेर्वा ॥ १।२९ ॥
वर्गेऽन्त्यो वा ॥ १।३० ॥
प्रावृट्-शरत्तरणयः पुंसि ॥ १।३१ ॥
स्नमदाम-शिरो-नभः ॥ १।३२ ॥
वाऽक्ष्यर्थ-वचनाद्याः ॥ १।३३ ॥
गुणाद्याः क्लीबे वा ॥ १।३४ ॥
वेमाञ्जल्याद्याः स्त्रियाम् ॥ १।३५ ॥
बाहोरात् ॥ १।३६ ॥
अतो डो विसर्गस्य ॥ १।३७ ॥
निष्प्रती ओत्परी माल्य-स्थोर्वा ॥ १।३८ ॥
आदेः ॥ १।३९ ॥
त्यदाद्यव्ययात् तस्वरस्य लुक् ॥ १।४० ॥
पदादपेर्वा ॥ १।४१ ॥
इतेः स्वरात् तश्च द्विः ॥ १।४२ ॥
लुप्तय-र-व-श-ष-सां श-ष-सां दीर्घः ॥ १।४३ ॥
अतः समृद्ध्यादौ वा ॥ १।४४ ॥
दक्षिणे हे ॥ १।४५ ॥
इः स्वप्नादौ ॥ १।४६ ॥
पक्वा-ऽङ्गार-ललाटे वा ॥ १।४७ ॥
मध्यम-कतमे द्वितीयस्य ॥ १।४८ ॥
सप्तपर्णे वा ॥ १।४९ ॥
मयट्यइर्वा ॥ १।५० ॥
ईर्हरे वा ॥ १।५१ ॥
ध्वनि-विष्वचोरुः ॥ १।५२ ॥
वन्द्र-खण्डिते णा वा ॥ १।५३॥
गवये वः ॥ १।५४ ॥
प्रथमे प-थोर्वा ॥ १।५५ ॥
ज्ञो णत्वेऽभिज्ञाऽऽदौ ॥ १।५६ ॥
एच्छय्यादौ ॥ १।५७ ॥
वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा ॥ १।५८ ॥
ब्रह्मचर्ये चः ॥ १।५९ ॥
तोऽन्तरि ॥ १।६० ॥
ओत् पद्मे ॥ १।६१ ॥
नमस्कार-परस्परे द्वितीयस्य ॥ १।६२ ॥
वाऽर्पौ ॥ १।६३ ॥

स्वपावुच्च ॥ १।६४ ॥
नात्पुनर्यादाइर्वा ॥ १।६५ ॥
वाऽलाब्वरण्ये लुक् ॥ १।६६ ॥
वाऽव्ययोत्खातादावदातः ॥ १।६७ ॥
घञ्वृद्धेर्वा ॥ १।६८ ॥
महाराष्ट्रे ॥ १।६९ ॥
मांसादिष्वनुस्वारे ॥ १।७० ॥
श्यामाके मः ॥ १।७१ ॥
इः सदाऽऽदौ वा ॥ १।७२ ॥
आचार्ये चोऽच्च ॥ १।७३ ॥
ईः स्त्यान-खल्वाटे ॥ १।७४ ॥
उः सास्ना-स्तावके ॥ १।७५ ॥
ऊद्वाऽऽसारे ॥ १।७६ ॥
आर्यायां र्यः श्वश्र्वाम् ॥ १।७७ ॥
एद् ग्राह्ये ॥ १।७८ ॥
द्वारे वा ॥ १।७९ ॥
पारापते रो वा ॥ १।८० ॥
मात्रटि वा ॥ १।८१ ॥
उदोद्वाऽऽर्द्रे ॥ १।८२ ॥
ओदाल्यां पङ्क्तौ ॥ १।८३ ॥
ह्रस्वः संयोगे ॥ १।८४ ॥
इत एद्वा ॥ १।८५ ॥
किंशुके वा ॥ १।८६ ॥
मिरायाम् ॥ १।८७ ॥
पथि-पृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-बिभीतकेष्वत् ॥१।८८ ॥
शिथिलेङ्गुदे वा ॥ १।८९ ॥
तित्तिरौ रः ॥ १।९० ॥
इतौ तो वाक्याऽऽदौ ॥ १।९१ ॥
ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या ॥ १।९२ ॥
लुंकि निरः ॥ १।९३ ॥
द्विन्योरुत् ॥ १।९४ ॥
प्रवासीक्षौ ॥ १।९५ ॥
युधिष्ठिरे वा ॥ १।९६ ॥
ओच्च द्विधाकृगः ॥ १।९७ ॥
वा निर्झरे ना ॥ १।९८ ॥
हरीतक्यामीतोऽत् ॥ १।९९ ॥
आत्कश्मीरे ॥ १।१०० ॥
पानीयाऽऽदिष्वित् ॥ १।१०१॥
उज्जीर्णे ॥ १।१०२ ॥
ऊर्हीन-विहीने वा ॥ १।१०३ ॥
तीर्थे हे ॥ १।१०४ ॥
एत्पीयूषा-ऽऽपीड-बिभीतक-कीदृशेदृशे ॥ १।१०५ ॥
नीड-पीठे वा ॥ १।१०६ ॥
उतो मुकुलाऽऽदिष्वत् ॥ १।१०७ ॥
वोपरौ ॥ १।१०८ ॥
गुरौ के वा ॥ १।१०९ ॥
इर्भ्रुकुटौ ॥ १।११० ॥
पुरुषे रोः ॥ १।१११ ॥
ईः क्षुते ॥ १।११२ ॥
ऊत्सुभग-मुसले वा ॥ १।११३ ॥
अनुत्साहोच्छन्ने त्स-च्छे ॥ १।११४ ॥
लुंकि दुरो वा ॥ १।११५ ॥
ओत्संयोगे ॥ १।११६ ॥
कुतूहले वा ह्रस्वश्च ॥ १।११७ ॥
अदूतः सूक्ष्मे वा ॥ १।११८ ॥
दुकूले वा लश्च द्विः ॥ १।११९ ॥
ईर्वोद्व्यूढे ॥ १।१२० ॥
उर्भ्रू-हनूमत्कण्डूय-वातूले ॥ १।१२१ ॥
मधूके वा ॥ १।१२२ ॥
इदेतौ नूपुरे वा ॥ १।१२३ ॥
ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥ १।१२४ ॥
स्थूणा-तूणे वा ॥ १।१२५ ॥
ऋतोऽत् ॥ १।१२६ ॥
आत्कृशा-मृदुक-मृदुत्वे वा ॥ १।१२७ ॥
इत्कृपाऽऽदौ ॥ १।१२८ ॥
पृष्ठे वाऽनुत्तरपदे ॥ १।१२९ ॥
मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ १।१३० ॥
उदृत्वादौ ॥ १।१३१ ॥
निवृत्त-वृन्दारके वा ॥ १।१३२ ॥
वृषभे वा वा ॥ १।१३३ ॥
गौणाऽन्त्यस्य ॥ १।१३४ ॥

मातुरिद्वा ॥ १।१३५ ॥
उदूदोन्मृषि ॥ १।१३६ ॥
इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके ॥ १।१३७ ॥
वा बृहस्पतौ ॥ १।१३८ ॥
इदेदोद् वृन्ते ॥ १।१३९ ॥
रिः केवलस्य ॥ १।१४० ॥
ऋणर्ज्वृषभर्त्वृषौ वा ॥ १।१४१ ॥
दृशः क्विप्-टक्-सकः ॥ १।१४२ ॥
आदृते ढिः ॥ १।१४३ ॥
अरिर्दृप्ते ॥ १।१४४ ॥
लृत इलिः क्लृप्त-क्लृन्ने ॥ १।१४५ ॥
एत इद्वा वेदना-चपेटा-देवर-केसरे ॥ १।१४६ ॥
ऊः स्तेने वा ॥ १।१४७ ॥
ऐत एत् ॥ १।१४८ ॥
इत् सैन्धव-शनैश्चरे ॥ १।१४९ ॥
सैन्ये वा ॥ १।१५० ॥
अइर्दैत्यादौ च ॥ १।१५१ ॥
वैरादौ वा ॥ १।१५२ ॥
एच्च दैवे ॥ १।१५३ ॥
उच्चैर्नीचैस्यअः ॥ १।१५४ ॥
ईद्धैर्ये ॥ १।१५५ ॥
ओतोऽद्वा-ऽन्योन्य-प्रकोष्ठा-ऽऽतोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च वः ॥ १।१५६॥
ऊत् सोच्छ्वासे ॥ १।१५७ ॥
गव्यउ-आअः ॥ १।१५८ ॥
औत ओत् ॥ १।१५९ ॥
उत् सौन्दर्यादौ ॥ १।१६० ॥
कौक्षेयके वा ॥ १।१६१ ॥
अउः पौरादौ च ॥ १।१६२ ॥
आच्च गौरवे ॥ १।१६३ ॥
नाव्यावः ॥ १।१६४ ॥
एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ १।१६५ ॥
स्थविर-विचकिला-ऽयस्कारे ॥ १।१६६ ॥
वा कदले ॥ १।१६७ ॥
वेतः कर्णिकारे ॥ १।१६८ ॥
अयौ वैत् ॥ १।१६९ ॥
ओत् पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ १।१७० ॥
अवापोते ॥ १।१७२ ॥
ऊच्चोपे ॥ १।१७३ ॥
उमो निषण्णे ॥ १।१७४ ॥
प्रावरणे अङ्ग्वाऊ ॥ १।१७५ ॥
स्वरादसंयुक्तस्याऽनादेः ॥ १।१७६ ॥
क-ग-च-ज-त-द-प-य-वां प्रायो लुक् ॥ १।१७७ ॥
यमुना-चामुण्डा-कामुका-ऽतिमुक्तके मोऽनुनासिकश्च ॥१।१७८ ॥
नाऽवर्णात् पः ॥ १।१७९ ॥
अवर्णो यश्रुतिः ॥ १।१८० ॥
कुब्ज-कर्पर-कीले कः खोऽपुष्पे ॥ १।१८१ ॥
मरकत-मदकले गः कन्दुके त्वादेः ॥ १।१८२ ॥
किराते चः ॥ १।१८३ ॥
शीकरे भ-हौ वा ॥ १।१८४ ॥
चन्द्रिकायां मः ॥ १।१८५ ॥
निकष-स्फटिक-चिकुरे हः ॥ १।१८६ ॥
ख-घ-थ-ध-भां हः ॥ १।१८७ ॥
पृथकि धो वा ॥ १।१८८ ॥
शृङ्खले खः कः ॥ १।१८९ ॥
पुन्नाग-भागिन्योर्गो मः ॥ १।१९० ॥
छागे लः ॥ १।१९१ ॥
ऊत्वे दुर्भग-सुभगे वः ॥ १।१९२ ॥
खचित-पिशाचयोश्चः स-ल्लौ वा ॥ १।१९३ ॥
जटिले जो झो वा ॥ १।१९४ ॥
टो डः ॥ १।१९५ ॥
सटा-शकट-कैटभे ढः ॥ १।१९६ ॥
स्फटिके लः ॥ १।१९७ ॥
चपेटा-पाटौ वा ॥ १।१९८ ॥
ठो ढः ॥ १।१९९ ॥
अङ्कोठे ल्लः ॥ १।२०० ॥
पिठरे हो वा, रश्च डः ॥ १।२०१ ॥
डो लः ॥ १।२०२ ॥
वेणौ णो वा ॥ १।२०३ ॥
तुच्छे तश्च-छौ वा ॥ १।२०४ ॥

तगर-त्रसर-तूवरे टः ॥ १।२०५ ॥
प्रत्यादौ डः ॥ १।२०६ ॥
इत्वे वेतसे ॥ १।२०७ ॥
गर्भिता-ऽतिमुक्तके णः ॥ १।२०८ ॥
रुदिते दिना ण्णः ॥ १।२०९ ॥
सप्ततौ रः ॥ १।२१० ॥
अतसी - सातवाहने लः ॥ १।२११ ॥
पलिते वा ॥ १।२१२ ॥
पीते वो ले वा ॥ १।२१३ ॥
वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ १।२१४ ॥
मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ १।२१५ ॥
निशीथ-पृथिव्योर्वा ॥ १।२१६ ॥
दंश-दहोः ॥ १।२१८ ॥
संख्या-गद्गदे रः ॥ १।२१९ ॥
कदल्यामद्रुमे ॥ १।२२० ॥
प्रदीपि-दोहदे लः ॥ १।२२१ ॥
कदम्बे वा ॥ १।२२२ ॥
दीपौ धो वा ॥ १।२२३ ॥
कदर्थिते वः ॥ १।२२४ ॥
ककुदे हः ॥ १।२२५ ॥
निषधे धो ढः ॥ १।२२६ ॥
वौषधे ॥ १।२२७ ॥
नो णः ॥ १।२२८ ॥
वाऽऽदौ ॥ १।२२९ ॥
निम्ब-नापिते ल-ण्हं वा ॥ १।२३० ॥
पो वः ॥ १।२३१ ॥
पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ १।२३२ ॥
प्रभूते बः ॥ १।२३३ ॥
नीपा-ऽऽपीडे मो वा ॥ १।२३४ ॥
पापर्द्धौ रः ॥ १।२३५ ॥
फो भ-हौ ॥ १।२३६ ॥
बो वः ॥ १।२३७ ॥
बिसिन्यां भः ॥ १।२३८ ॥
कबन्धे म-यौ ॥ १।२३९ ॥
कैटभे भो वः ॥ १।२४० ॥
विषमे मो ढो वा ॥ १।२४१ ॥
मन्मथे वः ॥ १।२४२ ॥
वाऽभिमन्यौ ॥ १।२४३ ॥
भ्रमरे सो वा ॥ १।२४४ ॥
आदेर्यो जः ॥ १।२४५ ॥
युष्मद्यर्थपरे तः ॥ १।२४६ ॥
यष्ट्यां लः ॥ १।२४७ ॥
वोत्तरीया-ऽनीय-तीय-कृद्ये ज्जः ॥ १।२४८ ॥
छायायां होऽकान्तौ वा ॥ १।२४९ ॥
डाह-वौ कतिपये ॥ १।२५० ॥
किरि - भेरे रो डः ॥ १।२५१ ॥
पर्याणे डा वा ॥ १।२५२ ॥
करवीरे णः ॥ १।२५३ ॥
हरिद्रादौ लः ॥ १।२५४ ॥
स्थूले लो रः ॥ १।२५५ ॥
लाहल-लाङ्गल-लाङ्गूले वाऽऽदेर्णः ॥ १।२५६ ॥
ललाटे च ॥ १।२५७ ॥
शबरे वो मः ॥ १।२५८ ॥
स्वप्न-नीव्योर्वा ॥ १।२५९ ॥
श-षोः सः ॥ १।२६० ॥
स्नुषायां ण्हो नवा ॥ १।२६१ ॥
दश-पाषाणे हः ॥ १।२६२ ॥
दिवसे सः ॥ १।२६३ ॥
हो घोऽनुस्वारात् ॥ १।२६४ ॥
षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छः ॥ १।२६५ ॥
सिरायां वा ॥ १।२६६ ॥
लुग् भाजन-दनुज-राजकुले जः सस्वरस्य नवा ॥१।२६७ ॥
व्याकरण-प्राकारा-ऽऽगते क-गोः ॥ १।२६८ ॥
किसलय-कालायस-हृदये यः ॥ १।२६९ ॥
दुर्गादेव्युदुम्बर-पादपतन-पादपीठेऽन्तर्दः ॥ १।२७० ॥
यावत्तावज्जीविता-ऽऽवर्त्तमाना-ऽवट-प्रावारक-देवकुलैवमेवे वः ॥ १।२७१ ॥

## द्वितीयः पादः

संयुक्तस्य ॥ २।१ ॥
शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ २।२ ॥
क्षः खः क्वचित्तु छ - झौ ॥ २।३ ॥

ष्क-स्कयोर्नाम्नि ॥ २।४ ॥
शुष्क-स्कन्दे वा ॥ २।५ ॥
क्ष्वेटकाऽऽदौ ॥ २।६ ॥
स्थाणावहरे ॥ २।७ ॥
स्तम्भे स्तो वा ॥ २।८ ॥
थ-ठावस्पन्दे ॥ २।९ ॥
रक्ते गो वा ॥ २।१० ॥
शुल्के ङ्गो वा ॥ २।११ ॥
कृत्ति-चत्वरे चः ॥ २।१२ ॥
त्योऽचैत्ये ॥ २।१३ ॥
प्रत्यूषे षश्च हो वा ॥ २।१४ ॥
त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित् ॥ २।१५ ॥
वृश्चिके श्चेर्ञ्चुर्वा ॥ २।१६ ॥
छोऽक्ष्यादौ ॥ २।१७ ॥
क्षमायां कौ ॥ २।१८ ॥
ऋक्षे वा ॥ २।१९ ॥
क्षण उत्सवे ॥ २।२० ॥
ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ २।२१ ॥
सामर्थ्योत्सुकोत्सवे वा ॥ २।२२ ॥
स्पृहायाम् ॥ २।२३ ॥
द्य-य्य-र्यां जः ॥ २।२४ ॥
अभिमन्यौ ज-ञ्जौ वा ॥ २।२५ ॥
साध्वस-ध्य-ह्यां झः ॥ २।२६ ॥
ध्वजे वा ॥ २।२७ ॥
इन्धौ झा ॥ २।२८ ॥
वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते टः ॥ २।२९ ॥
र्त्तस्याऽधूर्त्तादौ ॥ २।३० ॥
वृन्ते ण्टः ॥ २।३१ ॥
ठोऽस्थि - विसंस्थुले ॥ २।३२ ॥
स्त्यान - चतुर्था-ऽर्थे वा ॥ २।३३ ॥
ष्टस्याऽनुष्ट्रेष्टासंदष्टे ॥ २।३४ ॥
गर्त्ते डः ॥ २।३५ ॥
संमर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ २।३६ ॥
गर्दभे वा ॥ २।३७ ॥
कन्दरिका-भिन्दिपाले ण्डः ॥ २।३८ ॥
स्तब्धे ठ-ढौ ॥ २।३९ ॥
दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ २।४० ॥
श्रद्धर्द्धि - मूर्धा-ऽर्धेऽन्ते वा ॥ २।४१ ॥
म्न-ज्ञोर्णः ॥ २।४२ ॥
पञ्चाशत्-पञ्चदश-दत्ते ॥ २।४३ ॥
मन्यौ न्तो वा ॥ २।४४ ॥
स्तस्य थोऽसमस्त-स्तम्बे ॥ २।४५ ॥
स्तवे वा ॥ २।४६ ॥
पर्यस्ते थ-टौ ॥ २।४७ ॥
वोत्साहे थो हश्च रः ॥ २।४८ ॥
आश्लिष्टे ल-धौ ॥ २।४९ ॥
चिह्ने न्धो वा ॥ २।५० ॥
भस्मा-ऽऽत्मनोः पो वा ॥ २।५१ ॥
ड्म-क्मोः ॥ २।५२ ॥
ष्प-स्पयोः फः ॥ २।५३ ॥
भीष्मे ष्मः ॥ २।५४ ॥
श्लेष्मणि वा ॥ २।५५ ॥
ताम्रा-ऽऽम्रे म्बः ॥ २।५६ ॥
ह्वो भो वा ॥ २।५७ ॥
वा विह्वले वौ वश्च ॥ २।५८ ॥
वोर्ध्वे ॥ २।५९ ॥
कश्मीरे म्भो वा ॥ २।६० ॥
न्मो मः ॥ २।६१ ॥
ग्मो वा ॥ २।६२ ॥
ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः ॥ २।६३ ॥
धैर्ये वा ॥ २।६४ ॥
एतः पर्यन्ते ॥ २।६५ ॥
आश्चर्ये ॥ २।६६ ॥
अतो रिआ-ऽर-रिज्ज-रीअं ॥ २।६७ ॥
पर्यस्त-पर्याण-सौकुमार्ये ल्लः ॥ २।६८ ॥
बृहस्पति - वनस्पत्योः सो वा ॥ २।६९ ॥
बाष्पे होऽश्रुणि ॥ २।७० ॥
कार्षापणे ॥ २।७१ ॥
दुःख-दक्षिण-तीर्थे वा ॥ २।७२ ॥
कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ २।७३ ॥
पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ २।७४ ॥
सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः ॥ २।७५ ॥

हलो ल्हः ॥ २।७६ ॥
क-ग-ट-ड-त-द-प-श-ष-स- ≍ क-)(पामूर्ध्वं लुक् ॥ २।७७ ॥
अधो म-न-याम् ॥ २।७८ ॥
सर्वत्र ल-ब-रामवन्द्रे ॥ २।७९ ॥
द्रे रो नवा ॥ २।८० ॥
धात्र्याम् ॥ २।८१ ॥
तीक्ष्णे णः ॥ २।८२ ॥
ज्ञो ञः ॥ २।८३ ॥
मध्याह्ने हः ॥ २।८४ ॥
दशार्हे ॥ २।८५ ॥
आदेः श्मश्रु-श्मशाने ॥ २।८६ ॥
श्चो हरिश्चन्द्रे ॥ २।८७ ॥
रात्रौ वा ॥ २।८८ ॥
अनादौ शेषाऽऽदेशयोर्द्वित्वम् ॥ २।८९ ॥
द्वितीय-तुर्ययोरुपरि पूर्वः ॥ २।९० ॥
दीर्घे वा ॥ २।९१ ॥
न दीर्घानुस्वारात् ॥ २।९२ ॥
र-होः ॥ २।९३ ॥
धृष्टद्युम्ने णः ॥ २।९४ ॥
कर्णिकारे वा ॥ २।९५ ॥
दृप्ते ॥ २।९६ ॥
समासे वा ॥ २।९७ ॥
तैलादौ ॥ २।९८ ॥
सेवादौ वा ॥ २।९९ ॥
शार्ङ्गे ङात् पूर्वोऽत् ॥ २।१०० ॥
क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥ २।१०१ ॥
स्नेहा-ऽग्न्योर्वा ॥ २।१०२ ॥
प्लक्षे लात् ॥ २।१०३ ॥
र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ २।१०४ ॥
र्श-र्ष-तप्त-वज्रे वा ॥ २।१०५ ॥
लात् ॥ २।१०६ ॥
